ÂYURVEDÎYA GRANTHAMÂLÂ.

No. I.

RAṢAHṚIDAYA TANTRA

BY

GOVIND BHAGVATPÂD

With the commentary of

MUGDHÂVABODHINÎ

BY

CHATURBHOOJA MIŚRA.

EDITED BY

GURUNÂTH KÂLE

AND

VAIDYA JÂDAVJÎ TRICUMJI ÂCHÂRYA.

PUBLISHED BY

VAIDYA JÂDAVJI TRICUMJI ÂCHÂRYA,

No. 372, Borâ Bazâr Street, Fort, Bombay.

1911 A. D.

Price Re. 1.

BOMBAY:

PRINTED BY B. R. GHÂNEKAR, AT THE "NIRNAYA-SÂGARA" PRESS,

23, KOLBHAT LANE, FOR THE PUBLISHER.

आयुर्वेदीयग्रन्थमाला ।

प्रथमं पुष्पम् ।

चतुर्भुजमिश्रविरचित–मुग्धावबोधिनीव्याख्या-
समुल्लसितं श्रीमद्गोविन्दभगवत्पादविरचितं

रसहृदयतन्त्रम् ।

'काळे' इत्युपाह्वगुरुनाथात्मजत्र्यम्बकेन
तथा
आचार्योपाह्वेन त्रिविक्रमात्मजेन यादवशर्मणा
संशोधितम्

सं. १९६७.

मूल्यमेको रूप्यकः ।

रसहृदयान्तर्गतविषयानुक्रमणिका ।

चतुर्थोऽवबोधः ।

पञ्चमोऽवबोधः ।

षष्ठोऽवबोधः ।

रसहृदयपाठसंशोधनम् ।

अपपाठः	सुपाठः	पृ.	पं.
तदपि च	कुष्ठं	४	१८
सर्वसत्वानाम्	सर्वसत्त्वानाम्	८	१३
–मुपसितुं	–मुपासितुं	१०	४
अद्वितीयस्तात्प्राचुर्यं	अद्वितीयस्तत्प्राचुर्यं	११	२४
? प्राप्नुवन्ति	प्राप्नुवन्ति ?	१४	२३
चारणविधानं च	चारणं चैत्र	१५	२१
चित्रकं प्रतीतं	चित्रकः प्रतीतः	१६	९
कुष्टानष्टौ	कुष्ठानष्टौ	१७	१०
–भेषज्यैर्नष्ट–	–भैषज्यैर्नष्ट–	,,	१९
इति लब्धवीर्यः सम्यक्	एवं लब्धो वीर्यं	२०	५
इति	एवं	,,	७
सम्यक् लब्धवीर्यः	वीर्यं लब्धः	,,	१२
सराजिकैर्च्योषणकैस्त्रिरात्रम्	सराजिकैः सोषणकैस्त्रिरात्रम्	२१	२१
इत्येतैः	एतैः	२३	११
कुष्ठः	कुष्ठं	२५	८
। निर्मुखेन	निर्मुखेन ।	,,	१३
अभ्रकाद्यपधातूनां	अभ्रकाद्युपधातूनां	२६	६
निषेक	निषेकः	,,	१३
द्रव्यरत्नादिकं	द्रव्यं रत्नादिकम्	२७	३
वेतसबीजपूराम्लैः	वेतसजम्बीरबीजपूराम्लैः	,,	१७
प्रवक्ष्याम्युपदेशं	वक्ष्याम्युपदेशं	३०	१८
तदनु च	तदनु	३१	७
ररपक्षापकर्तनं	रसपक्षापकर्तनं	,,	११
पिष्टिमेलनविशेत्सा	पिष्टिमेलनविशेषात्सा	३२	९
ध्मातो घनः	ध्मातः	३६	३
रसेन्द्रबन्धकारि	रसे बन्धकारि	३८	६
नैव	नैति	,,	१४
अभिषवयोगाच्चरति	अभिषवयोगाद्द्रवति	,,	२७
सहृदयटीकायां	रसहृदयटीकायां	४१	१५

अपपाठः	सुपाठः	पृ.	पं.
द्रवति हि	द्रवन्ति	४२	७
कृतखोटं	खोटं	,,	१९
यद्भुतं	यद्द्रुतं	,,	२६
पादार्धसत्वेन	सत्त्वेन	,,	२७
शीघ्रं प्राप्य	प्राप्य, शीघ्रं	४३	७
चतुरङ्गुलोर्ध्वेछिद्रेषु	चतुरङ्गुलोर्ध्वेच्छिद्रेषु	,,	२७
द्रवति	द्रवन्ति	४४	२
रुक्ममाक्षिकं	रूप्यमाक्षिकं	४६	११
द्रवति	द्रवति हि	४७	४
क्षाराम्ललवणानि	क्षाराम्लपटूनि	४८	८
–म्ललवणानि	–म्लपटूनि	,,	१३
लवणानि	पटूनि लवणानि	,,	,,
पञ्चाशति	पञ्चाशति च	४९	१२
निर्वङ्गं	निर्वङ्गं	५१	२६
शतव्यूढं	निर्व्यूढं	५३	१
द्रवति च	द्रवति	,,	२
पूर्वौषधपुटितं	पूर्वौषधं पुटितं	,,	८
शतव्यूढं	निर्व्यूढं	,,	१३
शतवारं	'शतवारं' इति शेषः	,,	,,
आवतृत्ते	आवृत्ते	,,	१६
पाको	पाकोऽथ	५४	२३
माषैश्च	माषैः	,,	२४
खर्परे	सुखर्परे	५५	५
गर्भद्रुतिं	गर्भद्रावं	५६	१
सौवीरेणार्धपूर्णे	सौवीरेणार्धभृते	,,	१०
–णार्धपूर्णे	–णार्धभृते	,,	१४
हीये	हीयेत	५७	१
हत्र	ह्यत्र	५८	५
धरेद्दण्डम्	धारयेद्दण्डम्	,,	१०
–दविप्रुषश्च विंशत्या	–दविप्रुषो विंशात्	,,	१६
–मङ्गारैः करीषतुषमिश्रैः	–मङ्गारैस्तुषकरीषयुतैः	५९	१५
करीषतुषमिश्रैः	तुषकरीषयुतैः	,,	२२

अपपाठः	सुपाठः	पृ.	पं.
गर्भद्रुतिः सर्वलोहानां	गर्भे द्रवन्ति लोहानि	५९	२५
सर्वलोहानां	लोहानि	,,	२८
स्वर्णादीनां	स्वर्णादीनि	,,	२९
गर्भद्रुतिर्भवति	गर्भे द्रवन्ति	,,	,,
तेऽशुष्का	ते शुष्का	६२	५
–वत्वात्	–कत्वात्	,,	९
संकरैर्मिश्राम्	संकरे मिश्राम्	६३	१५
निजकर्मैः	निजकर्मे	६४	४
हत्वा माक्षिकेण	हत्वा वा माक्षिकेण	,,	१९
रसरञ्जने	रसरजने	,,	२६
विकारे	अधिकारे	६५	७
वहेद्वद्वङ्गशस्त्रादीन्	वहेद्वङ्गशस्त्रादीन्	,,	१९
–ताप्यगन्धकशिलानाम्	–माक्षीकगन्धकशिलानाम्	६६	११
माक्षिकसत्वरसकौ	माक्षीकसत्त्वरसकौ	,,	१८
रसकतालयुतम्	रसकसुतालयुतम्	६७	८
रसे	रसे न	६८	२१
उपरससंज्ञकमिदं	उपरससंज्ञमिदं	६९	५
माक्षिकमप्येवम्	माक्षीकमप्येवम्	७०	२६
–स्नुहिक्षीरैः	–स्नुक्क्षीरैः	७१	१
निर्गुण्डीरससंसिक्तं	निर्गुण्डीरससिक्तं	,,	२
वारमपि	वारतो	,,	९
नागनासिकाभिधानं	नागनासाभिधानं	७२	१७
निर्जरशिखरि–	निर्जरगिरि–	,,	२५
शिखरी	गिरिः	,,	,,
पुनर्निर्जरशिखरि–	पुनर्निर्जरगिरि–	७३	१
दशांशस्वर्जिक–	दशांशसर्जिक–	,,	७
–माक्षिक–	–माक्षीक–	,,	२६
न	नैव	७४	४
स्त्रीवज्रीदुग्धभावितमेरण्डस्नेह–	स्त्रीस्नुग्दुग्धैर्भावितमेरण्ड-तैल–	७५	१
स्त्रीवज्रीदुग्धभावितं	स्त्रीस्नुग्दुग्धैर्भावितं	,,	३
वज्री	स्नुक्	,,	४

अपपाठः	सुपाठः	पृ.	पं.
ऊर्णाटङ्कणगुड–	ऊर्णागुड–	७५	१४
–सर्जरसैः सर्वधातुभिः	–सर्जरसैश्च धातुभिः	,,	,,
कोष्टकधमनविधिना	कोष्ठ्यां च धमनविधिना	,,	२५
तिलं प्रतीतं	तिलः प्रतीतः	७६	६
संमिलिति सर्वलोहगुणान्	संमिलितसर्वलोहगुणान्	,,	२०
संमिलति	रसे प्रविशति	,,	२३
सर्वलोहगुणान्	संमिलितसर्वलोहगुणान्	,,	२४
–माक्षिकगैरिकदरदैः	माक्षीकगैरिकदरदैश्च	७७	६
माक्षिकराजवर्तमथो	माक्षीकं राजवर्तमथ	,,	२८
रक्तवर्णे	रक्तवर्गे	७८	२७
–गुञ्जाकृतलेपाम्	–गुञ्जकृतलेपाम्	७९	१४
–द्वन्द्वान्यतमकं	–द्वन्द्वान्यतमं ततः	८१	२०
माक्षीक–	–माक्षिक–	८२	१६
तीक्ष्णाभ्रकं	तीक्ष्णाभ्रकं च	,,	२९
तीक्ष्णशुल्वाभ्रकं	तीक्ष्णशुल्वाभ्रकं च	८३	१५
शुल्वाभ्र–	शुल्बगगन–	,,	२३
द्रावितं हि वीजं	द्रावितबीजं	८४	१३
गन्धपादेन	गन्धकपादेन	८५	१२
अल्पमल्पदानेन	अल्पाल्पदानेन	८६	२४
धूमरोधेन	धूमनिरोधेन	८७	६
जयेत	जायेत	,,	९
सुलिप्तमुषोदरे	सुलिप्तमूषोदरे	८८	९
सरस्य	रसस्य	८९	६
संमिलिता	सममिलिता	,,	१८
–परिप्लावित–	–प्लावित–	९०	७
द्रुतजातमभ्रकसत्वं	द्रुतमास्तेऽभ्रसत्त्वं	,,	८
दूते	द्रुते	,,	१२
–प्लावित–	–परिभावित–	,,	१४
कृतपरिवापम्	–कृतवापम्	,,	,,
अभ्रकद्रुतिरविशेषा	अभ्रद्रुतिरविशेषा	९१	,,
–पलाशबीजरसैः	–पलाशबीजकरसैः	९२	६
सोष्णतुष–	सोष्णे तुष–	,,	७

अपपाठः	सुपाठः	पृ.	पं.
–ग्रासक्रमाज्जरते रसो	–ग्रासक्रमतो जरते रसस्तथा	९२	१९
षोडश वा	षोडश	९३	१
जीर्णाश्च चतुःषष्टिः	जीर्णाश्चतुःषष्टिः	,,	,,
लोहेष्वथवापि हि	लोहेष्वपि	,,	१५
कट्टतुम्बीतैलमेकस्मात्	कट्टतुम्बितैलमेकस्मात्	९४	३
समं	तत्समं	,,	२४
–वीततनद्धेन	–विततनद्धेन	,,	२९
मिलति च	मिलति	९५	२
दृढमुखा	सुदृढमुखा	९६	४
तदनु	तदनु खलु	,,	६
अन्तरूर्ध्वं	ऊर्ध्वं	,,	८
दृढमुखा दृढं	सुदृढमुखा सुदृढं	,,	१४
निरुद्धतां	निरुद्धां तां	,,	२३
स्थाप्य	स्थाप्य च	,,	२४
मूषायां तस्यां बीजं समावृत्त्य	तस्यां मूषायां बीजमावृत्त्य	९७	६
सूतः	सूतश्च	९९	१३
भवति	भवति हि	,,	१४
निच्छिद्रा	निश्छिद्रा	,,	१६
संवेष्टय तिष्ठति	संवेष्टयति च	१००	२४
कुनटीमाक्षिकविषं	कुनटीमाक्षीकविषं	१०१	१५
च विशति	विशति	१०२	१९
एकोनपञ्चाश–	एकोनाः पञ्चाश–	१०३	११
तथा	ऽथवा	,,	२५
युज्यते	नियुज्यते	१०४	१३
अम्लाद्युद्वर्तित–	अम्लादिभिरुद्वर्तित–	,,	१८
कनकमसितभागेन	कनकमशीतिभागेन	१०५	२
पट्टशिला–	लवणशिला–	,,	६
काचस्तत्कालिकविनाशं	काचः कालिकविनाशं	,,	२५
तन्निर्व्यूढं	तद्व्यूढं	१०६	१३
कलधौतेन	कलधौते	,,	२३
सहितः	सहितश्च	१०७	६
–ऽन्नकोष्ठीधृतो	–ऽन्नकोष्ठीधृतो	,,	९

अपपाठः	सुपाठः	पृ.	पं.
यद्बिजं	यद्बीजं	१०७	१५
पीताभ्रगन्धताप्यरसकैश्च	पीताभ्रक गन्धताप्यरसकैश्च	,,	१८
रसकपीताभ्रसत्त्वविमलं	रसकं पीताभ्रसत्त्वविमलं	१०८	७
गलितं	गलितं तत्	,,	१४
विधिना तदपि	विधिना	,,	२४
निर्गुण्डी–	निर्गुण्डि-	१०९	१६
समन्ततश्छाया	समन्ततश्छाय	,,	१७
सामायाति	समायाति	,,	२२
तदौषधिपिण्डम्	तदौषधीपिण्डम्	११०	१
एवंविधा	एवंविधां	,,	६
समबीजेन	समबीजेन तु	,,	११
प्रतिसारणां	प्रतिसारणा	,,	१४
शतगुणं	मृतनागं शतगुणं	,,	१७
स्त्रीपयः	स्त्रीपयश्च	१११	९
कामकल्के	कामणकल्कं	,,	१०
भावना देयाः	भावनाः सप्त	,,	१४
सप्त कल्केन	कल्केनानेन	,,	१५
तदनु	तदनु च	११२	२९
शिलया	शिलया च	११३	५
तावन्मृदित–	तावन्मर्दित–	,,	६
कर्यात्	कुर्यात्	,,	१४
चालेपविधिं	च लेपविधिं	११४	५
येन	येन च	,,	६
सूतकृष्टी	सूतकृष्टी	११५	४
तारछविं	तारच्छविं	११६	११
–मुज्जलं	–मुज्ज्वलं	,,	१५
नियनहितसहितैः	नयनहितसहितैः	,,	२०
–मधुविमिश्रैः	मधुमिश्रैः	,,	२३
तालकं समभागयोजितं	तालकसमभागयोजितं	,,	२७
प्रोक्तानपि	प्रक्रान्तानपि	११७	२९
शुण्ठीपिपल्योरपि	शुण्ठीपिप्पल्योरपि	११८	२९
तैलयुक्तो	तैलयुतो	१२०	२२

अपपाठः	सुपाठः	पृ.	पं.
तदनु	तदनु च	१२१	५
वा संयोज्यं	संयोज्य	१२२	७
त्रिकटुक–	त्रिकटु–	,,	१९
कीर्तिता	प्रकीर्तिता	१२३	१
अप्राप्तलोकभावं	अप्राप्तलोपभावं	,,	७
स्थगितवस्त्रेण	स्थगितं वस्त्रेण	,,	२४
मासेन तु	मासेन	१२४	१५
अभ्रकस्य–	अभ्रकसत्त्वक–	१२५	२६
जीर्णहतो	जीर्णाहतो	१२६	२९
नष्टमासं	नष्टमांसं	१२८	१
परमश्रेयसहेतुः	परमश्रेयोहेतुः	१३४	२५
नत्प्रा	नप्त्रा	१३५	२४
सूतेन	सुतेन	,,	,,

समाप्तमिदं रसहृदयपाठसंशोधनम् ।

भूमिका.

रसहृदयाख्यस्यास्य तन्त्रस्य कर्ता गोविन्दभिक्षुः को नाम ? कस्मिन् काले, कस्मिंश्च जनपदे समजनीत्येतद्विषये तद्विरचितग्रन्थादिभ्यो यदितिवृत्तमुपलब्धं तदिह संक्षेपेण निवेदयामि । अयं गोविन्दभिक्षुर्बौद्धभिक्षुरासीदिति 'डॉ. प्रफुल्लचन्द्रराय' इत्येतैः 'भारतीयरसायनशास्त्रेतिहास' नामके स्वविरचिते ग्रन्थे प्रतिपादितं[1]; तन्न समीचीनं, यतोऽस्य तन्त्रस्य प्रथम एवाववोधे गोविन्दभिक्षुणा वेदान्तैकगम्यं ब्रह्म प्रतिपादितं[2], तथा 'यज्ञाद्दानात्तपसो वेदाध्ययनाद्दमात्सदाचारात् । अत्यन्तं श्रेयःकिल' इत्यार्यया यज्ञदानवेदाध्ययनादीनामत्यन्तश्रेयःप्राप्त्युपायत्वं च दर्शितं, तच्च तस्य बौद्धधर्मानुयायित्वे न संभवति; यतो बौद्धास्तावत्क्षणिकविज्ञानादिवादिनो अखण्डैकरसं ब्रह्म न मन्यन्ते, यज्ञवेदाध्ययनादीनि च निष्फलानीति प्रतिपादयन्ति । तथा ग्रन्थारम्भ एव कृतं हरिहरयोर्मङ्गलं च बौद्धे कर्तरि न संभवति । अतो नायं बौद्धभिक्षुः, किन्तु वैदिकधर्मानुयाय्येवेति निश्चीयते । स च भगवत आद्यशङ्कराचार्यस्य गुरुत्वेन प्रसिद्धो गोविन्दभगवत्पादाचार्य एवेत्यनुमीयते, सर्वदर्शनसंग्रहे (रसेश्वरदर्शने) वेदभाष्यकर्त्रा शाङ्करमतानुयायिना श्रीमाधवाचार्येण 'गोविन्दभगवत्पादाचार्यैरपि' 'तदुक्तमाचार्यैः' इत्यादिना बहुमानपुरःसरं तन्नामोल्लेखात्[3] । मुग्धाववोधिनीटीकाकारश्चतुर्भुजमिश्रोऽपि 'आचार्यश्रीमद्गोविन्दपादाः' इति बहुमानेन तमुल्लिखति, तथा रसेन्द्रचिन्तामणिकारः श्रीरामचन्द्रगुहश्च 'भगवद्गोविन्दपादा' (र. चि. अ. ३) इत्यनेनैव नाम्ना तमुल्लिखति, तथा च रसेश्वरदर्शने रसेश्वरसिद्धान्तादुद्धृते श्लोकेऽपि 'गोविन्दभगवत्पादाचार्यो गोविन्दनायकः[4]' इत्येव पठ्यते । अन्यच्च, रसहृदयकर्तुर्गोविन्दभिक्षोः श्रीमदाद्यशङ्कराचार्यगुरुत्वे रसहृदयस्थाया 'बालः षोडशवर्षो विषयरसास्वादलम्पटः परतः । यातविवेको वृद्धो मर्त्यः कथमाप्नुयान्मुक्तिं' इत्यार्यायाः चर्पटपञ्जर्यां श्रीशङ्कराचार्योक्तेन 'बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः। वृद्धस्तावच्चिन्तामग्नः परमे ब्रह्मणि न कोऽपि लग्नः' इति पद्येन सह अर्थत उपल-

---

1. See History of Hindu Chemistry Vol. II.

२ 'एकांशेन जगन्ति च' इत्यादिना ।

३ एतेनापि नायं बौद्धभिक्षुरित्येवावसीयते ।

४ अत्र गोविन्दनामकौ द्वौ रससिद्धौ लिखितौ । तत्रैको रसहृदयकर्ता अन्यश्च रससारकर्ता भवेत् । एतेन माधवकालतो प्राचीनतरस्य रसेश्वरसिद्धान्तस्यापि प्राचीनो गोविन्दभिक्षुरित्यनुमीयते ।

श्यमानं सादृश्यमपि बलवद्भमकमेव । यतो गुरुशिष्ययोर्विचारसमत्वं प्राय एवोपलभ्यते । अयं च योग्यप्यासीदिति 'भ्रूयुगमध्यगतं यच्छिखिविद्युत्सूर्यवज्जगद्भासि । केषांचित्पुण्यदृशामुन्मीलयति चिन्मयं ज्योतिः' इत्यार्यया ज्ञायते । रससारकर्ता गोविन्दाचार्यस्तु रसहृदयकर्तुर्गोविन्दभिक्षोर्भिन्नोऽर्वाचीनश्चेति [1]रससारस्य त्रयोविंशतितमे पटले तेनोक्तादात्मवृत्तान्तात्प्रतीयते ।

सोऽयं गोविन्दभिक्षुः रसरत्नसमुच्चयकर्तुर्वाग्भटात्प्राचीनतर एव, यतो रसरत्नसमुच्चये वाग्भटेन रसहृदयात् 'मूर्च्छित्वा हरति रुजं' इत्यारभ्य 'हरगौरीसृष्टिसंयोगात्' इत्यन्तं यावत्सप्तविंशतिरार्याः समुद्धृताः । रसरत्नसमुच्चयकर्ता वाग्भटस्तु ख्रिस्तत्रयोदशशताब्द्यां बभूवेति प्रतीयते, तत्कर्तृकेन चर्पटीसिंहणाद्युल्लेखेन[2] । अयं च गोविन्दभिक्षुः गोविन्दभगवत्पादा इति प्रसिद्ध आद्यशङ्कराचार्यगुरुरेवेत्युपरि प्रतिपादितमेव । श्रीशङ्कराचार्यसमयस्तु शककालस्य दशोत्तरसप्तशतात् द्विचत्वारिंशत्युत्तरसप्तशतपर्यन्तमितीतिहासविदां सुप्रसिद्धमेव । अतो रसहृदयस्य कालः शककालस्य दशोत्तरसप्तशत (७१०) वर्षात् प्राक् कतिपयानि वर्षाणीत्यवगम्यते । अन्यच्च, रसहृदयस्यान्ते गोविन्दभिक्षुणाऽऽत्मवृत्तान्तं निवेदितं; यथा,–'शीतांशुवंशसंभवहैहयकुलजन्मजनितगुणमहिमा । स जयति श्रीमदनश्च किरातनाथो रसाचार्यः ॥ तस्य स्वयमवतीर्णा रसविद्या सकलमङ्गलाधारा । परमश्रेयोहेतुः श्रेयसी परमेष्ठिनः पूर्वम् ॥ तस्मात्किरातनृपतेर्बहुमानमवाप्य रसकर्मरतः । रसहृदयाख्यं तन्त्रं विरचितवान् भिक्षुगोविन्दः' इति । एतेन रसहृदयतन्त्रकर्ता गोविन्दभिक्षुः चन्द्रवंशीयहैहयकुलोत्पन्नकिरातदेशाधिपश्रीमदननृपतेर्लब्धबहुमान आसीदिति प्रतीयते । श्रीमदनदेवोऽपि स्वयं रसकर्मणि सिद्धः, गोविन्दभिक्षुश्च रसकर्मरत आसीदिति च ज्ञायते । कोऽयं हैहयकुलोत्पन्नः श्रीमदनराजः ? हैहयकुलोत्पन्नानां राज्ञां वंशावली 'कुनिंग्हाम' इत्येतैः Archealogical Survey Reports, Vol. XVII p. 78.

---

१ तथाहि रससारे,–"मोढज्ञात्यां समुत्पन्न आचार्यसहदेवकः । तदुत्पन्नस्तु यः सूनुः सुरादित्यः कृतिर्भुवि ॥ तत्संभवः सुतः ख्यातो गोविन्दः शिववन्दकः । शिष्यः श्रीधीरदेवस्य रसकर्मसु कोविदः ॥ अनुभूयेदमखिलं शास्त्रं तेन विनिर्मितम् । कृपया धातुवादिनां दीनत्वस्य विनाशनम् ॥ अन्तर्वेदीसमुत्पन्नो ज्ञात्वा सारस्वतो द्विजः । अभयपालपुत्रोऽसौ धीरदेवो हि वादिराट्—" इत्यादि ।

२ नित्यनाथसिद्धोऽपि स्वकृतस्य रसरत्नाकरस्य वादिखण्डे 'बाणासुरो, **मुनिश्रेष्ठो गोविन्दः**, कपिलो, बली' इति श्लोके गोविन्दाचार्यं मुनिश्रेष्ठ इति समुल्लिखति । रसेन्द्रचूडामणिकृत्सोमदेवोऽपि इममेव श्लोकं पठति । सोमदेवस्तु नित्यनाथात् प्राचीनतरः ।

इत्यत्र दत्ता । अस्यां कामदेवो नामराजा ख्रिस्तादष्टमे शतके राज्यारूढ आसीदिति लिखितम् । स एव रसहृदयोक्तः श्रीमदनो भवेत्, नाम्नां पर्यायसंभवात्, वंशावल्यां द्वितीयकामदेवादर्शनाच्च । अतोऽपि ख्रिस्तादष्टमे शतक एव रसहृदयकर्ता गोविन्दभिक्षुरासीदिति निश्चीयते[1] ।

अयं गोविन्दभिक्षुः किरातदेशाधिपतेः श्रीमदनदेवाल्लब्धबहुमान आसीदिति प्रतिपादितमेव । किरातदेशस्तु 'तप्तकुण्डं समारभ्य रामक्षेत्रान्तकं शिवे ! । किरातदेशो विज्ञेयो विन्ध्यशैलेऽवतिष्ठते' इति शिवशक्तिसंगमतन्त्रोक्तश्लोकात् विन्ध्याचलसमीपवर्ती देशविशेष इति ज्ञायते । अतो गोविन्दभिक्षुरपि विन्ध्यसमीपवर्तिकिरातदेशनिवासीति प्रतीयते ।

अधुनैतत्तन्त्रविषये किंचिल्लिख्यते । गोविन्दाचार्यात्प्रागपि पतञ्जलिव्याडिनागार्जुनप्रभृतयो बहवो रससिद्धा रसतन्त्रकर्तारश्च प्रादुर्बभूवुरिति ज्ञायते । तै रसविद्या सम्यक्परिणामिता लोकोपकारार्थं प्रकटीकृता चासीत् । उक्तं च गोविन्दाचार्यैः,—"रसवादोऽनन्तगुणो द्रवगोलककल्कभेदेन । कलितः प्रधानसिद्धैर्येर्दृष्टास्ते जयन्ति नराः"—इति । रसहृदयात्प्राचीनान्यपि कानिचित्तन्त्राणि क्वचित्क्वचिदुपलभ्यन्ते । तेषां तन्त्राणां दुर्बोधत्वं अज्ञातपरिभाषायुक्तत्वं च दृष्ट्वाऽस्य तन्त्रस्य गौरवं यथार्थं ज्ञायते । अन्वर्था खल्वियमस्य तन्त्रस्य 'रसहृदयं' इति संज्ञा, तन्त्रस्यास्य रसविद्याया हृदयभूतत्वात्—रहस्यभूतत्वात् । रसराजस्याष्टादश संस्काराः किमर्थं कर्तव्याः, प्रत्येकस्य संस्कारस्य च को हेतुः, इत्यादिकं सविस्तरमत्रैव निरूपितं नेतरत्र । अष्टादशसंस्कारसिद्ध एव रसो देहलोहवेधी भवतीति रसशास्त्रेषु प्रसिद्धमेव । अधुनाऽष्टादशसंस्कारसिद्धः पारदः प्रायेण वैद्यैर्न साध्यते । एतेष्वष्टादशसंस्कारेष्वष्टसंस्काराः "समा द्रव्ये रसायने", शेषा द्रव्यकरण एवो उपयुक्ता इति कैश्चिद्ग्रन्थकर्तृभिः प्रतिपादितं; परं सप्तदशसंस्कारसिद्धो भस्मीभूतः पारद एव रसायनार्थे कृतक्षेत्रीकरणाख्यसंस्कारैः नृभिर्भक्षणीय इति रसार्णवरसहृदयरससारादितन्त्राणामभिप्रायः । अधुना पारदस्य मर्दनादिदीपनान्ता अष्टौ संस्कारा अपि कैश्चिदेव क्रियन्ते, प्रायेण तु हिङ्गुलत ऊर्ध्वपातनाद्गृहीतः कज्जलीकृतो वा रस औषधार्थं दीयते । गन्धकजारणाद्यग्रिमविषयं तु केचिदेव जानन्ति कुर्वन्ति च । अतो रसप्रयोगेभ्यो न यथोक्तफलावाप्तिः । 'गन्धकजारणरहितः संशुद्धोऽपि रसो योगेषु न योज्यः, गदहन्तृत्वशक्त्यनुदयात्' इति आयुर्वेदप्रकाशकर्ता माधवः स्पष्टमेवाह । अतो रसविद्याया रहस्यभूतमिदं रसहृदयाख्यं तन्त्रं प्रथममेव प्रकटीकुर्मः । दैवानुकूल-

---

१ एतदपि गोविन्दभिक्षोः श्रीशङ्कराचार्यसमकालीनत्वे प्रमाणमेव ।

तोऽस्यैवैकस्य रसग्रन्थस्य सांप्रतं टीकोपलभ्यते; टीकायोगाद्ग्रन्थस्य सुगमत्वं जायत इति प्रसिद्धमेव ।

रसहृदयटीकाकारः श्रीचतुर्भुजमिश्रः खण्डेलवालब्राह्मणजातीयः, कुरलसंज्ञ-ककुलोत्पन्नः, हरिहरमिश्रस्य पौत्रः, महेशमिश्रस्य च पुत्र आसीदिति तेन ग्रन्थारम्भ एवोक्तादात्मवृन्तातात्प्रतीयते । खण्डेलवालब्राह्मणानां वसतिः जयपुर-सीकर-बिकानेरप्रभृतिषु स्थलेषु विशेषत उपलभ्यते; अतश्चतुर्भुजमिश्रोऽपि तेषामन्यतमस्थलनिवासी भवेदितित्यनुमीयते ।अयमर्वाचीन इति तदुल्लिखितानेकग्रन्थानां कालतो ज्ञायते । अनेकेषु रसतन्त्रेषु टीकान्वितमिदमेकमेव तन्त्रमुपलभ्यते अतोऽस्याष्टीकायाः परमोपयोगिता महत्वं च । यद्यपीयं टीकाऽनेकस्थलेषु सम्यगर्थावबोधनेऽक्षमा दुर्बोधा च, तथाऽपीयं 'रसतन्त्रीया टीका' इत्येव महनीया । रसतन्त्रेषु गतिमिच्छूनामियं टीका मार्गदर्शिनी स्यात् । अज्ञातविषयेष्वियं यथातथं पन्थानमपि दर्शयेत् । अतः सर्वैरियमादर्तव्या संग्राह्या च ।

ग्रन्थस्यास्य पुस्तकत्रयमुपलब्धम् । एकं पुस्तकं पुण्यपत्तने **डॉ. गर्दे** इति प्रसिद्धिमाप्तस्य वैद्यवर्यस्य सकाशात्, अपरं पुण्यपत्तन एव **देवधर** इत्येतस्य सकाशात्, तृतीयं तु धारवाडग्रामात् प्राप्तम् । एतत्पुस्तकत्रयमवलम्ब्य सन्देहस्थले च तन्त्रान्तराण्यवलोक्य यथामति ग्रन्थसंशोधने कृतो यत्नः, तथापि तन्त्रस्यास्य दुरूहत्वात् भ्रमप्रमादादिवशाच्च जातानि स्खलितानि सुधीभिः संशोधनीयानि । इदं रसहृदयतन्त्रं लुप्तप्रायाया रसविद्याया उद्धाराय प्राचीनरसतन्त्रदिदृक्षूणां वैद्यानामाल्हादाय च भवेदित्याशास्य विरम्यते ।

सोलापुरपत्तनम् । रसशास्त्रसेवकः

काले इत्युपनामको गुरुनाथपुत्रस्त्र्यम्बकः ।

आयुर्वेदीयग्रन्थमाला।

श्रीचतुर्भुजमिश्रविरचितमुग्धावबोधिनीव्याख्यासमुल्लसितम्।

रसहृदयं तन्त्रम्।

प्रथमोऽवबोधः।

जयति स दैन्यगदाकुलमखिलमिदं पश्यतो जगद्यस्य।
हृदयस्थैव गलित्वा जाता रसरूपिणी करुणा ॥ १ ॥

श्रीमन्महागणाधिपतये नमः।

भवभयरक्षणदक्षं नत्वा मुग्धावबोधिनीं तनुते।
रसहृदयसुप्रयुक्तां टीकामृजुभावगामाप्तः ॥ १ ॥
गुणवारिधिकुरलकुले हरिहरमिश्रः प्रतीतमहिमाढ्यः।
तत्पुत्रो भुवि महितो महेश इति नामविख्यातः ॥ २ ॥
तदन्वये भारतिभावसंयुत-
स्तदात्मजः प्रस्तुतवाग्भिरीश्वरः ॥
चतुर्भुजो भावितभावमानसः
स्वलोकजातस्य कुलानुभावतः[1] ॥ ३ ॥
ज्येष्ठोऽभूद्भुवि पारिजातकतरुः खण्डेलवालान्वये
तत्पुत्रः किल नाथवल्लवसुदः प्राणैर्यशोर्थान्वितः।
तत्पुत्रेण च सावरेण पतिना बन्धस्य धर्मार्थिना
गीर्वाणाशु रुगोच्चजेन (?) सततं तेनात्र यत्नः कृतः ॥ ४ ॥

इह शास्त्रारम्भे आचार्यश्रीमद्गोविन्दपादाः शिष्टसमयपरिपालनार्थं शास्त्रस्य देशयतो गुरुपादस्य भगवतो[2] वस्तुनिर्देशरूपं मङ्गलमाचरन्ति-जयतीत्यादि। मङ्गललक्षणं यथा,—"आशीर्नमस्क्रिया वस्तुनिर्देशो मङ्गलं"-इति। वस्तुनिर्देशः पञ्चधा; यथा—"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यं त्रयं ब्रह्मरूपं

---

१ 'कलानुभावतः' इति पाठान्तरम्। २ हरस्येत्यर्थः।

शक्तिरूपं ततो द्वयं-" इति । स हरो जयति सर्वोत्कर्षेण वर्तते । अखिलं जगत् पश्यत इति वस्तुनिर्देशाज्जगद्द्रष्टा । तथा च श्रुतिः,—"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति वेद्यं नच तस्य वेत्ता तमाहुरग्र्यं पुरुषं पुराणम्"—इति । यस्य हृदयस्थैव रसरूपिणी करुणा घृणा जाता प्रादुर्भूता । किंभूत्वा? गलित्वा द्रवित्वा; गलितस्य स्थानाच्च्युतिरिति युक्तम् । एषा हृदयस्थैव । एवाव्ययमन्यस्थाननिषेधवाचि । रसरूपिणीति रसः पारदस्तत्स्वरूपं यस्याः सा । तथाच वाक्यं—"रसो जलं रसो हर्षो रसः शृङ्गारपूर्वकः । स्वाद्वादिषु च निर्यासे पारदेऽपि रसो विषे"—**इत्यनेकार्थः** । सामान्यतस्तद्रूपं द्रवत्वं, विशेषतो रसरूपं सर्वोपकारित्वम् । तथा च वाक्यं **रसरत्नाकरे**-"आजन्मपापकृतनिर्दहनैकवह्निर्दारिद्र्यदुःखगजवारणसिंहरूपः"—इति । किंभूतस्य हरस्य? दैन्यगदाकुलं जगत् संसारं पश्यतः; दैन्यं च गदाश्च तैराकुलं व्याप्तं; दैन्यं दीनभावो दारिद्र्यं, गदा व्याधय इति । अखिलमिति सर्वव्यापिपदम् । यथा **मञ्जर्याम्**—"यस्य रोगस्य यो योगस्तेनैव सह दापयेत् । रसेन्द्रो हरते रोगान्नरकुञ्जरवाजिनाम्"—इति । अन्यन्मतं च,—"रसभस्म विना यत्र कथ्यते संहिताक्रमः । अनुक्तमपि विज्ञेयं तत्र तत्राङ्गशान्तये"—इति ॥ १ ॥

पीताम्बरोऽथ बलिजिन्नागक्षयबहलरागगरुडचरः ।
जयति स हरिरिव हरजो विदलितभवदैन्यदुःखभरः ॥ २ ॥

पीतेत्यादि । अनेन पद्येन कविर्हरजस्य हरेश्च समत्वं सूचयति । स पुराणकविवर्णितो हरजो जयति सर्वोत्कर्षेण वर्तते; हरादीश्वराज्जातो हरजः । स उत्प्रेक्ष्यते—हरिरिव विष्णुरिव । किंभूतो हरिः? पीताम्बरः; पीते अम्बरे वस्त्रे यस्य सः, दुकूलयुग्मत्वात् । पुनः किंभूतो? बलिजित्; बलिं बलिनामानं दैत्यविशेषं जयतीति तथोक्तः । पुनः किंभूतः? नागक्षयेत्यादि; नागानां शेषादीनां क्षयाय नाशाय बहलरागो बहुप्रीतो योऽसौ गरुडः खगेश्वरः तत्र चरति गच्छति तथोक्तः । पुनः किंविशिष्टः? विदलितेत्यादि; विशेषणेन दलितो दूरीकृतो भवस्य संसारस्य दुःखभरो येन सः; दैन्यं दारिद्र्यं, दुःखं व्याधिरूपं, तयोर्भरो बाहुल्यमिति । अधुना हरजं विशेषयति—किं विशिष्टः? पीताम्बरः । पीता-

---

१ हरजविशेषणानि त्वन्यथा विवृतानि टीकाकारेण ! अस्मन्मत्या तु प्रस्तुतग्रन्थविषयमेव गोविन्दपूज्यपादा अत्र प्रतिपादयन्ति । तद्यथा—पीताम्बरो पीतं अम्बरं अभ्रकं येन स तथोक्तः, अभ्रकजीर्ण इत्यर्थः । पुनः किंविशिष्टः? बलिजित् बलिं बलिवसारूपं गन्धकं जयतीति बलिजित्, गन्धकजीर्ण इत्यर्थः । नागेन

म्बरः पूर्वार्थः । कथं युक्तः तमर्थं स्पष्टयति—अनेन सूतराजेनापि चत्वारि वासांसि धृतानि विप्रादिवर्णभेदात् । **रसरत्नाकरे** यथा,—"श्वेतारुणहरिद्राभकृष्णा विप्रादिपारदाः"—इति । ब्राह्मणक्षत्रियवैश्यशूद्राः श्वेतरक्तपीतकृष्णवस्त्रधारिणो ज्ञातव्याः; न त्वेषां स्वरूपमिति । **रसमञ्जर्यां** यथा,—"अन्तः सुनीलो बहिरुज्ज्वलो यो मध्याह्नसूर्यप्रतिमप्रकाशः"—इति । अन्तः स्वरूपं, बहिर्वासांसीति किंवदन्ती । अथेति समुच्चये प्रसादः । अथेति मङ्गलानन्तरारम्भप्रश्नकालस्वाधिकारप्रतिज्ञासमुच्चयेष्विति । पुनः किंविशिष्टः ? बलिजित्; बलीन जयतीति, "बलिश्चर्म जराकृतं" **इत्यनेकार्थः** । पुनः किंविशिष्टः ? ना गक्षये त्यादि; ना पुंस्वरूपः; पुनः किंविशिष्टः ? गम्यतेऽनेनेति गः, पक्षयोर्गः, गक्षये पक्षनाशे सति बहलरागो बहुरागवान् यः स रसः, तेन गरुड इव चार्यते इति । किं ? पारदः पक्षनाशे सति आकाशगमनं ददातीति तात्पर्यार्थः । **रसरत्नाकरे** यथा,—"हतो हन्ति जरामृत्युं मूर्च्छितो व्याधिघातकः । दत्ते च खे गतिं बद्धः कोऽन्यः सूतात् क्रियाकरः"—इति । पुनः किंविशिष्टः ? विदलितेत्यादिः पूर्वार्थः । करुणापरत्वेन दैन्यदुःखहारित्वं सूचयति ॥ २ ॥

मूर्च्छित्वा हरति रुजं, बन्धनमनुभूय मुक्तिदो भवति ।
अमरीकरोति सुमृतः कोऽन्यः करुणापरस्तस्मात् ॥ ३ ॥

यः पूर्वविशिष्टो हरजस्तस्मादन्यः करुणापरो दयावान् कः ? न कोऽपि, यतो रुजं शरीरव्यथां हरति । किंभूत्वा ? मूर्च्छित्वा मूर्च्छितो भूत्वा । मूर्च्छितलक्षणं **रसरत्नाकरे,**—"कज्जलाभो यदा सूतो विहाय घनचापलम् । दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितः सूतराड्बुधैः"—इति । पुनर्बन्धनमनुभूय धृत्वा मुक्तिदो भवति मुक्तिं ददातीति । मुक्तिश्चतुर्धा वर्णिता, सालोक्यसारूप्यसामीप्यसायुज्यभेदात् । बन्धनं च मुख्यतया द्विविधं, अवान्तरव्यापारेण च चतुर्विधम् । अधुना द्विविधबन्धनोद्देशः—निर्बीजबद्धो बीजबद्धश्च । निर्बीजबद्धो यथा **रसमञ्जर्यां**—"रसस्तु पादांशसुवर्णजीर्णः पिष्टीकृतो गन्धकयोगतश्च । तुल्यांशगन्धैः पुटितः क्रमेण निर्बीजनामाऽखिलरोगहर्ता"—इति । पुनर्बीजबद्धो यथा—"बीजीकृतैरभ्रकसत्वहेमतारार्ककान्तैः सह साधितो यः । युतस्ततः षड्गुण-

---

क्षयो यस्य सः नागक्षयः, सीसेन मारित इत्यर्थः, तेन बहलरागवान् बहुरक्तो यो गरुडो नाम सुवर्णं, तच्चरतीति तथोक्तः । नागमारितरक्तहेमजीर्ण इत्यर्थः । शेषं यथार्थमेव । अभ्रकगन्धकहेमजीर्णः पारदो भवदैन्यं रोगपीडां च हरतीति भावः । उक्तं च,—"अजारयन्तः पविहेमगन्धं वाञ्छन्ति सूतात्फलमप्युदारम् ॥ क्षेत्रादनुप्तादिव शस्यजातं कृषीवलास्ते भिषजश्च मन्दाः"—इति । तस्मात्तथाजीर्णः पारद एवोदारफलदायी भवेदित्यर्थः । संपादकः ।

गन्धचूर्णैः स बीजबद्धोऽप्यधिकप्रभावः"—इति । अवान्तरचतुर्विधबन्धोद्देशो यथा—"पोटः खोटो जलौका च भस्मत्वं च चतुर्विधम् । बन्धश्चतुर्विधः सूते विज्ञेयो भिषगुत्तमैः"—इति । तल्लक्षणं(रस)**संकेतकलिकायां**,—"पोटः पर्पटिकाबन्धः पिष्टीस्तम्भस्तु खोटकः । ध्मातो द्रुतो भवेत्खोटस्त्वाहतश्चूर्णतां व्रजेत् ॥ पुनर्ध्मातो द्रुतः खोट इति खोटस्य लक्षणम् । जलौका पाटबन्धश्च भस्म भस्मनिभं भवेत्"–इति । पुनः सुमृतः सन् अमरीकरोतीति । सुमृत इति 'सुः' इति पूजायां, यथा **विदग्धमुखमण्डनबहिर्लापिकायां**—"पूजायां किं पदं प्रोक्तमस्तनं को बिभर्त्युरः । क आयुधतया ख्यातः प्रलम्बासुरविद्विषः ॥ सुनासीरः"—इति पूज्यः । मृत इति विशेषार्थः । मृतो यथा,—"आर्द्रत्वं च घनत्वं च चापल्यं गुरुतैजसम् । यस्यैतानि न विद्यन्ते तं विद्यान्मृतसूतकम्"–इति । पूज्य इति **रसेन्द्रमङ्गले** यथा—"अबद्धसूतं तु हतं प्रमादात् करोति कष्टं प्रबलं रसेन्द्रः"—इति । मूर्च्छनादिबन्धनपरंपरया यो मृतः स पूज्यो नान्यथा । यथा च **रसमञ्जर्यां**,—"अजीर्णं चाप्यबीजं च सूतकं यस्तु घातयेत् । ब्रह्महा स दुराचारी मम द्रोही महेश्वरि"—इति युक्तोऽयमर्थः । करुणापरत्वं सतां स्वभाव इति । यथा,—"छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य–" इति ॥ ३ ॥

सुरगुरुगोद्विजहिंसापापकलापोद्भवं किलासाध्यम् ।
तदपि च शमयति यस्मात्कोन्यस्तस्मात्पवित्रतरः ॥ ४ ॥

सुरेत्यादि । तस्मात् सूतराजात्, अन्यो द्वितीयः, पवित्रतर अतिशयेन पवित्रः कः किल श्रूयते ? न कोऽपि । यस्माद्धेतोः, अपीति निश्चयेन, असाध्यं रुजं शमयति; सर्वरूपान्वितमसाध्यं, दिव्यौषधिभिरपि कर्मविपाकेनाऽपि साध्यते; तच्च किंविशिष्टमसाध्यं ? सुरेत्यादि; सुराश्च गुरवश्च गावश्च द्विजाश्च तेषां या हिंसा हननं अवमाननं वा तदुत्पन्नो यः पापकलापो दुष्कृतपटल एतस्मादुद्भवतीति॥४॥

तस्य स्वयं हि स्फुरति प्रादुर्भावः स शाङ्करः कोऽपि ।
कथमन्यथा हि शमयति विलसन्मात्राच्च पापरुजम् ॥५॥

तस्येत्यादि । कविनाऽनेनानुमानेन लोकप्रतीतः क्रियते । यः पूर्वोक्तः सूतराजः तस्य कोऽप्यनिर्वचनीयः सर्वदेशीयत्वेन, शाङ्करः प्रादुर्भावः शमयतीति दुःखमुपशमयतीति शं प्रसादः, शं करोतीति शङ्करः, तस्यायं शाङ्करः, दुःखोपशमायायं प्रादुर्भवतीति तात्पर्यार्थः । दुःखमाधिव्याध्यात्मकेन द्विविधं, पुनराधिभौतिकाधिदैविकाध्यात्मिकभेदाच्च त्रिविधम् । स पुनरस्य सूतराजस्य स्वयं स्फुरति प्रकाशत इति। अन्यथा अन्यप्रकारेण शाङ्करप्रादुर्भावं विना पापरुजं कुष्ठं सुरगुरुगोद्विजहिंसा-

पापकलापोद्भवं कथं शमयति । कुतः? विलसन्मात्रात् दृष्टिगोचरत्वात् । **रसेन्द्रमङ्गले** यथा,—"शताश्वमेधेन कृतेन पुण्यं गोकोटिदानेन गजेन्द्रकोटिभिः । सुवर्णभूदानसमानधर्मं नरो लभेत् सूतकदर्शनेन"—इति ॥ ५ ॥

रसबन्धश्च स धन्यः प्रारम्भे यस्य सततमिव करुणा ।
सिद्धे रसे करिष्ये महीमहं निर्जरामरणम् ॥ ६ ॥

मूर्च्छितबद्धमृतस्यावस्थया त्रिविधं सूतराजस्य बन्धनं प्रशंसति कविः–रसेत्यादि । भो जनाः ! रसबन्धः पारदबन्धनं धन्यः, यस्य प्रारम्भे सततं निरन्तरं करुणा जायत इति शेषः । किंरूपा ? अहं गोविन्दनामा, रसे सिद्धे सति सम्यग्बन्धनत्वं प्राप्ते सति, महीं मेदिनीं, निर्जरामरणं यथा तथा करिष्ये । अतिसामीप्याद्वर्तमान एव लृट् । निर्जरामरणमिति क्रियाविशेषणम् । जरा पालित्यं, मरणं प्राणत्यागः, आभ्यां रहितं, यथा मह्यां जरामरणं न युक्तम् । अत्र महीपदेन महीमधिकृत्य निवसन्ति ये मनुजादयस्त एव, लक्षणावृत्तित्वात् । पुना रसायनवशाज्जरानिषेधो भवेदिति युक्तम् । **हितोपदेशे** यथा,—"यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम् । आद्ये वयसि मध्ये वा शुद्धकायः समाचरेत्"—इति । मरणनिषेधः कथमौषधेन ? अन्यौषधिशक्तिह्रासतो न युक्तः रसेश्वरशक्त्याधिक्याद्युक्तः । **रसरत्नाकरे** यथा,—"मृत्योर्जराविषधरस्य च वैनतेय तुभ्यं नमामि सुरवन्दितसूतराज !"—इति ॥ ६ ॥

ये चात्यक्तशरीरा हरगौरीसृष्टिजां तनुं प्राप्ताः[१] ।
वन्द्यास्ते रससिद्धा मन्त्रगणाः[२] किंकरा येषाम् ॥ ७ ॥

जरामरणनिषेधत्वेन किमाधिक्यं तदाह—य इत्यादि । ये एवंविधरससिद्धास्ते वन्द्या अभिवादनयोग्याः स्तुत्याश्च । 'वदि' अभिवादनस्तुत्योः । किंविशिष्टा ? अत्यक्तशरीराः; न त्यक्तं शरीरं यैस्ते जीवन्मुक्ता इत्यर्थः । शरीरं द्विविधं—स्थूलसूक्ष्मभेदात् ; पृथिव्यप्तेजोवाय्वाकाशात्मकं स्थूलं, कोशत्रयात्मकं सूक्ष्मम् । यथा सूत्रं,—विज्ञानमयं मनोमयं प्राणमयमेतत्कोशत्रयं मिलितं सूक्ष्मशरीरमुत्पद्यते । अन्ये जीव एव सूक्ष्मशरीरम् । अत्यक्तशरीररससिद्धाश्च उच्यन्ते, "मन्थानभैरवो योगी सिद्धबुद्धश्च कन्थडी । कोरण्टकः सुरानन्दः सिद्धपादश्च चर्पटी[३] ॥ कणेरी पूज्यपादश्च नित्यनाथो निरञ्जनः । कपाली बिन्दुनाथश्च काकचण्डीश्वरो गजः ॥ अल्लमः प्रभुदेवश्च

---

१ '°जान्तरं प्राप्ताः' इति रसेश्वरदर्शनपाठः । २ 'मन्त्रगणः किंकरो येषां' इति रसेश्वरदर्शने पाठः । ३ पर्पटी ।

घोडाचोली च ठिण्ठिनी । भालुकिर्नागदेवश्च खण्डी[1] कापालिकस्तथा ॥ इत्यादयो महासिद्धा रसभोगप्रसादतः । खण्डयित्वा कालदण्डं त्रिलोक्यां विचरन्ति ते"—इति । पुनः किंविशिष्टाः? तनुं प्राप्ताः; शरीरं ग्रहीतारः । किंविशिष्टां तनुं? हरगौरीसृष्टिजां; हरो महादेवः, गौरी पार्वती, तयोः सृष्टिः सर्जनं मैथुनसंयोगः, तज्जाता पुत्रा एवेत्यर्थः[2] । पुनर्येषां मन्त्रगणाः किङ्कराः मन्त्रसमूहा आज्ञाकरा इत्यर्थः ॥ ७ ॥

सुकृतफलं तावदिदं सुकुले यज्जन्म धीः स्वतन्त्राऽपि ।
साऽपि च सकलमहीतलतुलनफला[3] भूतलं च सुविधेयम् ॥ ८ ॥

तावदिति साकल्ये, यावत्तावदित्येतौ साकल्यावधिमानावधारणेष्विति प्रसादतः । इदं सुकृतफलं सुविहितकर्मफलं; इदं कियत्? सुकुले शुभान्वये जन्म, स्वतन्त्रा धीः स्वाधीनबुद्धिरित्यर्थः । अपीति निश्चयेन । सा बुद्धिः सकलमहीतलतुलनफला सकलस्य निरवशेषस्य महीतलस्य तुलनं फलं यस्याः सा तथोक्ता । तुलनमिति तुलया स्वतन्त्रबुद्धिरूपया सकलमहीतलस्य तुलनं भवत्येवेति युक्तं, किमाकारा? कियन्माना? कैः श्रिता? कैर्धृता च भूरिति ज्योतिषसिद्धान्तविधानाद्दृष्टान्ता भूर्बुद्ध्योपलक्ष्यते । पुनः सुकुलजन्मस्वतन्त्रबुद्धिभ्यां भूतलं सुविधेयं पूज्यं ज्ञातव्यम् । एकदेशग्रहणात्सर्वं ग्राह्यं, महान्तस्तोका भूतलं बहु, ईदृशा महान्तो यत्र तिष्ठन्ति तत्स्थानं पूज्यं वेत्तुमशक्यत्वात् सर्वमिति ॥ ८ ॥

भूतलविधेयतायाः फलमर्थास्ते च विविधभोगफलाः ।
भोगाः सन्ति शरीरे, तदनित्यमहो वृथा सकलम् ॥ ९ ॥

सुकुलजन्मसंबन्धो व्याख्यायते–भूतलेत्यादि । भूतलविधेयतायाः भूतले पृथिवीमण्डले या विधेयता सर्वकर्मप्रवीणता तस्याः, अर्थाः कार्याणि, कथं भूताः? विविधभोगफलाः विविधाश्च ते भोगाश्च विविधभोगाः नानाभोगाः फलं येषां ते तथोक्ताः । ते फलं फलरूपाः । भोगाः शरीरे सन्ति भवन्ति । कुतः? यतो

---

१ 'खण्डः' इति पाठान्तरम् ।

२ अस्यार्थष्टीकाकारेणान्यथा विवृतः । हरगौरीसृष्टिजामिति हरसृष्टिः पारदः, गौरीसृष्टिः अभ्रकं, तयोः संयोगजां तनुं प्राप्ता इत्यर्थः । रसेश्वरदर्शने माधवाचार्यैरस्यार्थ एवमेव गृहीतः । यथा,—"षाट्कौशिकस्य शरीरस्यानित्यत्वेऽपि रसाभ्रकपदाभिलप्यहरगौरीसृष्टिजातस्य नित्यत्वोपपत्तेः । तथाच रसहृदये,—"ये चात्यक्तशरीरा इत्यादि" । संपादकः ।

३ 'तुलनकला' इति पाठे तुलने कला सामर्थ्यवतीत्यर्थः । संपादकः ।

वेदान्तसूत्रं—प्रारब्धकर्मफलभोगायतनं शरीरमिति । अत एव भोगानामाश्रयः शरीरम् । अहो इति कष्टे आश्चर्ये वा । एतच्छरीरं तु सर्वोत्कृष्टमिति तात्पर्यार्थः, "सा मुक्तिः पिण्डपातने"—इति वचनात् ॥ ९ ॥

इति धनशरीरभोगान् मत्वाऽनित्यान् सदैव यतनीयम् ।
मुक्तिस्तस्य[1] ज्ञानात्, तच्चाभ्यासात्, स च स्थिरे देहे ॥ १० ॥

सर्वसाधनं शरीरं मत्वाऽभिमतं दिशति—भो जनाः ! सदा सर्वस्मिन् काले अहर्निशं यतनीयम् । किं कृत्वा? धनशरीरभोगान् अनित्यान् नश्वरान् मत्वा यतनीयमिति । किं ? यथा शरीरं नित्यस्थायि भवति, शरीरे नित्ये सर्वं नित्यमित्यर्थः । तस्य शरीरस्य नित्यस्य ज्ञानात् सर्वोत्कृष्टेनानेनैव शरीरं नित्यं भवेदित्यवबोधात्, तस्यैवाभ्यासाच्च मुक्तिर्भवति । क्व सति ? स्थिरे देहे सति । मनसो धर्मैः शरीराश्रितैः षड्विकारैश्च देहास्थिरत्वं, एतन्निषेधत्वं देहस्थिरत्वं मोक्षः । तदेवाह रामं प्रति गुरोर्वचनं,—"न मोक्षो नभसः पृष्ठे न पाताले न भूतले । सर्वाशासंक्षयश्चेतःशमो मोक्ष इतीक्ष्यते"—इति ॥ १० ॥

तत्स्थैर्येण[2] समर्थं रसायनं किमपि सूतलोहादि ।
स्वयमस्थिरस्वभावं दाह्यं क्लेद्यं च शोष्यं च ॥ ११ ॥

तस्य देहस्य स्थैर्येण स्थिरभावेन कृत्वा रसायनं जराव्याधिनाशनं प्रति समर्थं कारकतरम् । अपीति निश्चयेन । किं ? सूतलोहादि; सूतः पारदः; लोहाः स्वर्णादयो नवकाः कृत्रिमाकृत्रिमभेदयुक्ताः, राजरीतिखर्परघोषाः कृत्रिमाः, स्वर्णतारताम्रनागवङ्गलोहा अकृत्रिमाः, आदिशब्दान्महारसा उपरसाश्च ज्ञातव्याः । के ते इमे ? **रसावतारे** यथा—"हिङ्गूलताप्यविमलाचलसस्यकान्तवैकान्तपक्षिपतयश्च महारसाः स्युः ॥ सौवीरगन्धकशिलालविरङ्गधातुकासीसकांक्ष्युपरसाः कथिता रसज्ञैः"–इति । अथवा स्थैर्येण समर्थं तत् देहं प्रति रसायनं; किं ? सूतलोहादि । सूते यदभिव्याप्तं ग्रासमानेन लोहादि तत्तथोक्तं, सूते इति अभि-

---

१ 'मुक्तौ; सा च ज्ञानात्' इति तु रसेश्वरदर्शनपाठः, स एव सम्यग्वर्तते । 'मुक्तौ यतनीयं, सा च मुक्तिः ज्ञानात्' इत्यन्वयः । टीकाकारस्य पाठो न विशुद्धः ।

२ 'तत्स्थैर्ये न समर्थं रसायनं किमपि मूललोहादि'—इति साधुः पाठः । तत्स्थैर्ये तस्य शरीरस्य स्थैर्ये मूललोहादि इतरत् रसायनं न समर्थं; कस्माद्धेतोः ? स्वयं अस्थिरस्वभावत्वात्; सर्वमपि दाह्यं छेद्यं शोष्यं च स्यात्; स्वयं अस्थिरस्वभावं रसायनं कथं देहं स्थिरीकुर्यादित्याशयः । तर्हि किं रसायनं तत्स्थैर्ये समर्थं इत्याशङ्कायां वदत्यग्रे,—'एकोऽसौ रसराजः शरीरमजरामरं कुरुते'—इति । संपादकः ।

व्यापके । अधिकरणे सप्तमी । तद्देहं स्वयमस्थिरं अस्थिरीभावस्वभावं, पुनर्दाह्यं दग्धुं शक्यं, पुनः क्लेद्यं आर्द्रीभावेन शीर्णयितुं शक्यं, पुनः शोष्यं शोषयितुं शक्यं, अग्निजलानिलैः दाह्यं क्लेद्यं शोष्यं च शरीरमित्यर्थः । सूतलोहादिना देहमनित्यं नित्यं भवेत्, अयमेव यत्न इति तात्पर्यार्थः ॥ ११ ॥

काष्ठौषध्यो नागे नागं वङ्गेऽथ वङ्गमपि शुल्बे ।
शुल्बं तारे तारं कनके कनकं च लीयते सूते ॥ १२ ॥

पूर्वश्लोके सूतलोहादिकमुक्तं, तत्राधिव्यापकाधिकरणस्य क्रमं दर्शयति—काष्ठौषध्य इत्यादि । काष्ठौषध्यः कुमारिकादयः नागे लीयन्ते, तन्नागं वङ्गे लीयते, तद्वङ्गमपि शुल्बे ताम्रे लीयते, तच्छुल्बं तारे लीयते, तत्तारं रूप्यं कनके सुवर्णे लीयते, तत्कनकं सूते पारदे लीयते इति । कथं लीयते? विधानत एकैकेन युक्तं समुदायेनापि च । धातूनामरिवर्गत्वान्महारसोपरसानामपि योगः, अपिशब्दाश्च ॥ १२ ॥

परमात्मनीव नियतं भवति लयो यत्र सर्वसत्वानाम् ।
एकोऽसौ रसराजः शरीरमजरामरं कुरुते ॥ १३ ॥

समुदायत्वेनोपवर्णयति—परमात्मनीत्यादि । असौ एको धात्वाद्यन्तर्भूतो रसराजः शरीरमजरामरं जरामरणवर्जितं कुरुते । रसैर्महारसोपरसैरन्तर्भूतो राजते शोभते वा प्रकाशते इति रसराजः; अथवा रसेषु महारसोपरसेषु अनादरीभूतेषु सत्सु राजत इति विशेषार्थः । तथा च सूत्रं,—"षष्ठीसप्तम्यौ चानादरे" इति; अथवा रसानां महारसोपरसधातूनां राजा तेषु मुख्यत्वेनोपदिष्टः, मुख्यत्वेनास्य ग्रहणमित्युपलक्षणम् । अनेनैव सर्वसंग्रहणं ज्ञातव्यम् । इवेति सादृश्ये । आत्मनि ब्रह्मणि, नियतं निश्चितं, सर्वसत्वानां सकलजीवानां, लयो भवति, लयोऽन्तर्भावः; वा तस्मिन्सर्वे सत्वा लीना एव तिष्ठन्तीत्यात्मनः तटस्थस्वरूपतैतल्लक्षणद्वयमुक्तम् । तथा रसराजेऽपि दर्शयति—काष्ठौषधीधातुमहारसोपरसादीनां लयो ज्ञेयः तटस्थलक्षणेन; लयस्य क्रम उपदिष्टः । स्वरूपलक्षणेनौषधीधातुमहारसोपरसादयः पृथक्त्वेन स्थिता अपि गुणैरन्तर्भूता एव ज्ञातव्याः । यतः सर्वेषां गुणान्तर्भूतः सूतस्ततोऽनन्तगुण आचार्यैरुपवर्णितः । लयविशेषादुभयोः साम्यमिति रहस्यम् ॥ १३ ॥

अमृतत्वं हि भजन्ते हरमूर्तौ योगिनो यथा लीनाः ।
तद्वत्कवलितगगने रसराजे हेमलोहाद्याः ॥ १४ ॥

सर्वं समीकर्तुमाह—अमृतत्वमित्यादि । ते स्वात्मना आत्मना सह योगकर्तृका योगिनो यथा हरमूर्तौ महादेवशरीरे लीनाः सन्तः अमृतत्वं भजन्ते मुक्तत्वं

प्राप्नुवन्ति । "मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्"-इत्यमरः । तद्वत्तेनैव प्रकारेण, रसराजे पारदे, कवलितगगने ग्रासीकृताभ्रके सति हेमलोहाद्या लीनाः सन्त अमृतत्वं पीयूषभावं भजन्ते अमरीकरणयोग्या भवन्ति । हेम च लोहश्च हेमलोहौ, आद्यौ येषां; वा हेमसंज्ञको लोह आद्यो येषां ते तथोक्ताः । अभ्रके कवलिते सति चारणा स्यान्नान्यथेति ॥ १४ ॥

स्थिरदेहो[1]ऽभ्यासवशात्प्राप्य ज्ञानं गुणाष्टकोपेतम् ।
प्राप्नोति ब्रह्मपदं पुनर्भवावासदुःखे न[2] ॥ १५ ॥

अधुना स्थिरदेहस्य फलं व्यनक्ति-स्थिरेत्यादि । पूर्वोक्तस्यैव रसराजस्याभ्यासात्सेवनाद्धेतोः स्थिरदेहः पुमान् ब्रह्मपदं प्राप्नोति । ब्रह्मपदं परमानन्दस्वरूपम् । किंकृत्वा ? ज्ञानं प्राप्य । कीदृशं ज्ञानं ? गुणाष्टकोपेतं अणिमाद्यष्टसिद्ध्युपेतम् । कथं ब्रह्मपदं प्राप्नोति ? यथा पुनरप्रथमं भवावासदुःखे संसारनिवासनतापत्रयात्मककष्टे न पततीत्यर्थः । ज्ञानं प्राप्य ब्रह्मपदं प्राप्नोति । कथं? ऋते ज्ञानान्न मुक्तिरिति । अन्यच्च "किं मोक्षतरोर्बीजं ? सम्यग्ज्ञानं क्रियासहितं" इति **प्रश्नोत्तररत्नमालायाम्** ॥ १५ ॥

एकांशेन जगन्ति[3] च विष्टभ्यावस्थितं परं ज्योतिः ।
पादैस्त्रिभिस्तदमृतं सुलभं[4] न विरक्तिमात्रेण ॥ १६ ॥

ज्ञानगम्यं ब्रह्मोपवर्णयति-एकांशेनेत्यादि । किंविशिष्टं ब्रह्म? परं ज्योतिः प्रकाशस्वरूपं; तत्परं ज्योतिर्जगन्ति संसाराणि स्वर्गमृत्युपातालादीनि विष्टभ्य व्याप्य स्थितं; केन ? एकांशेन, अनेकब्रह्माण्डनायकत्वात्, एकैकस्मिन् ब्रह्माण्डे बहूनि संसाराणि वर्तन्ते अत एकांशेनेत्युक्तं; पुनस्तत्परं ज्योतीरूपममृतं त्रिभिः पादैः अभ्यास-स्थिरदेह-ज्ञानसंज्ञकैः सुलभं सुखेन लभ्यमित्यर्थः । प्रथममभ्यासोऽमृतसुलभत्वे हेतुरेकः, स्थिरदेहश्च द्वितीयो हेतुः, ज्ञानं तृतीयहेतुर्मोक्षे यथा[5]वाक्यं; न विरक्तिमात्रम् ॥ १६ ॥

नहि देहेन कथंचिद्व्याधिजरामरणदुःखविधुरेण ।
क्षणभङ्गुरेण सूक्ष्मं तद्ब्रह्मोपासितुं शक्यम् ॥ १७ ॥

पूर्वापराभ्यासभ्यासज्ञानाभ्यां स्थिरदेहो हेतुर्गरीयानिति सूचयन्नाह-नेत्यादि । उभयोः साधकत्वात् तादृशदेहव्यतिरिक्तदेहेन कथंचिदपि किंचिन्न सिद्ध्य-

---

१ 'स्थिरदेहं' इति र. र. स. पाठः । २ 'न पुनर्भववासदुःखानि' इत्यपि पाठः । ३ 'जगदघगपदवष्टभ्य' इति र. र. स. पाठः । ४ 'सुलभेन' इति पाठान्तरम् । ५ 'यथावाक्यं प्रश्नोत्तरे । "किं सौख्यं सर्वसंगविरतिर्या" इति' पाठान्तरम् ।

तीत्यर्थः । किंविशिष्टेन ? व्याधिजरामरणदुःखविधुरेण; व्याधिरामयः, जरा पालित्यं, मरणं प्राणत्यागः, दुःखं मोहशोकादिकं, एतैर्विधुरं ताडितं, 'व्यध' ताडने इत्यस्य धातो रूपं, विधुरं उरप्रत्ययान्तम् । पुनः किंविशिष्टेन ? क्षण-भङ्गुरेण क्षणविनाशिना देहेन तद्ब्रह्म चिद्घनानन्दस्वरूपमुपसितुं सेवितुं कथं केन प्रकारेण शक्यं ?; कुतः ? यतः सूक्ष्मं, इन्द्रियाग्राह्यत्वात् ॥ १७ ॥

नामापि देहसिद्धेः[1] को गृह्णीयाद्विना शरीरेण ।
यद्योगगम्यम[2]मलं मनसोऽपि न गोचरं तत्त्वम् ॥ १८ ॥

सर्वोपायेन शरीरं स्थिरं कार्यमित्याह—नामेत्यादि । देहसिद्धेः शरीरविभूतेः नामाप्यभिधानमपि को गृह्णीयान्न कोऽपीत्यर्थः । केन विना ? शरीरेण शरीर-मन्तरेण; सिद्धिरस्तु परं तन्नाम केनापि न गृह्यते; शरीर(सिद्धि)सिद्धौ नामग्रहण-मिति तात्पर्यार्थः । अनश्वरं शरीरं भवतु चेत्तदमलं निरञ्जनं तत्त्वं ब्रह्मावश्यं प्राप्यते । तत्तत्त्वं मनसोऽपि न गोचरं चित्तेनापि न गम्यमित्यर्थः । तर्हि केन गम्यं ? उभयोर्मेलनमेकीकरणं योगः, तेनैव प्रकृतिपुरुषयोरेकीकरणेने-त्यर्थः ॥ १८ ॥

यज्ञाद्दानात्तपसो वेदाध्ययनाद्दमात्सदाचारात् ।
अत्यन्तं[3] श्रेयः किल, योगवशादात्मसंवित्तिः ॥ १९ ॥

अधुना योगस्य सर्वकर्मभ्य उत्कृष्टत्वं दर्शयति—यज्ञादित्यादि । अत्यन्तं श्रेय इति अधिकतरकल्याणं सर्वोपद्रवनिवारणात्मकं, भवेदित्यध्याहारः । कुतः ? यज्ञादश्वमेधादेः; न केवलं यज्ञात्, पुनर्दानात् धनस्यार्पणात्पात्रेषु; पुनस्तपसः कृच्छ्रातिकृच्छ्रचान्द्रायणपञ्चाग्नितपनादेः; पुनर्वेदाध्ययनात् वेदानां ऋग्यजुः-सामाथर्वणां अध्ययनं पाठक्रमस्ततः; पुनर्दमात् वेदान्तानुसारेण दमस्तावत् बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो मनसा निवर्तनं, तद्व्यतिरिक्तं श्रवणादिव्य-तिरिक्तं ततः; पुनः सदाचारात् ब्राह्ममुहूर्तमारभ्य प्रातःसंगवमध्याह्नापराह्ण-सायाह्नादिषु शयनपर्यन्तं वेदबोधितो विधिः सदाचारस्ततः; इति समुदायः श्रेयस्करो नात्मसंवित्तिकरः; पुनरात्मसंवित्तिः ब्रह्मवेदनं योगवशादेव स्यात्; योगः पूर्वमुक्तः ॥ १९ ॥

गलितानल्पविकल्पः सर्वार्थविवर्जितश्चिदानन्दः ।
स्फुरितोऽप्यस्फुरिततनोः करोति किं जन्तुवर्गस्य ॥ २० ॥

---

१ 'योगसिद्धेः' इति र. र. स. पाठः । २ 'यद्योगिगम्यं' इति र. र. स. पाठः । ३ 'अत्यन्तभूयसी किल' इति र. र. स. पाठः ।

यस्य जीवस्य योगवशात्संवित्तिर्जाता स कीदृश इत्याह–गलितेत्यादि । गलितानल्पविकल्प इति गलितो दूरीभूतो अनल्पो बहुतरो विकल्पो मिथ्याज्ञानं यस्य; ईदृक् स्यात् । पुनः कीदृक्? सर्वार्थविवर्जितः, सर्वे च ते अर्थाश्च तैर्विवर्जितः सम्यग्रहितो भवति; कार्याणां स्मरणकरणयोरभाव इत्यर्थः । पुनः कथंभूतः? चिदानन्दः चिदा प्रकाशेन आनन्दः सुखसंपत्तिर्यस्य स तथोक्तः । प्रकाशहेतुना आनन्दता भवेत्, जडहेतुना तद्विपर्ययः । ईदृक् सः, स्फुरितोऽपि प्रकाशमानोऽपि, अस्फुरिततनोर्जन्तुवर्गस्य अप्रकाशशरीरस्य जीवसमूहस्य किं करोति पृच्छां करोति[1] । 'किमिति पृच्छाजुगुप्सयोः' इति प्रसादः । "पृच्छति च हसति च रोदिति प्रमत्तवन्मानवोऽपि तल्लीनः"–इति ॥ २० ॥

भ्रूयुगमध्यगतं यच्छिखिविद्युन्निर्मलं[2] जगद्भासि ।
केषांचित्पुण्यकृतामुन्मीलति[3] चिन्मयं ज्योतिः ॥ २१ ॥

आत्मसंवित्तेर्विरलत्वं सूचयन्नाह–भ्रूयुगेत्यादि । यत् भ्रूयुगमध्यगतं भ्रूद्वयान्तर्गतं सत् प्रकाशते, तत्र दृष्टिं निधाय योगिनः पश्यन्ति खेचर्या मुद्रया; **हठप्रदीपिकायां** पद्यं,–"कपालकुहरे जिह्वा प्रविष्टा विपरीतगा । भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी"–इति । पुनः शिखिविद्युत्सु वह्निसौदामिनीषु निर्मलं सत् यत्प्रकाशते; पुनर्यत् जगद्भासि जगत् संसारं प्रकाशते; तत् चिन्मयं प्रकाशप्रचुरं ज्योतिः केषांचित्पुण्यकृतां सुविहितकर्मकर्तॄणां उन्मीलति प्रादुर्भवति, न तु सर्वेषां; यतो निर्मलं प्रकाशं ध्यात्वा विपुलपुण्येन निर्मलत्वाय जायते, अतः प्रकाशो युक्तः ॥ २१ ॥

परमानन्दैकमयं परमं ज्योतिःस्वभावमविकल्पम् ।
विगलितसर्वक्लेशं ज्ञेयं शान्तं स्वयंवेद्यम्[4] ॥ २२ ॥

पूर्ववर्णितं चिन्मयं विशेषयन्नाह–परमानन्दैकमयमित्यादि । तद्ब्रह्म ईदृशं ज्ञेयं–परमानन्दैकमयमिति; परम उत्कृष्टोऽसावानन्दः परमानन्दः, स एव एको अद्वितीयस्तात्प्राचुर्ये यस्मिंस्तथोक्तं; पुनः किंविशिष्टं? परमं ज्योतिःस्वभावं, परमं यज्ज्योतिः तत् स्वभावः स्वरूपं यस्य तत्, अशरीरत्वात्स्वप्रकाशित्वाच्च; पुनः अविकल्पं मिथ्याज्ञानशून्यं; पुनर्विगलितसर्वक्लेशं विगलिता विशेषेण दूरीकृताः सर्वक्लेशाः दुःखानि यस्मात् तत्, सुखरूपत्वात्; पुनः शान्तं शममयं; पुनः स्वयंवेद्यं अन्येन वेदितुमशक्यं आत्मनैव वेद्यं, तस्मान्नापरोऽस्तीति भावात् ॥ २२ ॥

---

१ स्वयं सिद्धो भूत्वा इतरानपि तथा कर्तुं यतत इति भावः । २ 'शिखिविद्युत्सूर्यवज्जगद्भाति' इति र. र. स. पाठः । 'शिखिविद्युत्सूर्यवज्जगद्भासि' इति रसेश्वरदर्शने पाठः । ३ 'पुण्यदृशां' इति रसेश्वरदर्शने पाठः । ४ 'स्वसंवेद्यं' इत्यपि पाठः ।

तस्मिन्नाधाय मनः स्फुरदखिलं चिन्मयं जगत्पश्यन् ।
उत्सन्नकर्मबन्धो ब्रह्मत्वमिहैव चाप्नोति ॥ २३ ॥

ज्ञेयोपदेशमाह–तस्मिन्नित्यादि । तस्मिन्नाधायेति पूर्वनिरूपिते तस्मिन्नेवात्मनि मन आधाय संस्थाप्य पुमान् उत्सन्नकर्मबन्धो भवेत् त्यक्तकर्मपाशः स्यात् । स इहैव जन्मनि ब्रह्मत्वं प्राप्नोतीति विशेषः, "ब्रह्मविद् ब्रह्मैव भवति"–इति श्रुतेः । स पुमान् मन आदधाति । किं कुर्वन् सन्? अखिलं जगत् सर्वसंसारं चिन्मयं प्रकाशस्वरूपं चिद्विकारं पश्यन् अवलोकमानो मनश्चक्षुषा; किंविशिष्टं जगत्? स्फुरत् अध्यारोपापदेशेन देदीप्यमानम् । तथा च भगवद्वचनं, "कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः । स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्"–इति । हे पार्थ स पुमान्मनुष्येषु बुद्धिमान् । अनेन सामान्यत्वमुक्तम् । विशेषश्च यथा–रज्जौ सर्पभ्रमो, यथा शुक्तौ रजतज्ञानं, यथा गन्धर्वनगरं, यथा मरुस्थले वारि; तथैव संसारो नासीत्, नास्ति, न भविष्यतीति अद्वैतवादान्मिथ्यैव ॥ २३ ॥

अस्तं हि यान्ति विषयाः प्राणान्तःकरणसंयोगात् ।
स्फुरणं नेन्द्रियतमसां[1] नातः स्फुरतश्च दुःखसुखे[2] ॥ २४ ॥

उत्सन्नकर्मबन्धस्य विषया अस्तं यान्ति । प्राणान्तःकरणसंयोगात् न इन्द्रियाणां स्फुरणं भवेत् । तथा च न्यायशास्त्रे–आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति; इन्द्रियाणां वस्तुप्राप्यप्रकाशकारित्वनियमादिति । अतो हेतोश्च दुःखसुखे न स्फुरतः । आत्मनः प्रकाशात् प्राणान्तःकरणानां प्रकाशः, प्राणान्तःकरणानि तमेव प्रकाशं प्राप्येन्द्रियाणि प्रकाशयन्ति । अत उभयोः परप्रकाशः । तद्वद्दहनतम अग्राह्यमन्धकारं चिद्भिन्नं प्रकाशेन प्रकाशितं स्यादिति । अभावपदार्थत्वादिन्द्रियतमसोर्जडत्वात्साम्यम् ॥ २४ ॥

रागद्वेषविमुक्ताः सत्याचारा नरा मृषारहिताः ।
सर्वत्र निर्विशेषा भवन्ति चिद्ब्रह्मसंस्पर्शात् ॥ २५ ॥

अधुना अन्तःकरणानां प्रवृत्तिं दर्शयति–रागेत्यादि । चिद्ब्रह्मसंस्पर्शादिति चिद्ब्रह्मणि प्रकाशस्वरूपे आत्मनि यः स्पर्शः तन्निष्ठा, ततो हेतोः पुरुषा रागद्वेषवियुक्ताः स्नेहशत्रुत्वविरहिताः स्युः । पुनः सत्यः आचारः प्रवृत्तिधर्मो येषां ते; पुनर्मृषारहिताः अत्याचाराद्यसत्यवर्जिता इत्यर्थः; पुनः सर्वत्र निर्विशेषाः सर्वस्मिन्मानापमानयोः समाः; तथा च भगवद्वचनं,–"समः शत्रौ च मित्रे च तथा मानापमानयोः"–इत्यादि ॥ २५ ॥

---

१ 'नेन्द्रियमनसां' इत्यपि पाठः । २ ब्रह्मत्वप्राप्तौ विषयनाशः, तन्नाशाच्च न तैः समं इन्द्रियसंबन्धः, तदभावाच्च न सुखदुःखे इति भावः ।

तिष्ठन्त्यणिमादियुता विलसद्देहा मुदा सदानन्दाः ।
ये ब्रह्मभावममृतं संप्राप्ताश्चैव कृतकृत्याः ॥ २६ ॥

आत्मनि स्पर्शत्वमुक्तिप्राप्तिं दर्शयन्नाह–तिष्ठन्तीत्यादि । ये ब्रह्मभावममृतं मुक्तिसारूप्यत्वं प्राप्तास्ते कृतकृत्याः कृतसर्वकार्याः पूर्णतां प्राप्ता इत्यर्थः; पुनस्ते अणिमादियुता अणिमादिभिर्युता इह जगति तिष्ठन्तीति । अणिमादयो यथा,–"अणिमा महिमा चाथ लघिमा गरिमा तथा । प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टभूतयः"–इति । पुनर्विलसद्देहाः तेजःप्रायशरीराः; पुनः सदानन्दाः, केन ? मुदा हर्षेण, सदा सर्वस्मिन्काले आनन्दो येषां ते तथोक्ताः, परमानन्दे मग्नत्वात् ॥ २६ ॥

आयतनं विद्यानां मूलं धर्मार्थकाममोक्षाणाम् ।
श्रेयः परं किमन्यत् शरीरमजरामरं विहायैकम् ॥ २७ ॥

शरीरमूलं सर्वं ज्ञातव्यमित्याह–आयतनमित्यादि । एकं अजरामरं जरामरणवर्जितं शरीरं विहाय त्यक्त्वा अन्यत् परमुत्कृष्टं श्रेयः कल्याणस्वरूपं किं? न किमपीत्यर्थः । किंविशिष्टं शरीरं ? आयतनं विद्यानां व्याकरणादिचतुर्दशसंख्याकाङ्गानां निवासस्थानं; पुनः किंविशिष्टं ? मूलं धर्मार्थकाममोक्षाणां चतुर्णां पदार्थानां मूलं हेतुः; धर्मादयश्चत्वारः प्रतीता एव ॥ २७ ॥

[1]प्रमाणतोऽपि प्रत्यक्षाद्यो न जानाति सूतकम् ।
[2]अनादिविग्रहं देवं कथं ज्ञास्यति चिन्मयम् ॥ २८ ॥

आत्मनोऽपेक्षया सूते सुगमत्वं सूचयन्नाह–प्रमाणत इत्यादि । यः पुरुषः सूतकं रसेन्द्रं न जानाति; कुतः ? प्रमाणतः, प्रमाकरणं प्रमाणं, प्रमितिसाधनं वा, ततः; किंभूतात्प्रमाणतः ? प्रत्यक्षाच्चक्षुरिन्द्रियग्राह्यरूपात्; स पुमान् चिन्मयमतिसूक्ष्ममात्मानं कथं ज्ञास्यति ? न कथमपीत्यर्थः, इन्द्रियागोचरत्वात् । किंविशिष्टं ? अनादिविग्रहं आदिश्च विग्रहं च आदिविग्रहे, ते न विद्येते यत्र सः तं; उत्पत्तिशरीरयोरभावात् स्थूलज्ञानाभाव इति तात्पर्यार्थः ॥ २८ ॥

[3]यज्जरया जर्जरितं कासश्वासादिदुःखवशं[4]माप्तम् ।

---

१ 'प्रत्यक्षेण प्रमाणेन' इति र. र. स. पाठः । २ 'अदृष्टविग्रहं देवं' इति र. र. स. पाठः । ३ अस्या आर्यायाष्टीकाकारकृता टीका न वर्तते । अस्माकं स्पष्टीकरणं त्वेवं–यत् जरया वार्धक्येन जर्जरितं शिथिलीभूतं, कासश्वासादिरोगाणां यत् दुःखं, तस्य वशे प्राप्तमिति तत्तथोक्तं, पुनः किंविशिष्टं ? बुद्धिः इन्द्रियाणि च तेषां प्रसरः कार्यक्षमता, प्रतिहतः बुद्धीन्द्रियप्रसरः यस्य तत्तथोक्तं, प्रतिहतबुद्धीन्द्रियव्यापारमित्यर्थः; एतादृशं शरीरं समाधौ न योग्यं भवति ॥ २९ ॥ ४ 'विवशं च' इति र. र. स. पाठः ।

योग्यं तन्न समाधौ प्रतिहतबुद्धीन्द्रियप्रसरम् ॥ २९ ॥
बालः षोडशवर्षो विषयरसास्वादलम्पटः परतः ।
जातविवेको[1] वृद्धो मर्त्यः कथमाप्नुयान्मुक्तिम् ॥ ३० ॥

शरीरस्य वयोविभागेनास्थिरत्वं दर्शयन्नाह–बाल इत्यादि । षोडशवर्ष इति षोडश वर्षाणि यस्य वयसि स षोडशाब्दो बाल इत्यर्थः । ग्रन्थान्तरे बालत्वेऽपि वयोभेदा वर्तन्ते । यथा पद्यं,–"आपञ्चमाच्च कौमारः पौगण्डो नवहायनः । आषोडशाच्च कैशोरो यौवनं च ततः परम्"–इति । बालो वस्तुज्ञाने अशक्तः । पुनः षोडशवर्षेभ्यः परः विषयरसास्वादलम्पटो भवति, विषयाः शब्दस्पर्शरूपरसगन्धाः, रसाः शृङ्गारहास्यकरुणारौद्रवीरभयानकवीभत्साद्भुतशान्ताः । केचित् शान्तं रसं न ब्रुवन्ति, निर्विकारत्वात् । एतेषां आस्वादः स्वादः तत्र लम्पटो व्यासक्तः, अथ वा विषयानन्तरं स्नेहस्तत्रेति । अतः परतो जातविवेको भवति उत्पन्नविचारो भवति । तदा वृद्धोऽक्षमः परं मनुष्यः मुक्तिं कैवल्यं कथमाप्नुयात् ? न कथमपीत्यर्थः, वयस्युपप्लवभावात् ॥ २९ ॥ ३० ॥

अस्मिन्नेव शरीरे येषां परमात्मनो न संवेदः ।
देहत्यागादूर्ध्वं तेषां तद्ब्रह्म दूरतरम् ॥ ३१ ॥

पूर्वपद्याभिप्रायं विचार्य मुक्तिप्राप्तौ प्रशङ्कितः प्राह–अस्मिन्नित्यादि । अस्मिन् शरीरे वर्तमाने क्षेत्ररूपे, येषां पुंसामात्मसंवेदो न जातः ब्रह्मज्ञानं न जातं, तेषां पुंसामेव देहत्यागादूर्ध्वं शरीरोत्सर्गतः पश्चात्, तद्ब्रह्म दूरतरं दूराद्दूरतरमित्यर्थः॥ ३१॥

ब्रह्मादयो यजन्ते[2] यस्मिन् दिव्यां तनुं समाश्रित्य ।
जीवन्मुक्ताश्चान्ये कल्पान्तस्थायिनो मुनयः ॥ ३२ ॥

अधुना पूर्वमतं द्रढयति–ब्रह्मादय इत्यादि । यस्मिन् ब्रह्मादयो विष्णुरुद्रेन्द्रादयो ब्रह्मविदो यजन्ते संगतिं कुर्वन्ति समाप्नुवन्तीत्यर्थः; 'यज' देवपूजासंगतिकरणदानेषु, अत्र संगतिकरणमर्थो दर्शितः । किंकृत्वा ? प्राप्नुवन्ति दिव्यां तनुं परमां समाश्रित्य संप्राप्य । तेभ्यो ब्रह्मादिभ्योऽप्यन्ये अपरे मुनयो नारदादयो जीवन्मुक्ता यजन्ते संगतिं कुर्वन्ति । तेऽपि किंविशिष्टाः? कल्पान्तस्थायिनः प्रलयान्तेऽपि तिष्ठन्तीति भावः । ब्रह्मादयस्तिष्ठन्त एव ॥ ३२ ॥

तस्माज्जीवन्मुक्तिं समीहमानेन योगिना प्रथमम् ।
दिव्या तनुर्विधेया हरगौरीसृष्टिसंयोगात् ॥ ३३ ॥

---

१ 'यातविवेको वृद्धो' इत्यपि सम्यक्पाठः, वार्धक्ये विवेकहानेः प्रसिद्धत्वात् । रसेश्वरदर्शने माधवाचार्यैरप्ययमेव पाठः स्वीकृतः । २ 'यतन्ते तस्मिन्' इति र. र. स. पाठः।

इति बहुधा विचार्येष्टवस्तुस्तुतिमाह–तस्मादित्यादि । यतो ब्रह्मादयो जीवन्मुक्ताश्चान्ये दिव्यां तनुं विधाय मुक्तिं प्राप्तास्तस्माद्धेतोर्योगिना योगयुक्तेन प्रथमं दिव्या तनुर्विधेया दृढशरीरं कार्यमित्यर्थः । किंविशिष्टेन योगिना ? जीवन्मुक्तिं समीहमानेन योगिना दिव्या तनुर्विधेया । कुतः ? हरगौरीसृष्टिसंयोगात् । उमेश्वरसृष्टी रसेन्द्रस्तस्य सेवनादित्यर्थः । दृढशरीरेण वाञ्छितं साध्यते न त्वन्यथा ॥ ३३ ॥

तस्यापि साधनविधौ सुधिया प्रतिकर्मनिर्मलाः प्रथमम् ।
अष्टादशसंस्कारा विज्ञातव्याः प्रयत्नेन ॥ ३४ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे रसप्रशंसात्मकः प्रथमोऽवबोधः ।

दिव्यतनोर्हेतुत्वाद्रसेन्द्रस्य साधनविधौ साधनोपदेशे सुधिया पूज्यमतिना पुंसा प्रथमं अष्टादशसंस्काराः प्रयत्नेन ज्ञातव्याः । संस्क्रियन्त इति संस्काराः । पुंस्यपि गर्भाधानादयः षोडश संस्कारा वर्तन्ते; अत एव संस्कारैरुभयोः साम्यं दोषाभावत्वं गुणवत्त्वं च स्यात् । अतो ब्राह्मणक्षत्रियवैश्यशूद्राः स्युः । किंविशिष्टाः संस्काराः ? प्रतिकर्मनिर्मलाः कर्म कर्म प्रति निर्दोषाः ॥ ३४ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां मुग्धावबोधिन्यां रसहृदयटीकायां रसप्रशंसात्मकः प्रथमोऽवबोधः ॥ १ ॥

अथ द्वितीयोऽवबोधः ।

अथाष्टादशसंस्काराः ।

स्वेदनमर्दनमूर्च्छोत्थापनपातननिरोधनियमाश्च ।
दीपनगगनग्रासप्रमाणमथ चारणविधानं च ॥ १ ॥
गर्भद्रुतिबाह्यद्रुतिजारणरसरागसारणं चैव ।
क्रामणवेधौ भक्षणमष्टादशधेति रसकर्म ॥ २ ॥

यस्योपजीव्यते कीर्तिः संगमेव सुधाभुजाम् ।
स श्रीमान्कारयामास वृत्तिं मुग्धावबोधिनीम् ॥

आर्याद्वयेन रसाष्टादशसंस्कारोद्देशः कृतः ॥ १ ॥ २ ॥

---

१ अत्रापि टीकाकृता 'हरगौरीसृष्टिसंयोगात्' इति पदमन्यथा विवृतं, कुतः ? हरसृष्टिः पारदः, गौरीसृष्टिः अभ्रकं, तयोः संयोगात्; पारदाभ्रकयोः संयोगादेव दिव्यतनुप्रापणं प्रसिद्धम् । रसेश्वरदर्शने माधवाचार्यैरप्येवमेवास्यार्थो दर्शितः ।

अथ स्वेदनम् ।

आसुरिपटुकटुकत्रयचित्रार्द्रकमूलकैः कलांशैश्च ।
सूतस्य काञ्जिकेन त्रिदिनं मृदुवह्निना स्वेदः ॥ ३ ॥

अधुना संस्काराणां साधने लक्षणमाह । तत्र प्रथमोद्दिष्टस्य स्वेदनसंस्कारस्य साधनं स्पष्टयन्नाह–आसुरीत्यादि । सूतस्य पारदस्य त्रिदिनं दिनत्रयपरिमाणं यथा स्यात्तथा, मृदुवह्निना स्वल्पाग्निना स्वेदः स्वेदनं कार्यम् । केन ? काञ्जिकेन सौवीरेण । कैः सह ? आसुरिपटुकटुकत्रयचित्रार्द्रकमूलकैः सह । आसुरी राजिका; पटु सैन्धवं लवणविशेषः, केचित्पटुशब्देन क्षारमपि व्याचक्षते; कटुकत्रयं शुण्ठीमरिचपिप्पल्यः; चित्रकं प्रतीतं; आर्द्रकं कन्दविशेषो नागर-हेतुः; मूलकं कन्दविशेषः प्रसिद्धः । किंविशिष्टैरेतैः कलांशैः षोडशांशैः षोडशांशः प्रत्येकं संयुज्यते । सर्वसंमतमिदं व्याख्यानम् । अत्र विशेषः काञ्जिके "सर्व-धान्याम्लसंधानं तुषवर्ज्यं तु कारयेत् । उरगा त्रिफला कान्ता लघुपर्णी शतावरी ॥ तेन युक्तं रसस्विन्नं त्रिदिनं मृदुवह्निना । दोलायन्त्रेण तीव्रेण मर्द-यित्वा पुनः पुनः–" इति **रसेन्द्रमङ्गलात्** । "क्षाराम्लैरौषधैर्वापि दोलायन्त्रे स्थितस्य हि । पाचनं स्वेदनाख्यं स्यान्मलशैथिल्यकारकं"–इति परिभाषा । "द्रवद्रव्येण भाण्डस्य पूरितार्धोदरस्य च । मुखस्योभयतो द्वारद्वयं कृत्वा प्रयत्नतः ॥ तस्योपरि क्षिपेद्दण्डं तन्मध्ये रसपोटलीम् । बद्ध्वा तु स्वेदयेदेतद्दोलायन्त्रमिति स्मृतम्"–इति दोलायन्त्रलक्षणम् ॥ ३ ॥

अथ मर्दनम् ।

गुडदग्धोर्णालवणैर्मन्दिरधूमेष्टकासुरीसहितैः ।
रसषोडशांशमानैः सकाञ्जिकैर्मर्दनं त्रिदिनम् ॥ ४ ॥

द्वितीयोद्दिष्टस्य मर्दनस्य साधनं स्पष्टयन्नाह–गुडेत्यादि । एतैरौषधैर्दिनत्रय-परिमाणं रसस्य मर्दनं कार्यम् । एतैः कैः ? गुडदग्धोर्णालवणैः; गुड इक्षुविकारः प्रसिद्धः; दग्धोर्णा दग्धा चासौ ऊर्णा चेति समासः, ऊर्णा प्रतीता मेषरोम-निचयमित्यर्थः; लवणं सैन्धवमेकं; 'गुडदग्धोर्णारजनी' इति वा पाठः; तत्र हरिद्रा ग्राह्या, न सैन्धवम् । रसषोडशांशमानैः रसात्षोडशांशप्रमाणैः । 'अंश' इत्यस्य प्रत्येकं संबन्धः । विशेषश्चात्र,–"वस्त्रैश्चतुर्गुणैर्बद्धः सूतः स्थाप्यः शुभे-ऽहनि । लोहार्काश्मजखल्वे तु तप्तेष्वेव तु मर्दयेत् ॥ उद्दिष्टैरौषधैः सार्धं सर्वाम्लैः काञ्जिकैरपि । पेषणं मर्दनाख्यं स्यात्तद्बहिर्मलनाशनं"–इति परि-भाषा । अत्र यन्त्रं तु खल्वाख्यं ज्ञेयम् । तल्लक्षणं तु,–"खल्वयोग्या शिला नीला श्यामा स्निग्धा दृढा गुरुः ॥ षोडशाङ्गुलिकोत्सेधा नवाङ्गुलिकविस्तरा"–इति । खल्वयोग्यशिलालक्षणं प्रसंगादुक्तम् । "उत्सेधेन नवाङ्गुलः खलु कलातुल्याङ्गु-

लायामवान् विस्तारेण दशाङ्गुलोऽथ मुनिभिर्निम्नस्तथैवाङ्गुलैः[1] ॥ पाल्यां द्व्यङ्गुलविस्तरश्च मसृणोऽतीवार्धचन्द्रोपमो घर्षो[2] द्वादशकाङ्गुलश्च तदयं खल्वो मतो मर्दने"– इति ॥ ४ ॥

अथ मूर्च्छना ।

मलशिखिविषाभिधाना रसस्य नैसर्गिकास्त्रयो दोषाः ।
मूर्च्छां मलेन कुरुते, शिखिना दाहं, विषेण मृत्युं च ॥५॥

रसस्य पारदस्य दोषास्त्रयो वर्तन्ते । किंविशिष्टाः ? मलशिखिविषाभिधानाः; मलश्च शिखी च विषं च तान्येवाभिधानं नाम येषां ते तथोक्ताः । पुनः किंविशिष्टाः ? नैसर्गिकाः निसर्ग उत्पत्तिस्तत्संबन्धिनः सहजा इत्यर्थः । विशेषश्चात्र "मलाद्याः पञ्चदोषाः स्युर्भूजाद्याः सप्तकञ्चुकाः ॥ कुष्टानष्टौ रसान्तःस्था रसे तेऽनन्तदोषदाः"–इति **रससङ्केतकलिकायाम्** । यद्यपि **रसेन्द्रमङ्गले** पञ्च मलादयो नैसर्गिका दोषाः कथितास्तथाऽप्यत्र त्रय एव; अन्ये द्वे गुरुत्वचपलत्वे नैसर्गिकदोषरूपे कुतो नस्तः ? त्रिभिः स्वेदनमर्दनमूर्च्छनात्मकैः संस्कारैरनिवृत्तेः[3] । नैसर्गिकग्रहणाद्वैकारिकाणामपि ग्रहणं स्यात् । अत्र नैसर्गिका उक्ता वैकारिकाः कुतो नोक्ताः ? वैकारिकाणां भावाभावात्[4] । रसो दोषत्रयावृतः प्राश्यमानः किं करोति ? मलेन मलदोषेण मूर्च्छां इन्द्रियमोहं कुरुते, शिखिना वह्निना दाहं, विषेण मृत्युं मरणं; चेति समुच्चये । एषामपहरणं कार्यमिति भावः । "स्वरूपस्य विनाशेन पिष्टित्वापादनं हि यत् । विद्वद्भिर्जितसूतोऽसौ नष्टपिष्टः स उच्यते ॥ मर्दनोद्दिष्टभेषज्यैर्नष्टपिष्टत्वकारकम् । तन्मूर्च्छनमिति प्रोक्तं दोषत्रयविनाशनम्"–इति । यन्त्रमत्र खल्वमेव पूर्वोक्तं यत् ॥ ५ ॥

गृहकन्या हरति मलं, त्रिफलाऽग्निं, चित्रकश्च विषम् ।
तस्मादेभिर्मिश्रैर्वारान् संमूर्च्छयेत्सप्त ॥ ६ ॥

त्रिदोषापहरणं मूर्च्छनं चाह–गृहकन्येत्यादि । गृहकन्या गृहकुमारिका, मलं प्रथमं दोषं हरति । पुनस्त्रिफला त्रयाणां फलानां समाहारः त्रिफला, अग्निं द्वितीयं दोषं हरति; समाहारो यथा,–"एका हरीतकी योज्या द्वौ च योज्यौ बिभीतकौ । चत्वार्यामलकान्येवं त्रिफलेयं प्रकीर्तिता"–इति । पुनश्चित्रकोऽग्निः, विषं तृतीयं दोषं हरति दूरीकरोतीत्यर्थः । तस्माद्धेतोरेभिस्त्रिभिर्गृहकन्यात्रिफलाचित्रकैर्मिश्रि-

---

१ मुनिभिरङ्गुलैर्नाम सप्ताङ्गुलैः । २ घर्षो नाम घर्षको मर्दकः । ३ गुरुत्वचपलत्वयोर्नैसर्गिकदोषत्वेऽपि स्वेदनमर्दनमूर्च्छनाख्यैस्त्रिभिरनिवृत्तेः प्रयोजनाभावादस्मिन् प्रकरणे तयोरग्रहणमिति भावः । ४ नैसर्गिकदोषनिवृत्तौ वैकारिकदोषाणामपि निवृत्तिरिति भावः ।

तैरेकीकृतै रसं सप्त वारान्मूर्च्छयेत् विधिवन्मूर्च्छनं कुर्यात् । विशेषश्चात्र, "मूर्च्छनं रसराजस्य कर्तव्यं वादिभिः सदा । विषैस्त्रिफलया पूर्वं बृहत्योपविषैस्तथा ॥ कर्कोटीक्षीरकन्दाभ्यां चित्रेण गृहकन्यया । एकेनाप्यथ संमर्द्यो याममेकं तु पारदः ॥ किंनरं यन्त्रमादाय ह्योषध्या लेपयेत्तलम् । नवसारयुतं सूतं यन्त्रमध्यगतं न्यसेत् ॥ दद्याद्रसोपरि श्रावं[1] सन्धिलेपं दृढं मृदा । लवणेन च संपूर्य द्वारं संरुध्य यत्नतः ॥ चुल्हिकोपरि संस्थाप्य दीप्ताग्निं ज्वालयेत्सुधीः । यामैकेन तदुत्तार्य कर्तव्यः शीतलो रसः ॥ यन्त्रादुद्धृत्य यत्नेन सूतमुत्थाप्य मूर्च्छितम् । अमूर्च्छितस्तदा देयः कलांशं मूर्च्छिते रसः ॥ सिन्धूत्थटङ्कणाभ्यां च मर्दयेन्मधुसंयुतम् । दोलायन्त्रे ततः स्वेद्यः क्षाराम्ललवणैः सह ॥ उत्थाप्य मूर्च्छयेत्पश्चात् वारंवारं रसेश्वरम् । पुनरुत्थापितं कुर्यादेकं[2]विंशतिवारकम्—" इति **रससारे** ॥ ६ ॥

अथोत्थापनम् ।

अमुना विरेचनेन हि सुविशुद्धो नागवङ्गपरिमुक्तः ।
सूतः पातनयन्त्रे समुत्थितः काञ्जिकक्काथात् ॥ ७ ॥

सूतो नागवङ्गपरिमुक्तो भवति नागवङ्गाभ्यां दोषाभ्यां विरहितः पारदो भवतीत्यर्थः । किंविशिष्टः सन्? समुत्थितः सन् । पातनयन्त्रे स्थालीद्वयसंपुटे सम्यग्विधानेनोत्थितः सन् । कस्मात्? काञ्जिकं सौवीरं पूर्ववर्णितं तत्क्काथसंयोगादित्यर्थः । हि निश्चितम् । अमुना विरेचनेन उक्तशोधनेन सूतः सुविशुद्धो भवेत् विशेषशुद्धो भवेदित्युत्थापनम् । अनेन विधिना हिङ्गुलस्थस्य सूतस्यापि उत्थापनं भवति । "स्वेदनादिकयोगेन स्वरूपापादनं पुनः । तदुत्थापनमित्युक्तं मूर्च्छाव्यापत्तिनाशनं"–इति । उत् ऊर्ध्वं स्थापनं उत्थापनम् । अत्र यन्त्रं तु, "अष्टाङ्गुलपरीणाहमानाहेन दशाङ्गुलम् । चतुरङ्गुलकोत्सेधं तोयाधारोऽङ्गुलादधः ॥ अधोभाण्डे मुखं तस्य भाण्डस्योपरिवर्तिनः । षोडशाङ्गुलविस्तीर्णपृष्ठस्याऽऽस्ये प्रवेशयेत् ॥ पार्श्वयोर्महिषीक्षीरचूर्णमण्डूरफाणितैः ॥ विलिप्य शोषयेत्सन्धिं जलाधारे जलं क्षिपेत् । चुल्ल्यामारोपयेदेतत् पातनायन्त्रमीरितम्"–इति ॥ ७ ॥

अथ पातनम् ।

कृत्वा तु शुल्वपिष्टिं निपात्यते नागवङ्गशङ्कातः ।
तस्मिन्दोषान्मुक्त्वा निपतति शुद्धस्तथा सूतः ॥ ८ ॥

पञ्चमोद्दिष्टं पातनसंस्कारं स्पष्टयन्नाह–कृत्वेत्यादि । तु पुनः उत्थितं सूतं शुल्वपिष्टिं कृत्वा शुल्वेन ताम्रेण सह तयोर्मेलनं यथा स्यात्तथा पेषणं विधाय तस्मिन्

---

१ श्रावमिति शरावमित्यर्थः । २ 'कुर्यादेवं विंशतिवारकं' इति पाठान्तरम् ।

पातनयन्त्रे निपात्यते कर्मविदेति शेषः । कुतः? नागवङ्गशङ्कातः नागवङ्गदोषग्लानितः । तथा उक्तविधानेन निपतति सति पातनकर्मणि कृते सति शुद्धः सूतो भवेत् । वारमित्यनुक्ते ग्रन्थान्तरे त्रिसप्तैकविंशतिवारं पातनकर्मणि कृते सति सम्यक् नागवङ्गशङ्का नश्यतीति भावः । विशेषश्चात्र पातनायन्त्रे, "द्वौ भागौ शुद्धसूतस्य शुल्बभागैकसंयुतौ । विंशांशं लवणं दत्त्वा पिष्टीकुर्याच्च सुन्दरम् ॥ अष्टाङ्गुलविस्तीर्णं दैर्घ्येण दशाङ्गुलं त्वधोभाण्डम् । कण्ठादधः समन्ताच्चतुरङ्गुलीकृतजलाधारम् ॥ अन्तः प्रविष्टतलभाण्डवदनं जलमग्ननिजमुखप्रान्तम् । उपरिष्टाच्चिपिटघटी देयोदरषोडशाङ्गुलविशाला ॥ तस्मिन्नधोर्ध्वभाण्डे निपातितः सकलदोषनिर्मुक्तः । सुतरां भवति रसेन्द्रो जीर्णग्रासोऽपि पात्योऽसौ ॥" "अथ ऊर्ध्वं तथा तिर्यक् पातस्त्रिविध उच्यते । यत्र तिष्ठति सूतेन्द्रो वह्निस्तत्राऽन्यथा जलम् ॥ उक्तौषधैर्मर्दितपारदस्य यन्त्रस्थितस्योर्ध्वमधश्च तिर्यक् ॥ निर्यापनं पातनसंज्ञमुक्तं वङ्गाहिसंपर्कजकञ्चुकघ्नम्"—इति । ऊर्ध्वपाते रसस्योर्ध्वगमनं, तत्राधःपात्रे वह्निः जलमूर्ध्वपात्रे; अधःपाते तु रसस्याधस्ताद्गमनं भवति, यन्त्रं तदेव, परं तु अग्निजलयोर्व्यत्यासः, जलमत्राधःपात्रे, अग्निरूर्ध्वपात्रे; तियक्पाते तु रसस्तिर्यक् पतति, तत्रैकपात्रपृष्ठे जलं अन्यपात्राधो वह्निः ॥ ८ ॥

अथातो रोधनम् ।

मर्दनमूर्च्छनपातैः कदर्थितो भवति मन्दवीर्यत्वात् ।
सृष्ट्यम्बुजैर्निरोधाल्लब्धाप्यायो न षण्ढः स्यात् ॥ ९ ॥

षष्ठोद्दिष्टं निरोधनसंस्कारं स्पष्टयन्नाह—मर्दनेत्यादि । एतैर्मर्दनमूर्च्छनपातैः संस्कारविशेषैः कृत्वा मन्दवीर्यत्वात् कदर्थितो भवति । कुत्सितविधानेन कदर्थितो भवतीत्यर्थः । पुनः सूतः सृष्ट्यम्बुजैः सह मर्दनानन्तरं निरोधात् मूषाद्वयसंपुटे कूपिकायां वा निरोधात् रुन्धनात्, लब्धाप्यायः प्राप्तबलः सन् न षण्ढः स्यात् न शुक्ररहितो भवति । सृष्टिः मूत्रशुक्रशोणितरूपा; अम्बुजं लवणं सैन्धवं, कमलमिति मन्दाः । सृष्टिर्यथा,—"गोजाविनरनारीणां मूत्रं शुक्रं च शोणितम् । सृष्टिरेषा समाख्याता षण्ढदोषविनाशिनी"—इति **शक्त्यवतारात्[1] ।** यन्त्रं यथा,—"रक्तसैन्धवखोटेन मूषाद्वन्द्वं प्रकल्पयेत् । तत्संपुटे रसं क्षिप्त्वा नवसारं सनिम्बुकम् ॥ संपुटस्य प्रयत्नेन लेपयेत्सन्धिमुत्तमम् । वज्रमृत्स्नां समादाय वेष्टयेत्तत्प्रयत्नतः ॥ छायाशुष्कं च तत्कृत्वा भूगर्ते स्थापयेत्ततः । अष्टाङ्गुलप्रमाणेन मूषोर्ध्वं तत्र पूरणम् ॥ त्रिसप्तदिनपर्यन्तं करीषाग्निं च

१ "स्त्रीपुंसोः शुक्रयुगलमप्रसूतारजस्तथा । एतत्सृष्टित्रयं प्रोक्तं गुह्यमेतद्वरानने"—इति रसावतारे ।

कारयेत् । दिने दिने प्रकर्तव्या मूषा सैन्धवनूतना ॥ खेदयेत्तत्प्रयत्नेन भूगर्भे स्थापयेत्ततः । अथवा कूपिकामध्ये सूतं सैन्धवसंयुतम् ॥ भूगर्भे च ततः स्थाप्यं एकविंशद्दिनावधि । अयं निरोधको नाम्ना महासुखकरो रसे"–इति ॥९॥

अथ नियमनम् ।

इति लब्धवीर्यः सम्यक् चपलोऽसौ संनियम्यते तदनु ।
फणिलशुनाम्बुजमार्कवकर्कोटीचिञ्चिकास्वेदात् ॥ १० ॥

सप्तमोद्दिष्टसंस्कारं स्पष्टयन्नाह–इतीत्यादि । इति पूर्वोक्तविधानेन यन्त्रणादिना, तदनु रोधनानन्तरं, असौ चपलश्चञ्चलो रसो नियम्यते कर्मविदा संनियमनं क्रियते । कस्मात् ? फणिलशुनाम्बुजमार्कवकर्कोटीचिञ्चिकास्वेदात्; फणी ताम्बूलं, लशुनं रसोनः, अम्बुजं लवणं, मार्कवः भृङ्गराजः, कर्कोटीति प्रतीता वन्ध्या, चिञ्चिका अम्लिका, एताभिः सह यः स्वेदः यन्त्रे अग्नितापः तस्मात् । किंविशिष्टः ? सम्यक् लब्धवीर्यः प्राप्तबलो वीर्यवान् रसः चपलत्वनिवृत्तये नियम्यत इत्यर्थः । विशेषश्चात्र,–"काचकूपीं मृदा लिप्य रसो मध्ये विमुच्यते । कलांशं टङ्कणं दत्त्वा मध्ये किञ्चित्प्रदीयते ॥ द्वारमुद्रा प्रकर्तव्या वज्र-मृत्तिकया दृढा । भूगर्भे कूपिकां स्थाप्य सितया गर्भपूरणम् ॥ करीषाग्निः प्रकर्तव्य एकविंशद्दिनावधि । अयं नियामको नाम वह्निप्रत्यन्तकारकः ॥ रोधनाल्लब्धवीर्यस्य चपलत्वनिवृत्तये । क्रियते यो रसस्वेदः प्रोक्तं नियमनं हि तत्"–इति । यन्त्रलक्षणं तु,—"चतुःप्रस्थजलाधारं चतुरङ्गुलकाननम् । घटयन्त्रमिदं प्रोक्तं तदाप्यायनकं स्मृतम्"–इति ॥ १० ॥

अथ दीपनम् ।

भूखगटङ्कणमरिचैर्लवणासुरिशिग्रुकाञ्जिकैस्त्रिदिनम् ।
स्वेदेन दीपितोऽसौ ग्रासार्थी जायते सूतः ॥ ११ ॥

अष्टमोद्दिष्टस्य दीपनसंस्कारस्य विधिं स्पष्टयन्नाह–भूखगेत्यादि । असौ पूर्वसंस्कृतरस एतैरौषधैस्त्रिदिनं निरन्तरं यथा स्यात्तथा स्वेदेन दीपितः क्षुत्पीडितः सन् ग्रासार्थी कवलाभिलाषी जायते । एतैरौषधैः भूखगटङ्कणमरिचैः; न केवलमेतैः पुनर्लवणासुरिशिग्रुकाञ्जिकैः । भूः तुवरी, खगः कासीसं, टङ्कणं सौभाग्यं, मरिचमूषणं, एतैः । पुनः लवणं सैन्धवं, आसुरी राजिका, शिग्रुः सौभाञ्जनं वृक्षविशेषः, काञ्जिकं पूर्वोक्तं अम्लीभूतं, एतैश्चेति । विशेषश्चात्र, "स्वेदनं रसराजस्य क्षाराम्लविषमद्यकैः । बीजपूरं समादाय वृन्तमुत्सृज्य कारयेत् ॥ तस्य मध्ये क्षिपेत्सूतं कलांशक्षारसंयुतम् ॥ द्वारं निरुध्य यत्नेन वस्त्रमध्ये निबन्धयेत् ॥ दोलास्वेदः प्रकर्तव्य एकविंशद्दिनावधि । दिने दिने प्रकर्तव्यं नूतनं बीजपूरकम् ॥ लेलिहानो हि धातूंश्च पीड्यमानो

बुभुक्षया । अमुनैव प्रकर्तव्यं रसराजस्य दीपनम् ॥ त्र्यहं सप्तदिनं वाथ चतुर्दशैकविंशतिम्[1] । संस्कारः सूतराजे तु क्रमात्क्रमतरं वरम्"–इति ॥ ११ ॥

इति दीपितो विशुद्धः प्रचलितविद्युल्लतासहस्राभः ॥
भवति यदा रसराजश्चार्यो दत्त्वा द्वितीयमिदम् ॥ १२ ॥

कृताष्टसंस्कारस्य पारदस्य संस्कारान्तरसिद्धां परीक्षामाह–इतीत्यादि । इति पूर्वोक्तप्रकारेण, रसराजो दीपितः सन् क्षुदुत्पादितः सन्, विशुद्धो भवति । यदीदृशो भवति रसराजस्तदा चार्यः चारणकर्म कार्यम् । कीदृक्? प्रचलितविद्युल्लतासहस्राभः; प्रकर्षेण चलन्त्यश्चलनशीला या विद्युतस्तासां सहस्रस्येव भा दीप्तिर्यस्य स तथोक्तः । किं कृत्वा चार्यः? इदमग्रे वक्ष्यमाणं किंचित् धातूपरसमहारसरत्नसंज्ञकं द्वितीयं रसराजसंबन्धिनं दत्त्वा संयोज्येत्यर्थः ॥ १२ ॥

पीतक्रियासु पीतं, श्वेतं तारक्रियासु मुखमादौ ॥
देयं खल्वे घृष्टो दिव्यौषधिभिः स निर्मुखश्चरति ॥ १३ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे रसशोधनात्मको द्वितीयोऽवबोधः ।

किं द्वितीयमित्याशङ्क्य तं स्पष्टयन्नाह–पीतेत्यादि । आदौ प्रथमं, मुखं 'विधेयं' इत्यध्याहारः, पारदस्य मुखं कार्यमित्यर्थः । ततश्चेत्पीतक्रिया भवन्ति स्वर्णसंबन्धीनि कार्याणि भवन्ति तदा पीतं स्वर्णं देयम् । श्वेतक्रियासु श्वेतं देयं, श्वेतं तारमित्यर्थः । स्वर्णतारादिकं खल्वे दत्तं कृतमुखो रसश्चरति । पुनर्निर्मुखो रसः अकृतमुखो रसः खल्वे घृष्टो घर्षितः सन् पूर्वोक्तं चरति भक्षयति । काभिः सह? दिव्यौषधीभिः वक्ष्यमाणाभिः सह । यथा पद्यं,–"सास्रो रसः स्यात्पटुशिग्रुतुत्थैः सराजिकैर्व्योषणकैस्त्रिरात्रम् ॥ पिष्टस्ततः खिन्नतनुः सुवर्णमुखानयं[2] खादति सर्वधातून्"–इति । निर्मुखश्च "अम्लवर्गेण संयुक्तं यथालाभेन मर्दयेत् । अभ्रकादींश्च चरते सूतको वासनामुखः ॥ इयन्मानस्य सूतस्य भोज्यद्रव्यात्मिका मितिः । इयतीत्युच्यते यासौ ग्रासमानमितीरितम्"–इति परिभाषा ॥१३॥

इति श्रीमत्कुरलकुलपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजमिश्रविरचितायां मुग्धावबोधिन्यां रसहृदयटीकायां रसशोधनात्मको
द्वितीयोऽवबोधः ॥ २ ॥

---

१ दिनानीति शेषः । २ 'सुवर्णमुख्यानयं' इत्यपि पाठः ।

अथ तृतीयोऽवबोधः ।

अथ गगनग्रासः ।

घनरहितबीजचारणसंप्राप्तदलादिद्रव्यकृतकृत्याः ।
कृपणाः प्राप्य समुद्रं वराटिकालाभसंतुष्टाः ॥ १ ॥

सुधाकरग्राससत्वं पद्माकरसुखावहम्[1] ।
तथा विभूतयश्चास्य सज्जनानन्दकारकाः ॥

अनेन पद्येन ग्रन्थस्य गुणाधिक्यं संमतत्वं च वर्णयन्नाह—घनेत्यादि । ये एवंविधाः पुरुषास्ते कृपणा एव । किंविशिष्टाः ? घनरहितबीजचारणसंप्राप्तदलादिद्रव्यकृतकृत्याः; घनेनाभ्रकेण, रहितं वर्जितं, यद्बीजचारणं अन्यधात्वादीनां बीजकवलनं, तेन यत्प्राप्तं[2] दलादिद्रव्यं पत्ररञ्जन–वर्णवृद्धि–तारकृष्णी(ष्टी)मेलापकादिकं वस्तु, तेन ये कृतकृत्याः पूर्णाः, 'आत्मानं मन्यन्ते' इत्यध्याहारः । किंविशिष्टाः कृपणाः ? समुद्रं प्राप्य रत्नाकरं लब्ध्वा, वराटिकालाभसंतुष्टाः; कपर्दिकालाभेन संतुष्टिं प्राप्ताः, दरिद्रभावादिति भावः । तथा एवंविधाः कृपणा इदं शास्त्रं रत्नाकररूपं बहुरत्नं प्राप्य दलादिद्रव्येण कृतकृत्याः । शास्त्रसमुद्रयोर्गुणरत्नैः साम्यं; वराटिकादलादिद्रव्ययोः साम्यं तुच्छतया; यत उभावपि निकृष्टावेव । यत एतच्छास्त्रं बहुप्रदं, मुद्रिकावेधस्पर्शवेधधूमवेधशब्दवेधधाम्यवेधाधाम्यधातुवेधप्रदत्वात् ॥ १ ॥

अन्ये पुनर्महान्तो लक्ष्मीकरिराजकौस्तुभादीनि ।
अवधीर्य लब्धवन्तः परामृतं चामरा जाताः ॥ २ ॥

पुनरत्र ग्रन्थे गुणाधिक्यशतं च वर्णयन्नाह–अन्ये इत्यादि । "पुनरित्यप्रथमविशेषणयोः"–इति प्रसादः । अत्र पुनर्विशेषणे । अन्ये पूर्वेभ्यो महान्तो वर्तन्ते । किं कुर्वन्तः ? परामृतं लब्धवन्तः सन्त अमरा जाताः मरणरहिता जीवन्मुक्ता जाता इत्यर्थः । परं च तदमृतं चेति समासः; मोक्षमित्यर्थः । किं कृत्वा ? लक्ष्मीकरिराजकौस्तुभादीनि अवधीर्य अवहेलनं विधाय; लक्ष्मीर्हरिप्रिया, करिराज ऐरावत इन्द्रवारणः, कौस्तुभो हरेर्मणिः, इत्यादीनि चतुर्दशरत्नानि । सतामयमेव स्वभावः, दरिद्राणां कृपणानां पूर्ववत् । अत एवैतच्छास्त्रं कृपणमहतां[3] निकषरूपम् ॥ २ ॥

क्षारौषधिपटुम्लैः क्षुद्बोधो रागबन्धने स्वेदात् ।
न पुनः पक्षच्छेदो द्रव्यत्वं वा विना गगनम् ॥ ३ ॥

---

१ 'सुखावहाः' इति पा० । २ 'प्राप्यं' इति पा० । ३ 'कृपणमहतोः' इति पा० ।

सर्वोत्कृष्टत्वेन गगनग्राससाधनमाह—क्षारेत्यादि । क्षुद्बोधो रसराजस्य 'जायते' इति शेषः । कैः कृत्वा? क्षारौषधिपट्वम्लैः; क्षारौषधयो अहिमारादयः, पटु सैन्धवं, अम्लं अम्लवेतसादि, एतैः क्षुदुत्पत्तिर्भवेदित्यर्थः । क्षारौषधयो यथा, "अहिमारमपामार्गं तन्दुलीयकसंयुतम् । स्नुह्यर्ककरवीरं च लाङ्गलीक्षीरकन्दकौ ॥ कर्कोटीं कञ्चुकीं तुम्बां पलाशं चाग्निमन्थकम् । करीरं चित्रकं शिग्रुं वरुणं वेतसं वटम् ॥ पटोल्यर्जुनकूष्माण्डकदलीवज्रकन्दकम् । अश्वत्थं सूरणं जालीं दहेत्कन्दाननेकशः । अन्तर्धूमेन सर्वांश्च देवदालीं दहेत्तथा । औषधिक्षारनामासौ गणस्तु परिकीर्तितः"–इति । अम्लं यथा,–"अम्लवेतसजम्बीरं लकुचं बीजपूरकम् । चाङ्गेरी चणकाम्लं च नारङ्गं तित्तिडी तथा ॥ अम्बष्ठा करमर्दश्च कपित्थः करणादिकः (?) । पञ्चाम्लसंयुतो वा स्यादम्लवर्गः प्रकीर्तितः । चणकाम्लं च सर्वेषामेकमेव प्रशस्यते । अम्लवेतसमेकं वा सर्वेषामुत्तमोत्तमम्"–इति । इत्येतैः क्षारौषधिपट्वम्लैः क्षुद्बोधो भवेत्, रागबन्धने च भवेतां; रागो रञ्जनं, बन्धनं पूर्वमुपवर्णितम् । कुतो हेतोः ? एतैः पूर्वोक्तैः करणरूपैः स्वेदात् । पुनरिति विशेषणे । पक्षच्छेदः रसपक्षापकर्तनं, यथा स्थिरो भवति; द्रव्यत्वं गुणवत्त्वं वा, गगनमभ्रकं विना न भवतीत्यर्थः ॥ ३ ॥

अभ्रकजीर्णो बलवान् भवति रसस्तस्य चारणे प्रोक्ताः ॥
सन्धानवासनौषधिनिर्मुखसमुखा महायोगाः ॥ ४ ॥

द्रव्यत्वमभ्रकेणाह—अभ्रकजीर्ण इत्यादि । बलरहिते अतिक्षुद्बोधे षण्डता भवेत् । यथा,–"शीतत्वान्मर्दनाभावाल्लोहाद्यशुद्धस्य जारणात् । बिडप्रभूतदानाद्वा भुङ्क्ते जीर्णादजीर्णगः (?) ॥ अत्यग्नितो निराहारात् क्रामणारहितस्य च । इत्येता विक्रिया ज्ञेया अष्टभिः षण्डतां व्रजेत्"–इति । अतो रसोऽष्टसंस्कारानन्तरं अभ्रकजीर्णः कर्तव्यः, यतोऽभ्रकजीर्णो बलवान् भवति । अभ्रकं जीर्णं ग्रासन्याये(माने)न जारितं यस्मिन् स तथोक्तः । तस्याभ्रजारणायोग्यस्य रसस्य चारणे केवलकवलने एते प्रोक्ताः । एते के ? सन्धानवासनौषधिनिर्मुखसमुखा एव महायोगाः, महद्द्रव्यत्वकारकाः । सन्धानं सर्वधान्यानां अष्टौषध्यादीनां च सन्धानं; यथा,–"सर्वधान्यानि निक्षिप्य आरनालं तु कारयेत् । सपत्रमूलसंयुक्ता औषधीस्तत्र निःक्षिपेत् ॥ क्षितिकासीससासुद्रसिन्धुत्र्यूषणराजिकैः । संयुक्तं कारयेत्तत्तु सोष्मे सप्ताहसंस्थितम् ॥ तच्चारनालसंयुक्तं ताम्रभाण्डे तु संधयेत्"–इत्यभ्रकचारणार्थं संधानम् । वासनौषध्यो यथा,– "विज्ञेयमौषधीवर्गं यथा शास्त्रैरुदाहृतम् । जलजं स्थलजं चैव सम्यक् ज्ञात्वा तु कारयेत् ॥ जलजा उत्पली पद्मा स्थलजा[1] च प्रसारिणी । जालिनी अभ्रचन्द्रा च

१ 'स्थलजाश्च प्रसारिणी' इति पाठान्तरम् ।

चित्रपर्णी त्रिपर्णिका ॥ रसचन्द्रौकसश्चैव[1] तथा च जलमूलकः । समङ्गा वारिभूता च अपामार्गो जलोद्भवा ॥ अजमारी उपाम्बुश्च कुम्भिका जलपिप्पली । जलपूर्वाम्बुसीता च कुमारी नागिनी तथा ॥ सितजङ्घा स्वरश्चैव[2] तथा सर्पा सुगन्धिका । वृद्धा च बृहती तद्वन्मूर्तिर्मार्जारपादिका ॥ तथा जलचकोरी च मीनाक्षी अहिलोचना । जयाविंच (?) वराही च अपक्रा(त्रा) ईश्वरी तथा ॥ कुर्कुरी हलिनी चैव बृहती वज्रकन्दकम् । मुशली वनमाला च विदारी मोहिनी तथा ॥ माण्डूकी लवणा चैव उग्रा च उत्तमा तथा । शिखिपादी कपोती च नन्दिनी वृश्चिकालिका ॥ हंसपादी शिखा चैव सारिवा वायसी तथा । दन्ती गोजिह्विका चैव गरुडी हेमपुष्पिका ॥ समङ्गा जलजा चैव मांसी पाषाणभेदिका । अलम्बुषा मेघनादा शुकनादा कपोतिकी ॥ क्षीरिका तुलसी धान्या मेषिका च वनार्जका । वाराही चणकायासी तथा च अपराजिता ॥ चतुःषष्टिगणो ह्येष औषधीनां प्रकीर्तितः । षष्ठाष्टकप्रयोगेन अवस्थां नैव कारयेत्''–इति । अयमौषधीगणः सन्धानेऽपि योज्यः । सन्धानं च वासनौषधयश्च ताभिः कृत्वा ये निर्मुखसमुखा एव योगाः अकृतमुख–कृतमुखा इत्यर्थः ॥ ४ ॥

निश्चन्द्रिकं हि गगनं क्षाराम्लैर्भावितं तथा रुचिरैः ॥
सृष्टित्रयनीरकणातुम्बरुरसमर्दितं चरति ॥ ५ ॥

निर्मुखत्वेनाभ्रकचारणोपायमाह—निश्चन्द्रिकमित्यादि । हि निश्चितं, यद्गगनमभ्रकं निश्चन्द्रिकं चन्द्ररहितं भवति वज्रसंज्ञकमित्यर्थः, तद्गगनं रुचिरैर्निर्दोषैर्मनोरमैर्विविधैः क्षाराम्लैर्भावितं प्लावितं कार्यं; क्षारा यवक्षारस्वर्जिक्षारटङ्कणक्षारादयः, अम्ला अम्लवेतसजम्बीराद्याः पूर्वोक्ताः । ननु क्षारा रुचिराः कथं भवन्ति ? उच्यते, यथा–''सर्जिकाचूर्णभागैकं विंशद्भागं जलस्य च । तावत्क्वाथ्यं[3] क्षिपेद्भाण्डे यावत्फेनं सितं भवेत् ॥ क्षीणे क्षीणे जलं दत्त्वा श्वेतफेनं च गृह्यते । तदा तु डेकयन्त्रेण(?) द्रावयेदग्नियोगतः । त्रिःसप्तवारं कर्तव्यं द्रावणं मूत्रसंयुतम् । स्वर्जिकाक्षारनामायं द्रावणे परमो मतः''–इति विशेषविधिः । एवमत्युत्तमाः क्षाराः स्युः संपक्वाः हिमाः । पुनः सृष्टित्रयनीरकणातुम्बरुरसमर्दितं गोजाविनरनारीणां मूत्रं शुक्रं च शोणितं सृष्टित्रयं, नीरकणा जलपिप्पली पद्धरिति लोके, तुम्बरु प्रतीतं; जलकणा च तुम्बरुश्च अनयो रसः; सृष्टित्रयं च जलकणातुम्बरुरसश्च ताभ्यां मर्दनं कार्यम् । रसः पारदः, निर्मुखोपि एवंविधं गगनं चरति ग्रासीकरोति । निश्चन्द्रिककरणं ग्रन्थान्तरेऽस्ति; ''दुग्धत्रयं कुमार्यम्बु गङ्गापुत्रं त्रिमूत्रकम् । वटशुङ्गमजारक्तमेभिरभ्रं सुमर्दितम् ॥ शतधा पुटितं

१ 'सरश्चन्द्रौकसश्चैव' तथा 'शरच्चन्द्रौकसश्चैव' इति पाठान्तरद्वयमुपलभ्यते । २ 'खरश्चैव' इति पाठान्तरम् । ३ 'क्वाथं' इति पाठान्तरम् ।

चापि जायते पद्मरागवत् । निश्चन्द्रिकं मृतं त्वभ्रं वृद्धदेहे रसायनम् ॥ कामिनी-मददर्पघ्नं शस्तं पुंस्त्वोपघातिनाम्"–इति ॥ ५ ॥

यवचिञ्चिकाम्बुपुटितं तन्मूलशतावरीगदाकुलितम् ।
घनरवशिग्रुपुनर्नवरसभावितमभ्रकं चरति ॥ ६ ॥

विधानान्तरमाह—यवेत्यादि । पुनरभ्रकं यवचिञ्चिकाम्बुपुटितं कार्यं; यवचिञ्चिका प्रतीता, यवचिञ्चिकेति लोके; तस्या अम्बु द्रवः, तेन पुटितं आतपयोगेन भावितम् । पुनस्तन्मूलशतावरीगदाकुलितं कार्यं; तस्या यवचिञ्चिकाया मूलं तन्मूलं, शतावरी शतपाद्, गदः कुष्ठः, एतैराकुलं व्याप्तं परिप्लुतम् । यदा सरसौषधाभावस्तदायं विधिः; यथा—"शुष्कद्रव्यमुपादाय स्वरसानामसंभवे । वारिण्यष्टगुणे साध्यं ग्राह्यं पादावशेषितम्"–इति । पुनर्घनरवशिग्रुपुनर्नवरसभावितं कार्यं; घनरवस्तण्डुलीयकः, शिग्रु सौभाञ्जनं 'सुहिजना' इति लोके, पुनर्नवा वर्षाभूः प्रतीता, एतेषां रसेन भावितं परिप्लुतं आतपयोगेन शोष्यमित्यर्थः । एवंविधमभ्रं रसश्चरति । निर्मुखेन भावनाशब्देन शतवारं ज्ञातव्यं, ग्रन्थान्तरसाम्यात् । अत्र विशेषः,–"सोमवल्लीरसे पिष्ट्वा दापयेच्च पुटत्रयम् । सोमवल्लीरसेनैव सप्तवारांश्च भावयेत् ॥ दापयेन्मृन्मये भाण्डे रसेन सह संयुतम् । मूलं तु शरपुङ्खाया गव्यक्षीरेण घर्षयेत् । कल्केन मेलयेत् सूतं गगनं तदधोर्ध्वगम् ॥ स्थापयेद्रवितापे तु निर्मुखो ग्रसते क्षणात् । जायते पिष्टिका शीघ्रं नात्र कार्या विचारणा"—इति । अन्यच्च,—"तिलपर्णीरसं नीत्वा गगनं तेन भावयेत् । मर्दनाज्जायते पिष्टी नात्र कार्या विचारणा"—इति । अन्यच्च,—"मुण्डीनिर्यासके नागं बहुशस्तु निषेचयेत् । तेनाभ्रकं तु संयोज्य भूयो भूयः पुटे दहेत् ॥ चित्रकार्द्रकमूलानामेकैकेन तु सप्तधा । प्लावितव्यं प्रयत्नेन गन्धकाभ्रकचूर्णकम् ॥ नागमुण्डीरसाक्षिप्तं रसलुङ्गाम्लभावितम् । षोडशांशेन दातव्यं दोलायन्त्रे चरेद्रसः"—इति निर्मुखचारणम् ॥ ६ ॥

सर्जीक्षितिखगटङ्कणलवणान्वितमर्कभाजने त्रिदिनम् ।
पर्युषितमारनालं गगनादिकजारणे शस्तम् ॥ ७ ॥

समुखचारणमाह—सर्जीत्यादि । आरनालं स्वेदनसंस्कारे यदुक्तं काञ्जिकं तत् । अर्कभाजने ताम्रपात्रे । त्रिदिनं यावत्तावत्पर्युषितं संधानीकरणं कुर्यात् । कीदृग्विधमारनालं ? सर्जीक्षितिखगटङ्कणलवणान्वितं; सर्जी प्रतीता साजीति लोके; क्षितिः स्फटिका, खगः कासीसं, टङ्कणं सौभाग्यं 'सोहागा' इति लोके; लवणं सैन्धवं, तदभावे लवणाष्टकेषु यत्र यल्लभ्यं तदेव योज्यं, लवणोद्देशः,–"सैन्धवं रुचकं कृष्णं विडं सामुद्रमौद्भिदम् । रोमकं पांशुजं चेति लवणाष्टकमुच्यते"

इति, एतैरन्वितं मिलितं कुर्यात्। तदारनालं गगनादिकभावने अभ्रकादिद्रावने शस्तं प्रधानं; अभ्रकादिका अग्रे वक्ष्यमाणाः। "निर्मुखा समुखा चेति द्विविधा चारणा मता। निर्मुखा चारणा प्रोक्ता बीजाधानेन भागतः॥ शुद्धं स्वर्णं च रूप्यं च बीजमित्यभिधीयते। चतुःशष्ठ्यंशतो बीजप्रक्षेपो मुखमुच्यते॥ एवं कृते रसो ग्रासलोलुपो मुखवान् भवेत्। कठिनान्यपि लोहानि क्षमो भवति भक्षणे[1]॥ इयं हि समुखा प्रोक्ता चारणा वरवार्तिकैः"—इति। अभ्रकाद्यपधातूनां निर्मुखचारणं, हेमादिधातूनां समुखचारणं, इति विवेको ज्ञेयः। रसायने शरीरकार्ये नागवङ्गौ न चारणीयौ, किंतु स्वर्णादिकं बीजं चारणीयमिति भावः॥ ७॥

तस्मिन्नागं शुद्धं प्रद्राव्य निषेचयेच्छतं वारान्।
वङ्गं वा तारविधौ, रसायने नैव तद्योज्यम्॥ ८॥

आदिशब्देन[2] नागवङ्गयोरधिकारविशेषमाह—तस्मिन्नित्यादि। तस्मिन्पूर्वोक्तसंधाने, शुद्धं निर्मलीकृतं, नागं सीसकं, प्रद्राव्य जलरूपं विधाय 'वह्नियोगात्' इति शेषः, निषेचयेत् निषेक कर्तव्यः; वा तत्रैव संधाने वङ्गं रङ्गं प्रद्राव्य निषेचयेत्। कतिवारान्? शतं वारान् प्रतिशतमित्यर्थः। तद्वङ्गं तारविधौ रूप्यविधाने योज्यं, रसेन सह मिलितं कार्यमित्यर्थः। अस्यामार्यायां स्वर्णाधिकारेऽनुक्तमपि नागं ग्रन्थान्तरात्समायोज्यमिति विशेषार्थः। तन्नागं वङ्गं च रसायने शरीरसिद्धिनिमित्तं न योज्यमिति; यतो नागवङ्गप्रभवावौपाधिकौ दोषौ गलवन्धगुल्मदौ कथितौ। एतन्नागं वङ्गं च ग्रासार्थे योज्यमिति युक्तं, यत एतेनान्तर्गतेनान्यदपि ग्राह्यं द्रव्यं ग्रसतीति भावः। वङ्गे विशेषः,—"खुरकं मिश्रकं चेति द्विविधं वङ्गमुच्यते। खुरकं गुणतः श्रेष्ठं मिश्रकं न रसे हितम्"—इति, रजतकर्मणि योग्यं ग्राह्यम्[3]॥ ८॥

गगनरसोपरसामृतलोहरसायसादिचूर्णानि[4]।
सर्वमनेन हि भाव्यं यत्किंचिच्चारणावस्तु॥ ९॥

गगनादिक्रमं स्पष्टयन्नाह—गगनेत्यादि। अनेन पूर्वोक्तसंधानेन सर्वं सकलं भाव्यं भावितं कुर्यात्। सर्वमिति किं? गगनरसोपरसामृतलोहरसायसादिचूर्णानि। गगनमभ्रकं वज्रसंज्ञिकं; रसा महारसा हिङ्गुलस्वर्णमाक्षिकरूप्यमाक्षिकशिलाजतुचपलचुम्बकवैक्रान्तखर्परगैरिकस्फटिककासीससंज्ञकाः; अमृतं विषं; वा अमृतलोहाः न मृता अमृताः, अमृताश्च ते लोहाश्च धातव इति;

---

१ 'कठिनानां हि लोहानां क्षमो भवति भक्षणे' इति पा०। २ 'आदिशब्दात्' इति पाठान्तरम्। ३ 'वङ्गं' इति पाठान्तरम्। ४ 'गगनरसोपरसामृतलोहसुसंयोगजानि चूर्णानि' इति पाठः साधुः। गगनं, रसाः, उपरसास्तथा अमृता न मारिताः भस्मीकृता लोहाः, एतेषां सुसंयोगेन सम्यग्योगेन जातानि चूर्णान्यनेन संधानेन भाव्यानीति तात्पर्यम्।

रसाः पूर्वोक्ताः; आयसा लोहाः; तेषां संयोगजानि यानि चूर्णानि कल्कानि, शुल्बाभ्रादीनि । आदिशब्दादुपरसानामपि ग्रहणम् । न केवलमेतान्येव संधानेन भाव्यानि, किन्त्वन्यदपि यत्किंचिच्चारणावस्तु चारणयोग्यं द्रव्यरत्नादिकं तदप्येतेन संधानेन भाव्यं चारणार्थम् ॥ ९ ॥

आदौ खल्वे मृदितां पिष्टीं हेम्नश्च तां रसश्चरति।
तारस्य तारकर्मणि दत्त्वा सूते ततो गगनम् ॥ १० ॥

स्वर्णरूप्ययोरधिकारविशेषमाह—आदावित्यादि । ततोऽनन्तरं हेम्नः स्वर्णस्य पिष्टीं खल्वे मृदितां 'वक्ष्यमाणेन' इति शेषः । तां पिष्टीं रसश्चरति । किं कृत्वा पिष्टीं दद्यात् ? आदौ प्रथमतः सूतेश्वरे गगनमभ्रकं दत्त्वा । हेम्नोऽधिकारो दर्शितः । हेमकर्मणि हेमैव, तारकर्मणि तारमेव दद्यात्। हेम्नि विशेषः,—"स्वर्णं पञ्चविधं प्रोक्तं प्राकृतं सहजाग्निजम् । एतत्स्वर्णत्रयं चैव योज्यं षोडशवर्णकम् ॥ खनिजं रसवादोत्थं सुपत्रीकृतशोधितम् । तच्चतुर्दशवर्णाढ्यं मनुजानां रुजापहम्"—इति । तारेऽपि विशेषः,—"कैलासे सहजं रूप्यं खनिजं कृत्रिमं तथा । व्युत्क्रमेण गुणैः श्रेष्ठं नागोत्तीर्णं[१] रसे हितम्"—इति । तारमपि पूर्ववर्णं चार्यम् ॥ १० ॥*

त्रुटिशो दत्त्वा मृदितं सारे खल्वेऽभ्रहेमलोहादि ।
चरति रसेन्द्रः क्षितिखगवेतसबीजपूराम्लैः ॥ ११ ॥

पिष्टीमर्दने पात्रौषधान्याह—त्रुटिश इत्यादि । अभ्रहेमलोहादीति अभ्रमभ्रकं प्रतीतं, हेम कनकं तदेव लोहः; अभ्रकं च हेमलोहश्च तावादी यस्य तत् । एवंविधं द्रव्यं क्षितिखगवेतसजबीजपूराम्लैः क्षितिश्च खगश्च वेतसं च बीजपूरश्च क्षितिखगबीजपूराः, बीजपूरो मातुलुङ्गः, तेषां त्रयाणामम्लाः, तैर्मृदितं घर्षितं सत् रसेन्द्रश्चरति । किंकृत्वा मृदितं ? त्रुटिशोऽल्पमात्रं (दत्त्वा) । कस्मिन् ? सारे खल्वे । सारस्य तीक्ष्णजातस्यायं सारः, तस्मिन्नेवंविधे । सारे

---

१ नागोत्तीर्णमिति कैलासपर्वतोत्थमित्यर्थः ।

* अस्या आर्याया विपरीतोऽर्थष्टीकाकारेण दर्शित इति प्रतिभाति । प्रथमतः सूतेश्वरेऽभ्रकं दत्त्वाऽनन्तरं हेमतारयोः पिष्टी दातव्येति टीकाकृत आशयः । परं गोविन्दभिक्षोराशय एवं प्रतिभाति–आदौ यथाकार्यं हेमतारयोर्बीजभूतयोः पिष्टीं सूतेश्वरे दत्त्वा, तन्मुखेन दुश्चार्यमभ्रकमनन्तरं सूते दातव्यम् । हेमतारे च सुचार्ये, गगनमपि दुश्चार्यं तन्मुखेन रसश्चरतीति भावः । संपादकः ।

विशेषः,—"मुण्डं तीक्ष्णं तथा कान्तं भेदास्तस्य[1] त्रयोदश । मृदु कुण्ठं च कडारं त्रिविधं मुण्डमुच्यते ॥ खरसारं च हन्नालं तारावर्तं विडं तथा । काललोहं गजाख्यं च षड्विधं तीक्ष्णमुच्यते ॥ कान्तं लोहं चतुर्धोक्तं रोमकं भ्रामकं तथा । चुम्बकं द्रावकं चेति गुणास्तस्योत्तरोत्तराः"—इति । खल्वो यथा,—"खल्वोऽश्माद्यो निरुद्गारो द्विरङ्गुलकटाहकः । अष्टाङ्गुला वटी कार्या दीर्घा[2] वा वर्तुला तथा ॥ द्वादशाङ्गुलदीर्घेण मर्दकश्चतुरङ्गुलः । मुखं वृत्तं तु कर्तव्यं दर्पणोदरसंनिभम्"—इति । अश्माद्य इति अश्मलोहार्काणां ज्ञातव्यः ॥ ११ ॥

समुखं निर्मुखमथवा तुल्यं द्विगुणं चतुर्गुणं वापि ।
अष्टगुणं षोडशगुणमथवा द्वात्रिंशता गुणितम् ॥ १२ ॥
इति पत्राभ्रकमुक्तं तेन विधानेन चारयेत्सूतम् ।
ग्रासः पिष्टी गर्भस्त्रिलक्षणा चारणा भवति ॥ १३ ॥

धात्वादीनां चारणायां परिमाणमाह—समुखमित्यादि । इति पूर्वोक्तं पत्राभ्रकमुक्तं पत्राभ्रकचारणमित्यर्थः । समुखं मुखसहितं चारणं भवतु वाऽथ निर्मुखं मुखवर्जितं चारणं भवतु उभयत्रापि तुल्यं समानं सूतं चारयेत्; धात्वादीनिति शेषः। अत्र विकल्पः–द्विगुणं सूताद्विगुणितं चारयेत्, वा चतुर्गुणं सूताच्चतुर्गुणितं, वा अष्टगुणं सूतादष्टगुणितं, वा षोडशगुणं सूताच्छोडशगुणितं, वा द्वात्रिंशता गुणितं सूताद्द्वात्रिंशद्गुणितं चारयेत् । तेन विधानेन पूर्वोक्तेन विधानेन त्रुटिशो दत्त्वेत्यादिना । चारणा त्रिलक्षणा भवति त्रीणि लक्षणानि चिह्नानि यस्यां सा तथोक्ता । कथं ? ग्रासः अभ्रकस्य ग्रासनं[3] निर्मुखत्वेन समुखत्वेन वा; अपरा पिष्टी रसेनाभ्रादेर्मेलनं; पुनर्गर्भो रसस्य गर्भे रसरूपं गगनं तिष्ठतीति । श्लोकद्वयान्वयसंबन्धाद्युग्मम् ॥ १२ ॥ १३ ॥

दोलनविधिना यैरपि नानाविधभङ्गसंस्कृतं गगनम् ।
मारणविधिनोद्दिष्टं पिष्टं वाऽनल्पमानैस्तैः ॥ १४ ॥

इति गगनादिग्रासप्रमाणं कथितं; अथ चारणाविधानमाह—दोलनविधिनेत्यादि । गगनमभ्रकं यैरौषधैः पिष्टं पेषितं भवति तैरेवौषधैर्नाल्पमानैर्बहुमानैर्नानाविधभङ्गसंस्कृतं, कुर्यादिति शेषः । नानाविधा अनेकप्रकारा ये भङ्गास्तरङ्गा आगमाब्धिजातास्तैः संस्कृतमुपस्कृतम् । किंविशिष्टं गगनं ? मारणविधिना पञ्चत्वविधानेन उद्दिष्टमुद्देशितम् । एवंविधमपि गगनं दोलनविधिना चारणायां योज्यमिति भावः ॥ १४ ॥

---

१ तस्य नाम लोहस्य । लोहस्य त्रयोदश भेदाः–त्रिविधं मुण्डं, षड्विधं तीक्ष्णं, चतुर्विधं कान्तमिति । २ 'दीर्घो वा वर्तुलस्तथा' इति पाठान्तरम् । ३ 'अभ्रके रसस्य ग्रासनं' इति पाठान्तरम् ।

अन्येऽपि तुच्छमतयो गन्धकनिष्पिष्टिशुल्वपिष्टिरजः ।
दोलनविधिनोद्भूतं रसजीर्णं[1] तदिति मन्यन्ते ॥ १५ ॥

अधुनाऽल्पमतीनां मतमाह—अन्य इत्यादि । अन्ये महद्भ्योऽपरे तुच्छमतयः तुच्छा स्तोका मतिर्बुद्धिर्येषां ते तथोक्ताः, अल्पबुद्धय इति यावत् । रसं जीर्णं जारणसंस्कारोपपन्नं रसं मन्यन्ते इति । किं? गन्धकनिष्पिष्टिशुल्वपिष्टिरजः गन्धकेन या निष्पिष्टिः पिष्टीभूता, शुल्वेन या पिष्टिः पिष्टीभूता ताम्रपिष्टीत्यर्थः; गन्धकनिष्पिष्टिश्च शुल्वपिष्टिश्च तयोर्यद्रजः पांशुः । गन्धकपिष्टी यथा,—"गन्धपाषाणचूर्णं च चणकस्य रसेन तु । भावयेत्सप्तवारं तु स्त्रीरक्तेन च सप्तधा ॥ शुद्धसूतं पलैकं तु खर्परे दापयेत्ततः । भावितं गन्धकं दद्यान्नरपिण्डेन[2] संयुतम् ॥ दोलायन्त्रेऽपि तापेन पिष्टिका भवति क्षणात्"–इति । एवं शुल्वपिष्ट्यपि जायते । किंभूतं गन्धकनिष्पिष्टिशुल्वपिष्टिरजः? दोलनविधिनोद्भूतं दोलिकायन्त्रविधानेनोत्पन्नम् । इति यदुक्तं तदसमञ्जसमिति भावः ॥ १५ ॥

तैलादिकतप्तरसे हाटकतारादि गोलकमुखेन ।
चरति घनं रसराजो हेमादिभिरेति पिण्डत्वम् ॥ १६ ॥

समुखचारणान्तर्भूतं वासनामुखचारणं दर्शयन्नाह—तैलेत्यादि । रसराजः पारदो, हाटकतारादि स्वर्णरूप्यादि धातुद्रव्यं कृत्रिमाकृत्रिमात्मकनवसंख्याकं पूर्वमुक्तं, चरति भक्षति । केन? गोलकमुखेन । गोलकश्च मुखविशेषः, तेन बिडस्य गोलकेनेत्यर्थः । क्व सति? तैलादिकतप्तरसे सति । तैलं आदिः येषां ते तैलादिकास्तैलवसामूत्रशुक्रपुष्पाः, एतैस्तप्तो यो रस उष्णत्वं नीतो योऽसौ पारदस्तस्मिन् सति, एवं घनमभ्रकं चरति रसेन्द्रः । पुनर्हेमादिभिर्नवकैर्ग्रासीकृतैः पिण्डत्वमेति निबिडत्वं प्राप्नोति । तैलानि यथा,—"कङ्गुणीतुम्बिनीघोषाकरञ्जश्रीफलोद्भवम् । कटुवातारिसिद्धार्थसोमराजीविभीतजम् ॥ अतसीजं महाकालीनिम्बजं तिलजं तथा । अपामार्गो देवदाली दन्तीतुम्बरुविग्रहाः (?) । अङ्कोलोन्मत्तभल्लातफलेभ्यस्तैलसंभवः"–इति । वसा यथा—"अजोष्ट्रखरमेषाणां महिषस्य वसा तथा"—इति । मूत्रपुष्पशुक्राणि यथा,—"मूत्राणि हस्तिकरभमहिषीखरवाजिनाम् । स्त्रियः पुंसस्तथा मूत्रं पुष्पं वीर्यं च योजयेत्"—इति ॥ १६ ॥

अन्ये स्वच्छं कृत्वा शुकपिच्छमुखेन चारयन्ति घनम् ।
सिद्धोपदेशविधिना अशितग्रासे न शुष्केण ॥ १७ ॥

तस्मिन्नभिप्रायेऽन्यमतमाह–अन्य इत्यादि । एके उक्तविधानेन चारणां कुर्वन्ति । अन्ये अपरे, रसं पारदं, स्वच्छं कृत्वा स्वेदनाद्यष्टसंस्कारोपसंस्कृतं विधाय

---

१ 'संजीर्णं' इति पाठान्तरम् । २ 'नरमूत्रेण' इति पाठान्तरम् ।

वा हिङ्गुलोत्थं, घनमभ्रकं चारयन्ति अभ्रकस्य चारणां कुर्वन्ति । केन ? शुकपिच्छमुखेन; शुकपिच्छं सन्धानविशेषः, मुखं विशेषो येषां सन्धानानां तेन । क्व सति चारयन्ति? अशितग्रासे सति भुक्तकवले सति, पुनश्चार्यमित्यर्थः । केन ? सिद्धोपदेशविधिना; सिद्धा रससिद्धा नित्यनाथवीरनाथादयः पूर्वोक्ताः, तेषां य उपदेशविधिस्तेन । न शुष्केण संधानेनार्द्रीभावात् नीरसतां प्राप्तेन पुनश्चारणा न स्यात् । शुकपिच्छं यथा,—"भस्मक्षारान् सुशुष्कांस्तु क्षारांश्च लवणानि च । आलोड्य ह्यम्लवर्गेण शुल्बभाण्डे निधापयेत् ॥ यावच्च शुकपिच्छाभमभ्रकं तेन भावयेत् । ग्रसते तत्क्षणात्सूतो गोलकस्तु विधीयते—" इति ॥ १७ ॥

अथवा माक्षिकगगनं समभागं पटुयुतं पक्कम् ।
प्रक्षिप्य लोहपात्रे स्वेदान्तश्चरति कृष्णाभ्रम् ॥ १८ ॥

अन्यमताभिप्राये प्रकारान्तरमाह—अथवेत्यादि । पूर्वोक्तं विधानं कुर्यात्; अथवा पक्षान्तरे, इदं वक्ष्यमाणं कुर्यात् । माक्षिकगगनमिति माक्षिकेन युक्तं गगनं अभ्रकं, समभागं द्वयं तुल्यभागं, पुटितं भावितं यत् पटु सैन्धवं लवणं, शास्त्रान्तरसाम्यादम्लवर्गेण पुटितं, तेन युतं मिलितं सत् पक्कं वह्निपुटितं, 'कुर्यात्' इति शेषः । किं कृत्वा? लोहपात्रे मुण्डादिभाजने प्रक्षिप्य मध्ये स्थाप्य । एवंविधं कृष्णाभ्रं स्वेदान्तर्वह्नितापमध्ये रसः पारदश्चरति ग्रसति, माक्षिकसंयोगात् क्षिप्रमिति भावः ॥ १८ ॥

तं प्रवक्ष्याम्युपदेशं गन्धाभ्रकसंप्रवेशनं येन ।
पक्षच्छिन्नश्च रसो योग्यः स्याद्रसरसायनयोः ॥ १९ ॥

उपदेशविधानमाह—तमित्यादि । येनोपदेशेन गन्धाभ्रकप्रवेशनं गन्धपाषाणसंयोगाद्यदभ्रप्रवेशनं भवति अभ्रस्य पारदान्तःप्रवेशो भवति तमुपदेशमहं कविर्वक्ष्यामि कथयिष्ये । अतिसामीप्याद्वर्तमान एव लट् । तु पुनः । पक्षच्छिन्नश्च रसः रसरसायनयोर्योग्यः रसे ज्वरादिरोगनाशके ज्वराङ्कुशादौ, रसायने च जराव्याधिनाशने प्रयोगे योग्यः समर्थः । यथा **मञ्जर्यां**,—"मारितो देहशुद्ध्यर्थं मूर्च्छितो व्याधिनाशनः । रसभस्म क्वचिद्रोगे देहार्थे मूर्च्छितं क्वचित् ॥ बद्धं द्वाभ्यां प्रयुञ्जीत शास्त्रदृष्टेन कर्मणा"—इति । गन्धाभ्रकप्रवेशेन पक्षच्छिन्नोऽचलो भवेदिति भावः ॥ १९ ॥

रसराजरागदायी बीजानां पाकजारणसमर्थः ।
सूतकपक्षच्छेदी रसबन्धे गन्धकोऽभिहितः ॥ २० ॥

गन्धकं विशेषयन्नाह—रसराजेत्यादि । रसबन्धने पारदबन्धने गन्धकोऽभितः लेलिनकः सर्वोत्कृष्टः । कुतः ? यतः सूतकपक्षच्छेदी; गन्धकः सूतस्य पारदस्य

पक्षौ छिनत्ति । पुनः कुतः ? रसराजरागदायी; रसराजः पारदः, तस्य रागं रञ्जनं ददातीति । पुनः कुतः ? बीजानां पाकजारणसमर्थः; पाकश्च जारणं च पाकजारणे, तयोर्हेमादीनां पाकजारणयोः समर्थो योग्यः । उक्तैस्त्रिभिर्हेतुभिर्गन्धकः सर्वोत्कृष्ट इत्यर्थः ॥ २० ॥

दत्त्वा खल्वे त्रुटिशो गन्धकमादौ रसं च त्रुटिशोऽपि ।
तावच्च मर्दनीयं यावत्सा पिष्टिका भवति ॥ २१ ॥
तदनु च द्रुतबलिवसया समभागनियोजितं तथा गगनम् ।
त्रुटिशो रसं च दत्त्वा कुर्वीत यथेप्सितां पिष्टिम् ॥ २२ ॥
साऽपि च दीप्तैरुपलैर्निपात्यतेऽधोऽथ दीपिकायन्त्रे ।
तदनु च निर्मुक्तमलो निकृन्तपक्षोऽभ्रगन्धाभ्याम् ॥ २३ ॥

गन्धकाभ्रकाभ्यां रसपक्षापकर्तनं यथा स्यात्तथाऽऽह—दत्त्वेत्यादि । आदौ प्रथमं, खल्वे लोहार्काश्ममये, गन्धकं त्रुटिशो दत्त्वा अल्पमात्रं वारं वारं गन्धरसौ दत्त्वा, तावमन्र्दनीयं यावत्सा पिष्टिका एकशरीरता भवति, कज्जलिकेति व्यक्तार्थः । तदनु तत्पश्चात् रसगन्धकपिष्टीकरणानन्तरं, तत्र रसगन्धकपिष्ट्यां गगनमभ्रकं समभागनियोजितं गन्धकरसाभ्यां तुल्यांशं मिलितं कार्यमित्यर्थः । कया कृत्वा ? द्रुतबलिवसया द्रुता द्रवीभूता या बलिवसा भेकमत्स्यकर्कटशिशुमाराणां तैलरूपा शरीरजाता, तया । समभागाभ्रकनियोजनानन्तरं बलिवसया मर्दनं कार्यमिति तात्पर्यार्थः । बलिवसा यथा,—"भेकमत्स्यभवा या तु कर्कटस्य वसाऽथवा । भाव्यमेभिः क्रमाद्गन्धं शिशुमारवसाऽपि वा ॥ एतास्वेका बलिवसा सम्यक् सूतस्य बन्धिनी । रञ्जनं चैव कुरुते मणिमूषाविधिक्रमात् ॥ एषा बलिवसा नाम क्षणाद्बध्नाति सूतकम्"—इति । रसगन्धाभ्रपिष्टिं कुर्वीतेत्यर्थः । सा पूर्वोक्ता रसगन्धाभ्रपिष्टिः, अथेत्यनन्तरं, दीपिकायन्त्रेऽधःपातने, रसो निर्मुक्तमलस्त्यक्तदोषो भवति । तस्मिन्निर्मुक्तमले सति निकृन्तपक्षः छिन्नपक्षो भवति । काभ्यां ? अभ्रगन्धाभ्यां; अभ्रं च गन्धश्च अभ्रगन्धौ ताभ्यां; गन्धकान्तःसंयोगात्सुखं रसाभ्रपिष्टिर्भवेत्, यतो गन्धको द्वन्द्वमेलनसमर्थः, किं पुनर्बलिवसयेति तृतीयश्लोकार्थः । कुलकमिति ॥ २१–२३ ॥

भस्माकारश्च रसो हेम्ना सह युज्यते स च द्वन्द्वे ।
अथवा गन्धकपिष्टिं पक्त्वा द्रुतगन्धकस्य मध्ये तु ॥ २४ ॥

पूर्वसंस्कृतरसस्याकारं कार्यान्तरसंपत्तिं चाह—भस्मेत्यादि । च पुनः । ततोऽधःपातनाद्रसो भस्माकारो भस्मसदृशो भवेत् । स च भस्माकारो रसः हेम्ना

स्वर्णेन सार्धं द्वन्द्वे उभयमेलने युज्यते; 'कर्मविदा' इति शेषः। अथवा समुच्चये, अव्ययोरेकार्थसंबन्धात्पक्षान्तरे च। अथवा हेम्ना सह पूर्वरसविधानेन गन्धपिष्टिं कुर्यात्; अथवा द्रुतगन्धकस्य द्रवीभूतगन्धकस्य मध्ये पक्त्वा वह्नियोगेन सुपक्कं कृत्वा रसपिष्टिवत् रसहेमगन्धपिष्टिं कुर्यादित्यर्थः ॥ २४ ॥

सा चापि हेमपिष्टिर्विपच्यते गन्धके भूयः ।
इत्थं हेम्ना सूतो मिलति द्वन्द्वे तथा क्षणान्म्रियते ॥ २५ ॥

पूर्वोद्दिष्टस्य द्वन्द्वमेलनस्य विधानमाह–सेत्यादि । च पुनः । सा पूर्वोक्ता, हेमपिष्टिः रसहेमगन्धकृतरेतसोः(?) संबन्धः सदातनः। हेम्ना मिलिता या पिष्टिमेलनविशेत्सा हेमपिष्टी, भूयः पुनः, गन्धके विपच्यते युक्त्या पाकः कार्यः पूर्ववद्गन्धके। इत्थं उक्तविधानेन हेम्ना सह सूतः पारदो मिलति ग्रन्थिमेति। क्व सति ? द्वन्द्वे सति उभयसंयोगे सति। तथोक्तविधानेन द्वन्द्वे मिलति सति तत्कालादल्पकालतो म्रियते पञ्चत्वमुपयाति । अल्पक्रियान्तरकरणान्मृतो भवतीति भावः। इति पक्षच्छेदविधिः ॥ २५ ॥

इतरे पक्षच्छेदं द्वन्द्वे रसमारणं न वाञ्छन्ति ।
बीजानामपि पाकं हृष्यन्ति च तदनु तप्यन्ति ॥ २६ ॥

एतावता रसपक्षकर्तनेन नालं भवितव्यमित्याह—इतरे इत्यादि। ये पुरुषा इति उक्तविधानेन पक्षच्छेदं रसपक्षापकर्तनं वाञ्छन्ति, पुनः द्वन्द्वे रसमारणं द्वन्द्वेन पूर्वोक्तेन रसहेमगन्धकेन कृत्वा यद्रसमारणं तन्न वाञ्छन्ति, पुनर्बीजानामपि रक्ताभ्रहेमरसकादीनामपि पाकं वह्नियोगेन सुपक्ककरणं न वाञ्छन्ति, ते पुरुषाः पूर्वं पक्षच्छेदं ज्ञात्वा हृष्यन्ति हर्षयुक्ता भवन्ति, पक्षच्छेदं विनाऽन्यकार्यसिद्धिं ज्ञात्वेत्यर्थः; तदनु च कार्यासिद्धौ तप्यन्ति परितापयुक्ता भवन्ति ॥ २६ ॥

इत्थमनेकैर्दोषैर्बहुश्रमैर्गगनचारणं मत्वा ।
निर्दिश्यते प्रकारः कर्मणि शास्त्रेऽपि संवादी ॥ २७ ॥

गगनचारणं निर्दिश्यान्यसंस्कारं स्तुवन्नाह–इत्थमित्यादि । मया ग्रन्थकर्त्रा अस्मिन् शास्त्रे कर्मण्यपि संवादी प्रकारः अग्रिमप्रकरणे सत्वनिष्कासनरूपः निर्दिश्यते निर्देशः क्रियते। संवेद्यते संस्क्रियते संस्कारविद्भिरिति संवादी । किं कृत्वा ? इत्थमुक्तप्रकारेण, अनेकैर्दोषैः अनेककष्टैः, बहुश्रमैर्बह्वायासैर्गगनचारणं मत्वा अभ्रकचारणं ज्ञात्वा । गगनचारणानन्तरमन्योत्कृष्टप्रकारो निर्दिश्यत इति भावः ॥ २७ ॥

अग्राह्यो निर्लेपः सूक्ष्मगतिर्व्यापकोऽक्षयो जीवः ।
यावद्विशति न योनौ तावद्बन्धं कुतो भजते ॥ २८ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते रसहृदयाख्ये तन्त्रे निर्मुखवासनामुखान्तर्भूतसमुखपत्राभ्रकचरणात्मकस्तृतीयोऽवबोधः ।

प्रकारान्तरं दर्शयन्नाह–अग्राह्य इत्यादि । एवंविधो हरजो यावद्योनौ अभ्रके न विशति न मिलति तावद्बन्धं बन्धनं कुतो भजते प्राप्नोति न कुतोऽपि, योनावप्रविशति सति न बन्धनमाप्नोतीत्यर्थः । किंविष्टो हरजः ? अग्राह्यः; हरः कथमपि न गृह्यतेऽनवयवत्वात्, हरजस्तद्गुण एव, कारणानुरूपं कार्यमिति न्यायात् । पुनः किंविशिष्टो ? निर्लेपः; वैकारिकैर्दोषगुणैर्न लिप्यत इति, दोषगुणनिवृत्तेः । पुनः सूक्ष्मगतिः सूक्ष्मा गतिर्गमनं प्रवर्तनं वा यस्य सः, धूमरूपावलोकनत्वात् । पुनर्व्यापकः, देहलोहादेर्व्यापकत्वात् । पुनरक्षयः न क्षयो यस्येत्यक्षयः, सर्वदा भावरूपत्वात् । पुनर्जीवः अजीवे प्रकाशत्वाभावः । स्वत्वं विहाय मलिनोपाधिकत्वान्निरुपाधावुपाधिसंपत्तिरिति तात्पर्यार्थः । तदाश्रया, तद्विषया, अनाद्यविद्येति वेदान्तवचनात् ॥ २८ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां मुग्धाववोधिन्यां रसहृदयटीकायां निर्मुखवासनामुखान्तर्भूतसमुखपत्राभ्रकचारणात्मकस्तृतीयोऽवबोधः ॥ ३ ॥

अथ चतुर्थोऽवबोधः ।

अथाभ्रकसत्वचारणा ।

कृष्णो रक्तः पीतो ध्मातोऽपि स्थूलतारकारहितः ।
वज्री स पीतकर्मणि पातितसत्वो घनो योज्यः ॥ १ ॥

अधुनाऽभ्रसत्वचारणं, तत्र पीतकर्मणि गगनवर्णभेदानाह–कृष्ण इत्यादि । कृष्णो घनो, रक्तो घनः, पीतो घनश्चेति त्रिविधः; पातितसत्वः पातितं सत्वं यस्येति समासः । एवंविधो वज्री पीतकर्मणि सुवर्णकार्ये योज्यः । वज्रिणो लक्षणं ध्मातोऽपि हठाग्नौ संयोजितोऽपि यः स्थूलतारकारहितो भवति, स्थूलाश्च तास्तारकाश्च ताभी रहितः; दलसमुच्चयरूपाः स्थूलतारकाः । अनुक्तोऽपि श्वेतवर्णो घनः श्वेतकर्मणि योज्यः; ग्रन्थान्तरसाम्यादयमभिप्रायः । यथा ग्रन्थान्तरे,–"रक्तं पीतं कृष्णं शस्तं हेमक्रियासु गगनं हि । तारक्रियासु शुक्लं रसायने सर्वमेव तु श्रेष्ठम्"–इति । अभ्रेऽपि वृत्तिकृद्विशेषमाह,–"कदाचिद्गिरिजा देवी हरं दृष्ट्वा मनोहरम् । अमोचयत्तदा वीर्यं तज्जातं श्वेतमभ्रकम् ॥ श्वेतं रक्तं तथा पीतं कृष्णं तद्भूमिसंगमात् । पिनाकं दर्दुरं नागं वज्राभ्रं च चतुर्विधम् ॥ ध्मातं वह्नौ दल-

चयं पिनाकं विसृजत्यलम् । फूत्कारं भुजगः कुर्याद्दर्दुरं भेकशब्दवत् ॥ चतुर्थं खेचरं वज्रं नैवाग्नौ विकृतिं भजेत् । तस्माद्वज्राभ्रकं श्रेष्ठं व्याधिवार्धक्यमृत्युजित्''—इति ॥ १ ॥

निश्चन्द्रिकं हि गगनं वासितमपि वासनाभिरिह शतधा ।
तदपि न चरति रसेन्द्रः सत्वं कथमत्र यत्नतः प्रभवेत् ॥२॥

चारणायामभ्रपत्रे वैषम्यं, सत्वे च सुगमत्वं सूचयन्नाह—निश्चन्द्रिकमित्यादि । इहास्मिन् चारणासंस्कारे, निश्चन्द्रिकं गगनं तारकारहितमभ्रं, वासनाभिः पूर्वोक्ताभिर्वासनौषधिभिः, शतधा शतप्रकारं, वासितं मथितमपि, रसेन्द्रः पारदः, तदपि बहुश्रमैः संस्कृतमप्यभ्रं, न चरति न ग्रासीकरोति । अत्र चारणे, सत्वं यत्नतः प्रयत्नात् कथं प्रभवेत् कथं (अपि) समर्थीभवेत्, सत्वं यत्नतः समर्थीभवेदित्यर्थः ॥ २ ॥

मुक्त्वैकमभ्रसत्वं नान्यः पक्षापकर्तनसमर्थः ।
तेन निरुद्धप्रसरो नियम्यते बध्यते च सुखम् ॥ ३ ॥

सुगमत्वाद्गुणाधिकत्वाच्च सत्वं प्रशंसति—मुक्त्वेत्यादि । अभ्रसत्वमेकं मुक्त्वा त्यक्त्वा, अन्योऽपरो रसपक्षापकर्तनसमर्थो न पारदपक्षच्छेत्ता न; तेन सत्वेन सुखं यथा स्यात्तथा रसः पारदो नियम्यते पारदस्य नियमनं भवेदित्यर्थः, बध्यते च बन्धनं प्राप्यते, रसो बद्धो भवतीत्यर्थः । किंभूतः सन् नियमनं बन्धनं च प्नोति ? निरुद्धप्रसरः सन्; निरुद्ध आरुन्धितः प्रसरः प्रसरणं प्रकृष्टेन गमनं यस्य तादृशः सन् ॥ ३ ॥

पक्षच्छेदमकृत्वा रसबन्धं कर्तुमीहते यस्तु ।
बीजैरेव हि स जडो वाञ्छत्यजितेन्द्रियो मोक्षम् ॥४॥

रसबन्धनेऽधिकारित्वं दर्शयन्नाह—पक्षच्छेदमित्यादि । यो वादी अभ्रसत्वग्रसनेन विना पक्षच्छेदमकृत्वा पक्षापकर्तनमविधाय, रसबन्धं कर्तुं पारदबन्धनं विधातुं, ईहते चेष्टते, स वादी न, किन्तु जड एव अपण्डित इति भावः। कैः कृत्वा रसबन्धनं कर्तुमीहते ? बीजैः; रक्ताभ्रहेमरसकैरित्यादिभिः । एवाव्ययमन्यद्रव्यव्यवच्छेदी । पक्षच्छेदनं कृत्वा बन्धनं कार्यमयं विधिः, अन्यथा त्वविधिः । अविधेर्दृष्टान्तमाह—यथा अजितेन्द्रियो लम्पटः पुमान् मोक्षं वाञ्छति । अजितेन्द्रियजडयोः साम्यमिति ॥ ४ ॥

नाधः पतति न चोर्ध्वं तिष्ठति यन्त्रे भवेदनुद्गारी ।
अभ्रकजीर्णः सूतः पक्षच्छिन्नः स विज्ञेयः ॥ ५ ॥

पक्षच्छिन्नपारदस्य लक्षणमाह—नेत्यादि । एवंविधः पारदः सूतो यः स पक्षच्छिन्नः; पक्षौ छिन्नौ छेदितौ यस्येति समासः । स कः ? यो नाधः पतति;

अधःपातने कृते ऊर्ध्वतो अधोभागे न पतति; पुनरधोभागत ऊर्ध्वपातने कृते ऊर्ध्वं न याति; अनुद्वारी अचञ्चलो भवेत्, यन्त्रे स्वस्थ एव तिष्ठतीत्यर्थः । पुनः किंविशिष्टः ? अभ्रजीर्णः; अभ्रकं जीर्णं निःशेषतामाप्तं यस्मिन् रस इति समासः । ग्रासमात्रेण पक्षच्छेदो न जायते, यावन्न चारितमभ्रकं जरतीति ध्वन्यर्थः । स पक्षच्छिन्नः सूत इति ॥ ५ ॥

श्वेतादिचतुर्वर्णाः कथितास्ते स्थूलतारकारहिताः ।
वज्री सत्वं मुञ्चत्यपरे ध्माताश्च काचतां यान्ति ॥ ६ ॥

वज्राभ्रं विहाय पिनाकनागभेकाः सत्वमोचनेऽसमर्था इति दर्शयन्नाह—श्वेतेत्यादि । ये ध्माता स्थूलतारकारहिताः पत्रचयेन वर्जिता रक्तपीतकृष्णाः कथिताः पूर्वं वर्णितास्ते श्वेतादिचतुर्वर्णा भवन्ति । त्रयाणां रक्तपीतकृष्णवर्णाभ्राणां चेत् श्वेतवर्ण आदौ युज्यते तदा चतुर्वर्णा भवन्तीत्यर्थः । तेषां चतुर्वर्णानां मध्ये यो वज्री वज्रसंज्ञको घनः स सत्वं मुञ्चति ध्मातः सन् सत्वं त्यजति नान्ये । अपरे पिनाकनागभेकाह्वयाः ध्माताः सन्तः काचतां यान्ति काचाकारत्वमाप्नुवन्ति, न च सत्वनिर्गम इति ॥ ६ ॥

"सितरक्तासितपीता ये केचिदुदाहृता घना लोके ।"
अल्पबला निःसत्वा वज्री श्रेष्ठस्तु सर्वेषाम् ॥ ७ ॥

ससत्वबलवत्वाभ्यामुत्कृष्टत्वाद्वज्राभ्रं पुनः प्रशंसति—सितेत्यादि । लोके संसारे ये केचित् घना उदाहृताः कथितास्ते अल्पबलाः अल्पं बलं येषु ते तथोक्ताः । निःसत्वाः सत्ववर्जिताः, ध्मातेषु तेषु सत्वाभाव इत्यर्थः । ते के घनाः ? सितरक्तासितपीताः; श्वेतरक्तकृष्णपीतवर्णाः, नान्ये वर्णाः सन्तीति भावः । सर्वेषां चतुर्वर्णानां मध्ये वज्री वज्रसंज्ञकः श्रेष्ठः प्रधानः ॥ ७ ॥

सूतेऽपि रसायनिनां योज्यं परिकीर्तितं परं सत्वम् ।
त्रिविधं गगनमभक्ष्यं काचं किट्टं च पत्ररजः ॥ ८ ॥

देयमभ्रमाह—सूतेऽपीत्यादि । रसायनिनां रसायनं जराव्याधिविध्वंसिभेषजं विद्यते येषां येषु वा ते रसायनिनः तेषां, परं प्रधानं, सत्वमभ्रसत्वं, परिकीर्तितं संकथितं; यथा ग्रन्थान्तरे—"सत्वसेवी वयस्तम्भं कृतशुद्धिर्लभेत्सुधीः"—इति । अभ्रसत्वं सूतेऽपि पारदेऽपि परमुत्कृष्टं पक्षच्छेदनसमर्थं बलदं च । पुनस्त्रिविधं गगनं अभक्ष्यं अभोज्यं, रसायनिनां सूतेऽपि । किं तत्त्रिविधं ? एकं काचं वह्नौ धमनात्काचाकारतां नीतं, द्वितीयं किट्टं यद्धमनात्किट्टस्वरूपं प्राप्तं, तृतीयं पत्ररजः पत्राणां समाहितं यद्रज; तदेवं त्रिविधमभक्ष्यं, सदोषत्वात् ॥८॥

मुञ्चति सत्वं ध्मातस्तृणसारविकारकैर्घनः स्विन्नः ।
परिहृत्य काचकिट्टं ग्राह्यं सारं प्रयत्नेन ॥ ९ ॥

सत्वपातनविधानं दर्शयन्नाह—मुञ्चतीत्यादि । घनस्तृणसारविकारकैः खिन्नः तृणमेव सारो येषां ते तृणसाराः, तेषां ये विकारका विशेषास्तैरौषधैः सूर्यावर्तकादिभिः कृत्वा खिन्नो वह्नौ ध्मातो घनः सत्वं मुञ्चति सत्वपातं विदधाति। पुनः काचं किट्टं च परिहृत्य सत्वं पतितकाचकिट्टयुक्तं यदा भवति तदा प्रयत्नेन ग्राह्यमित्यर्थः ॥ ९ ॥

स्वेद्यो बध्वा पिण्डं माहिषदधिदुग्धमूत्रशकृदाज्यैः ।
अथ पञ्चगव्ययुक्तः सत्वं पातयति लोहनिभम् ॥ १० ॥

अधुना विशेषप्रकारान्तरमाह—स्वेद्य इत्यादि । स्वेद्यो घनः पूर्वोक्तैस्तृणसारविकारैः स्वेदितमभ्रं, स्वेदविधिरुक्तः; पुनर्घनस्य पिण्डं बध्वा; कैः सह ? माहिषदधिदुग्धमूत्रशकृदाज्यैः कृत्वा; महिष्या इदं माहिषं, एवंभूतं यद्दधि, दुग्धं, मूत्रं, शकृद्विष्ठा, आज्यं घृतं, चैतैः पिण्डं बध्वा । अथेति समुच्चये । पञ्चगव्यैः गवां दुग्धदधिमूत्रशकृदाज्यैः, संयुक्तः कार्यः, पिण्डं बध्वेत्यर्थः । एतत्पिण्डं लोहनिभं मुण्डप्रभं सत्वं पातयति, पूर्वसंबधात् 'घनस्य' इत्यध्याहारः ॥ १० ॥

सूर्यातपपीतरसाः स्वल्पं मुञ्चन्ति धातवः सत्वम् ।
स्वस्थानस्थाः सन्तो मुञ्चन्ति त एव भूयिष्ठम् ॥ ११ ॥

सूर्यातपपीतरसा इति सूर्यातपे सवितृघर्मे पीताः शोषिता रसा द्रवा यैः, एवंविधा धातवो ध्माताः सन्तः स्वल्पं ईषन्मात्रं सत्वं मुञ्चन्ति त्यजन्ति । पुनस्त एव सूर्यातपपीतरसा धातवः स्वस्थानस्थाः स्वकीयं यत्स्थानं द्रवेण स्थानपिण्डं रूपं(?) तस्मिन् तिष्ठन्तीति, एवंविधाः सन्तो बहलं भूयिष्ठं सत्वं मुञ्चन्ति द्रवन्तीत्यर्थः[1] । सूर्यातपीतरसा इति केषां ? सूर्यावर्तकदलीवन्ध्याकोटक्यादीनां द्रावकौषधीनाम् ॥ ११ ॥

बहुगम्भीरं ध्मातो वर्षति मेघः सुवर्णधाराभिः ।
देवमुखतुल्यममलं पतितं सत्वं तथा विन्द्यात् ॥ १२ ॥

पतितसत्वलक्षणमाह—बहुगम्भीरमित्यादि । मेघो घनो बहुगम्भीरं यथा स्यात्तथा ध्मातः सन्, सुवर्णधाराभिः शोभनवर्णधाराभिः, वा सुवर्णवत् कनकवत् वर्णो यासां ताभिः, निर्मलत्वात् प्रकाशकत्वाच्च, वर्षति धारापातं विद-

---

१ टीकाकारेणात्र विपरीतोऽर्थो गृहीत इति भाति । सूर्यातपेन पीताः रसाः येषां ते धातवः स्वल्पं सत्वं मुञ्चन्ति, त एव, ते एव धातवः स्वस्थानस्थाः भूगर्भस्थाः न तु सूर्यातप आविष्कृताः सन्तो भूयिष्ठं सत्वं मुञ्चन्तीत्याशयः प्रतिभाति । अत एवोक्तं रसरत्नसमुच्चये—"राजहस्तादधस्ताद्यत्समानीतं घनं खनेः । भवेत्तदुक्तफलदं, निःसत्वं निष्फलं परम्"—इति ।

धाति । कथंभूतं ? देवमुखतुल्यं वह्निना तुल्यं समं; अमलं निर्मलं, हरितपीतरक्तादिधूमरहितत्वात्; पतितं सत्वं तथा विन्द्यात् घनस्येत्यर्थः । तथा ग्रन्थान्तरे,—"भस्त्रानलेन तीव्रेण महाज्वाले हुताशने । अतिदीप्ते भवेद्बुद्धा[1] अङ्गाराः क्षयमागताः ॥ पुनरन्या न चेन्मूर्ध्नि द्विस्त्रिर्वाराणि बुद्धिमान् । यदा दीप्तो भवेद्वह्निः शुद्धज्वालो महाबलः ॥ पतितं तु तदा विन्द्यात् तत्सत्वं नात्र संशयः । पतितं तु पृथक्कार्यं किट्टाङ्गारविवर्जितम् ॥ निर्गुणं[2] लक्षयित्वा तु पुनर्धाम्यो यथावता । द्विस्त्रिरेवमशेषं तु ध्मातः सत्वं विमुञ्चति"—इति ॥ १२ ॥

यदि लोहनिभं पतितं जातं गगनस्य तद्रसश्चरति ।
मिलति च सर्वद्वन्द्वे ह्यौषधिभिश्चरति विनापि मुखैः ॥१३॥

लोहनिभं सत्वं सर्वोत्तममिति दर्शयन्नाह—यदीत्यादि । यदि चेद्गगनस्य जातं अभ्रकोद्भवं सत्वं मुण्डनिभं पतितं तदा तत्सत्वं रसः पारदश्चरति ग्रसति । कैर्विना ? मुखैर्विनापि रसस्य । लोहनिभं अभ्रसत्वं सूचितम् । अतिप्रीतित्वात्सर्वोत्तमत्वम् । सर्वद्वन्द्वे समस्तयुगलमिलापे मिलति च एतत्सत्वरसयोश्चेन्मेलनं क्रियते तर्हि एकशरीरतां याति, नान्यथा रसकादिभिः कृत्वा चरति, तदौषधीभिः कृत्वा चरति तदौषधीभिः ता एव पूर्वोक्ता वासनौषधयः ताभिः । किंभूतः समुखत्वेनेति ॥ १३ ॥

माक्षिकसहितं गगनं ध्मातं सत्वं मुखप्रदं भवति ।
तदनु च नागैर्वङ्गैः सहितं च मुखप्रदं सत्वम् ॥ १४ ॥

माक्षिकसत्वान्तरसंयोगात् सत्वस्य गुणाधिक्यं दर्शयन्नाह—माक्षिकेत्यादि । गगने भवं गगनं अण्प्रत्ययान्तं, 'णितो वा' (सा. अ. ६, पा. १, सू. २४) इति सूत्रेण न वृद्धिः; गगनं अभ्रसत्वम् । माक्षिके भवं माक्षिकं माक्षिकसत्वं; तेन सहितं पूर्वसत्वं चेत् ध्मातं तदुभयसत्वं मुखप्रदं भवति, 'रसस्य' इति शेषः । मुखं प्रकृष्टेन ददातीति समासः । तदनु च तत्पश्चाच्च नाङ्गैर्वङ्गैः सहितं पूर्वं यद्गगनं अभ्रसत्वं मुखप्रदमित्यर्थः । वा 'सुखप्रदं' इति पाठः; अस्मिन् योगे बहुक्लेशं विहाय सुखेन चारणं भवतीति विकल्पार्थः ॥ १४ ॥

माक्षिकसत्वे योगाद्घनसत्वं चरति सूतको निखिलम् ।
नियतं गर्भद्रावी स रज्यते बध्यते चैवम् ॥ १५ ॥

माक्षिकसत्वं मुख्यत्वेनाह—माक्षिकेत्यादि । सूतकः पारदो, घनसत्वं अभ्रसत्वं, निखिलं समस्तं, चरति । कस्मात् ? माक्षिकसत्वे योगात्; माक्षिकं स्वर्णमाक्षिकं

---

१ बुद्धा नाम ज्वलिता जागृता इत्यर्थः । २ निर्गुणं नाम किट्टकाचादिरहितं विशुद्धमित्यर्थः ।

तत्सत्वे यो योगस्तस्मात्। नियतं निश्चितम्। माक्षिकसत्वयोगाद्धनसत्वं चरति रसो गर्भद्रावी भवति, गर्भे द्रावयति सत्वं द्रवरूपं विधत्ते यः स तथोक्तः। सूतस्योदरे माक्षिकाभ्रसत्वं द्रुतिरूपं तिष्ठतीत्यर्थः। एवममुना विधानेन सह सूतकः पारदो रज्यते रागवान् भवति, बध्यते बद्धश्च भवतीत्यर्थः॥ १५॥

सत्वं घनस्य कान्तं तालकयुक्तं सुरुन्धितं ध्मातम्।
वारैस्त्रिभिरिह सत्वं भवति रसेन्द्रबन्धकारि परम्॥ १६॥

माक्षिकयोगानन्तरमपरोऽभिधीयते–सत्वमित्यादि। घनस्याभ्रस्य सत्वं, तथा कान्तं लोहविशेषं, तालकयुक्तं तालकेन हरितालेन युक्तं सुरुन्धितं ध्मातं सत् त्रयमपि सत्वरूपं भवति, यद्येकवारधमनेन सत्वं न मिलति तदा पुनर्द्वित्रिवेलाभिर्धमनं कार्यम्। समभागतालकयोजनं घनसत्वमाक्षिकसत्वयोगद्रावणाद्धमितादत्यर्थं तत्सत्वं रसे पारदे बन्धकारि भवति परममुत्कृष्टं बन्धनप्रदं भवति। तत्सत्वस्य चारणतो रसो बन्धनमवाप्नोतीति भावः। कान्तलक्षणं,–"पात्रे यस्मिन् प्रविशति जले तैलबिन्दुर्न सर्पेत् हिङ्गुर्गन्धं विसृजति निजं तिक्ततां निम्बकल्कः॥ पाके दुग्धं भवति शिखराकारतां नैव भूमौ कान्तं लोहं विदुरिति च तल्लक्षणोक्तं न चान्यत्–" इति॥ १६॥

लोहं चाभ्रकसत्वं तालकसमभागसारितं चरति।
अभिषवयोगाच्चाङ्गुलिमृदितं गर्भे च तद्द्रवति॥ १७॥

कान्ताभ्रसत्वालयोगकरणमाह–लोहमित्यादि। चेति समुच्चये। लोहं पूर्वोक्तलक्षणं मुण्डादिकं अभ्रसत्वं च, तालकसमभागसारितं तालकस्य समभागेन पूर्वविधानेन मुखादिना यत्सारितं एकशरीरतां नीतं, 'सृ' गतावित्यस्य धातो रूपं सारितं, प्रमिलितमित्यर्थः; एवंविधं कान्ताभ्रसत्वालं रसश्चरति। च पुनः अङ्गुलिमृदितं अङ्गुलिना मर्दितं तत् कान्ताभ्रसत्वालं गर्भे रसोदरे द्रवति तत्स्वरूपत्वेन मिलति। कस्मात्? अभिषवयोगात्; अभिषवः संमर्दनं, तद्योगात्। लोहस्य त्रयोदशभेदानां मध्यात् केनापि भेदेन सहयोगः कार्य इति लोहशब्देन ध्वनितम्॥ १७॥

वङ्गमथो घनसत्वं तालकषड्भागसारितं चरति।
अभिषवयोगाच्चरति व्रजति रसो नात्र सन्देहः॥ १८॥

लोहयोगमुक्त्वा वङ्गयोगमाह–वङ्गमित्यादि। अथ लोहकथनानन्तरं वङ्गं खुरसंज्ञकं अभ्रकं च एतद्द्वयं, तालकषड्भागसारितं तालकस्य षडंशेन एकशरीरतां नीतं तत्स्वरूपं रसश्चरति। कस्मात्? अभिषवयोगात्; अभिषवः संमर्दनं तद्योगात्; 'षुञ्' अभिषवे, इत्यस्य धातो रूपं अभिषवः। पुनः रसश्चरति मिलति। चारितं यत् तद्द्रवति, तद्द्रुतं रसे व्रजति पृथक्त्वात्सं मिलति नात्रसन्देहः निःसं-

दिग्धमिव । वङ्गस्य लघुद्रवित्वात् षडंशयोगस्तालकस्य युक्तः; लोहजातेः काठिण्यात् समभागत्वमुदितम् ॥ १८ ॥

बहलं सुवर्णवर्णं निचुलपुटैः पतति पञ्चभिः सत्वम् ।
वटकीकृतमृतगगनं निरञ्जनं किट्टरहितं च ॥ १९ ॥

अभ्रसत्वविधानमाह—बहलमित्यादि । वटकीकृतं च तन्मृतं च गगनं तथोक्तं; न वटको वटकः क्रियत इति वटकीकृतं, अत्र अभूततद्भावे च्विःप्रत्ययः । पञ्चभिर्निचुलपुटैः पञ्चसंख्याभिर्वेतसवृक्षद्रवभावनाभिः भावितं यन्मृतगगनं मृताभ्रं वटकीकृतं सत्सत्वं पतति, तद्द्रावकौषधयोगं विधाय वह्निना विधमनादिति शेषः । कियन्मानं सत्वं पतति ? बहलं, बहु अन्यविधेरधिकम् । कीदृशं ? स्वर्णवर्णं पीतश्वेतं प्रकाशास्यं, पुनर्निरञ्जनं निर्मलं, कीट्टरहितं च । अस्मिन् सत्वे काचकिट्टाभावः । सर्वोत्कृष्टविधिरयं, पूर्वमुदितात् बहलसत्वपातादित्यर्थः ॥ १९ ॥

तच्चूर्णीकृत्य ततः क्षाराम्लैर्भावितं घनं बहुशः ।
सृष्टित्रयनीरकणातुम्बरुरसमर्दितं चरति ॥ २० ॥

केवलसत्वचारणविधानमाह—तदित्यादि । ततस्तदभ्रसत्वपातनविधेरनन्तरं, तदेवाभ्रसत्वं चूर्णीकृत्य कल्कं विधाय, क्षाराम्लैर्भावितं कुर्यात्; क्षाराः स्वर्जिकादयः, अम्ला जम्बीरादयः, तैर्बहुशो बहुवारं घर्मपुटितं कुर्यादित्यर्थः । पुनः सृष्टित्रयनीरकणातुम्बुरुरसमर्दितं सृष्टिः पूर्वोक्ता तत्त्रयं मूत्रशुक्रशोणितमिति, नीरकणा जलपिप्पली, तुम्बरु प्रतीतं, एतेषां रसेन मर्दितं कुर्यात् । अभ्रसत्वमेवं कृतं सत् चरति ग्रसति, 'रसः' इत्यध्याहारः ॥ २० ॥

घनसत्वशुल्बमाक्षिकसमभागनियोजितं तथा मिलितम् ।
तच्छुल्वाभ्रं कथितं चरति रसो जीर्यति क्षिप्रम् ॥ २१ ॥

अथ शुल्बाभ्रमाह—घनेत्यादि । घनसत्वशुल्वमाक्षिकसमभागनियोजितं घनसत्वमभ्रसत्वं, शुल्वं ताम्रं, माक्षिकं स्वर्णमाक्षिकं, समभागेन तुल्यभागेन नियोजितं प्रयुक्तं, तन्मिलितं सत् शुल्वाभ्रं कथितम् । अत्र शुल्वं कीदृशं प्रयोज्यं तदाह,—"द्रावकौ म्लेच्छनेपालौ रसे नेपाल उत्तमः । घनघातसहः स्निग्धो रक्तपत्रोऽमलो मृदुः ॥ म्लेच्छस्तु क्षालितः कृष्णो रूक्षस्निग्धो घनासहः । मिश्रितो नागलोहाभ्यां न श्रेष्ठो रसकर्मणि"—इति; अतो नेपालकं ग्राह्यमित्यर्थः । तच्छुल्वाभ्रं रसः क्षिप्रं चरति, पुनः क्षिप्रं शीघ्रं तच्छुल्वं जीर्यति जारणमाप्नोति । अत्र माक्षिकयोगः शुल्वाभ्रसत्वमेलनार्थं रसप्रीत्येति भावः ॥ २१ ॥

इति ताप्यशुल्वसहितं घनसत्वं लोहखल्वके मृदितम् ।
चरति रसेन्द्रः काञ्जिकवेतसजम्बीरबीजपूराम्लैः ॥ २२ ॥

शुल्बाभ्रचारणविधानमाह—इतीत्यादि । इति पूर्वोक्तं; ताप्यशुल्बसहितं ताप्यं स्वर्णमाक्षिकं, शुल्वं ताम्रं नेपालसंज्ञकं, ताभ्यां सहितं मिश्रितं, घनसत्वं तप्तलोहखल्वके मृदितं कार्यं मर्दनीयं; कैः कृत्वा? काञ्जिकवेतसजम्बीरबीजपूराम्लैः काञ्जिकमुक्तविधानं सौवीरं, वेतसं चुक्रं, जम्बीरं प्रसिद्धं, बीजपूरो मातुलुङ्गः, एतेषामम्लैः द्रवरूपैः । ततः शुल्बाभ्रं रसेन्द्रः पारदश्चरति ग्रसति । लोहखल्वस्य कथनात् तप्तखल्वके मर्दनं कुर्यादिति तात्पर्यार्थः ॥ २२॥

इति तीक्ष्णशुल्बनागं माक्षिकयुक्तं च तत्कृतं खोटम् ।
तद्भस्म च पुटविधिना निर्व्यूढं सत्वरञ्जकं भवति ॥ २३ ॥

प्रकारान्तरमाह—इतीत्यादि। इति पूर्वोक्तलक्षणं, तीक्ष्णशुल्वनागं तीक्ष्णं ताम्रं नागं च एतत्त्रयं, माक्षिकयुक्तं स्वर्णमाक्षिकयुतं, समं तुल्यभागं कुर्यात्। तत्कृतं खोटं तैः सर्वैः पिष्टीस्तम्भेन खोटभस्म कार्यम् । पुटविधिना वह्निपुटविधानेन तत्कृतं खोटं भस्म कार्यं; पुनः तद्भस्म, सत्वे निर्व्यूढं निर्वाहितं सत्, सत्वरञ्जकं भवति, खसत्वे अभ्रसत्वे रागदायि भवति, रञ्जितं तत्सत्वं रसरञ्जकं भवेदिति भावः ॥ २३ ॥

चार्यं यत्नेन रसे घनसत्वं तद्विधं घनं तस्य ।
संयोज्य सर्वबीजं निर्वाह्यं द्वन्द्वसङ्करतः ॥ २४ ॥

रञ्जितघनसत्वस्य चारणमाह–चार्यमित्यादि । तद्विधं पूर्वरञ्जितं, घनसत्वमभ्रसत्वं, च घनं केवलघनोद्भवं सत्वं अरञ्जितं, रसे पारदे चार्यं ग्रासग्रसनमानेनैतदभ्रसत्वं रसे संयोज्यम् । वा सत्वे सर्वबीजं सर्वं रागदायि द्रव्यं संयोज्य निर्वाह्यं निर्वाहितं कुर्यात् । कुतः? द्वन्द्वसंकरतः द्वन्द्वानां संकरो मेलापः 'सङ्करोऽवकर' इत्यमरः । निर्वाह्यं इति 'वह' प्रापणे इत्यस्य रूपं पूर्ववत् । निरव्ययं निश्चयार्थे "निर्निश्चयनिषेधयोः"–इत्यमरः ॥ २४ ॥

अभ्रकचारणमादौ गर्भद्रुतिचारणं च हेम्नोऽन्ते ।
यो जानाति न वादी वृथैव सोऽर्थक्षयं कुरुते ॥ २५ ॥

अथ रसचारणे ज्ञेयमाह—अभ्रकेत्यादि । यो वादी रसकर्ता, आदौ प्रथमं, अभ्रचारणं न जानाति यथा रसोऽभ्रकं चरति ग्रसति, पुनः तत्पश्चात् गर्भद्रुतिचारणं यद्रसगर्भे द्रुतं द्रवरूपं तिष्ठत्यभ्रादिकं तस्य चारणं ग्रसनं, पुनरन्ते हेम्नः स्वर्णस्य चारणं ग्रसनं न जानाति; स वृथैव मिथ्यैव अर्थक्षयं धननाशं कुरुते, कार्यसिद्धेरभावात् । सर्वज्ञ एव रसक्रियायां प्रवर्तेतेति भावः ॥ २५ ॥

गगनग्रासरहस्यं वक्ष्याम्येकं घनार्कसंयोगात् ।
केवलमभ्रकसत्वं ग्रसते यत्नान्न सर्वाङ्गम् ॥ २६ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे सत्वाभ्रकचारणात्मकश्चतुर्थोऽवबोधः ।

ग्रासरहस्यमाह—गगनेत्यादि । अहं श्रीमद्गोविन्दभगवत्पूज्यपादाचार्यः, एकमद्वितीयं, गगनग्रासरहस्यं अभ्रककवलने ग्रासकौतुकं, वक्ष्यामि कथयामि । कस्मात्? घनार्कसंयोगात्; घनं अभ्रकसत्वं, अर्कस्ताम्रं, एतयोः संयोगः, तस्मात् उभयसत्वकृतखोटं चार्यम् । अथशब्दः पक्षान्तरसूचकः । अभ्रसत्वस्य यस्य धातो रूपं,तेन सह यस्य धातोर्वा संयोगो भवति द्वन्द्वभावात्सङ्करतः तत्संयुक्तमभिधानं भवति; यथा—शुल्वाभ्रं, नागाभ्रं, वङ्गाभ्रं, माक्षिकाभ्रं, हेमाभ्रमिति; एवं सर्वत्र संयोगान्नामनिष्पत्तिः । "ग्रस्तस्य द्रावणं गर्भे गर्भद्रुतिरुदाहृता । बहिरेव द्रवीकृत्य घनसत्वादिकं खलु । जारणाय रसेन्द्रस्य सा बाह्यद्रुतिरुच्यते–" इति ॥ २६ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां
मुग्धावबोधिन्यां सहृदयटीकायां सत्वाभ्रकचारणात्मक-
श्चतुर्थोऽवबोधः ॥ ४ ॥

अथ पञ्चमोऽवबोधः ।

अथ गर्भद्रुतिबाह्यद्रुतिजारणम् ।

यदि घनसत्वं गर्भे न पतति नो वा द्रवन्ति बीजानि ।
न च बाह्यद्रुतियोगस्तत्कथमिह बध्यते सूतः ॥ १ ॥

वाचोमरीचिभिस्तप्तं तोषय जनकैरवम् ।
कुमुदानि च कासारोद्वर्तीनि चिरभासया ॥ १ ॥

अथ गर्भद्रुतिबाह्यद्रुतिप्रशंसनमाह—यदीत्यादि । यदि चेद्घनसत्वमभ्रसत्वं गर्भे पारदस्यान्तर्न पतति द्रवत्वं नाप्नोति, वा बीजानि शुल्वाभ्रादीनि पारदस्योदरे नो द्रवन्ति न रसरूपा भवन्ति, च पुनः बाह्यद्रुतिर्न युज्यते; चेदेवं न स्यात्तर्हि इह अस्यां क्रियायां प्राप्तायां सत्यां सूतो रसः कथं बध्यते? अन्यथा न कोऽप्युपायः ॥ १ ॥

गर्भद्रुत्या रहितो ग्रासश्चीर्णोऽपि नैकतां याति ।
एकीभावेन विना न जीर्यते तेन सा कार्या ॥ २ ॥

गर्भद्रुतेराधिक्यं दर्शयन्नाह—गर्भेत्यादि । चीर्णोपि ग्रासः चारणतां प्राप्तोऽपि कवलः, यदि गर्भद्रुत्या रहितो भवेत् रसस्योदरेरसरूपकरणवर्जितो भवेत्तदा एकतां न याति, रसरूपो न भवति । पुनरेकीभावेन विना ग्रासो न जीर्यते जारणत्वं नाप्नोति । तेन हेतुना गर्भद्रुतिपूर्विका जारणा कार्या, रसबन्धे जारणं हेतुरिति भावः ॥ २ ॥

बीजानां संस्कारः कर्तव्यः कोऽपि तादृशः प्रथमम् ।
येन द्रवति हि गर्भे रससराजस्याम्लवर्गेण ॥ ३ ॥

जारणायां प्रथमं कर्तव्यमाह—बीजानामित्यादि । बीजानां शुल्बाभ्रादीनां, कोऽप्यनिर्वचनीयः संस्कारो गर्भे द्रुतिकारकः प्रथमं कर्तव्यः; संस्क्रियत इति संस्कारः । किंविशिष्टः ? तादृशः; तैः बीजैः सदृशः, यथा बीजानि शक्तिमन्ति सन्ति तथा संस्कारोपि शक्तिमान् कर्तव्य इत्यर्थः । संस्कारः केन कर्तव्यः ? अम्लवर्गेण जम्बीरादिना । येन संस्कारेण रसराजस्य गर्भे रसोदरे बीजानि धातूपधातुजातानि शुल्वाभ्रादीनि द्रवन्तीत्यर्थः ॥ ३ ॥

सममाक्षिककृतवापं सममाक्षिकसत्वसंयुतं हेम ।
गर्भे द्रवति च जरति च जरितं बध्नाति नान्यथा सूतम् ॥४॥

हेमबीजप्रशंसनमाह—समेत्यादि । सममाक्षिककृतवापं समभागं तुल्यांशं हेम्ना यन्माक्षिकं तस्य कृत्वा वापो वारंवारमाक्षेपोऽग्नियोगाद्यस्मिन् तथोक्तं; पुनस्तद्धेम सममाक्षिकसत्वसंयुतं हेम्ना समं तुल्यं यन्माक्षिकसत्वं तेन संयुतं कृतखोटं कुर्यात् । तत्खोटरूपं हेम गर्भे पारदान्तर्द्रवति । पुनस्तद्द्रावितं हेम जरति जीर्णतामाप्नोति । तद्धेम जरितं सत् सूतं रसेश्वरं बध्नाति । अन्यथा अन्यप्रकारेण सूतो बन्धनं नाप्नोति । माक्षिकस्य वापो हेम्नो वर्णोत्कर्षप्रद इति भावः ॥ ४ ॥

माक्षिकसत्वं हेम्ना पादादिकजारितं द्रुतं सूते ।
तारारिष्टं कुरुते वरकनकं पत्रलेपेन ॥ ५ ॥

माक्षिकसत्वचारणाद्रसे गुणोत्कर्षमाह—माक्षिकसत्वमित्यादि । माक्षिकसत्वं वह्न्यौषधयोगद्रुतं यद्धेममाक्षिकसारं, हेम्ना कनकेन सह, सूते पारदे, पूर्वं यद्द्रुतं पुनः पादादिकजारितं पादादिकविभागेन पादार्धसत्वेन निःशेषतामाप्तं सत्; अयं सूतः तारारिष्टं तारं रूप्यादि, अरिष्टं शुभं, वरकनकं कुरुते पूर्णवर्णमित्यर्थः । केन विधानेन ? पत्रलेपनेन पत्रं कण्टकभेदि, तत्र योऽसौ लेपः, वह्नियोगादिति शेषः, तेन । हेममाक्षिकसत्वजारितस्य रूप्यपत्रलेपेन कनकं स्यादिति व्यक्तार्थः ॥ ५ ॥

समरसतां यदि यातो वस्त्राद्गलितोऽधिकश्च तुलनायाम् ।
ग्रासो द्रुतः स गर्भे द्रुत्वाऽसौ जीर्यते क्षिप्रम् ॥ ६ ॥

गर्भद्रुतेर्लक्षणमाह—समेत्यादि । यदि ग्रासः समरसतां यातो भवेद्रसतुल्यरूपतां प्राप्तो भवेत्, पुनर्वस्त्राद्गलितो भवेत् चतुर्गुणश्वेतवस्त्रान्निःसृतो भवेत्, पुनस्तुलनायां तुलाकर्मणि यदाधिकोऽपि स्यात्तदा गर्भे पारदस्यान्तर्द्रुतो ग्रासो ज्ञातव्यः, गर्भद्रुतो रसो वेदितव्य इति व्यक्तार्थः । पुनरसौ रसो द्रुत्वा द्रवरूपं शीघ्रं प्राप्य जीर्यति धातूनपि, विधानेनेति शेषः ॥ ६ ॥

न विडैर्नापि क्षारैर्न स्नेहैर्द्रवति हेम तारं वा ।
माक्षिकसत्वेन विना त्रिदिनं निहितेन रक्तेन ॥ ७ ॥

माक्षिकसत्वोत्कर्षमाह—नेत्यादि । माक्षिकसत्वेन विना स्वर्णमाक्षिकसारमन्तरेण, हेम कनकं, वा तारं रूप्यं, न द्रवति । कैः कृत्वा ? विडैः कृत्वा; शङ्खचूर्णार्कक्षारादिकृतपिण्डैः कृत्वा; ग्रन्थान्तरे च,—"लवणक्षारोपरसैरेभिरम्लैर्विडो मतः । समे गर्भे तु संस्थाप्यो ह्यनेनैव द्रवीभवेत्"—इति । न केवलं विडैः किन्तु क्षारैरपि न; क्षारैः स्वर्जिकायवक्षारटङ्कणाद्यैः । न केवलं क्षारैः किन्तु स्नेहैरपि न; स्नेहानि यथा,—"कङ्गुणिकं विनादोषाकरञ्जश्रीफलोद्भवम् । कटुवातारिसिद्धार्थसोमराजीबिभीतजम् । अतसीजं महाकालानिम्बजं तिलजं तथा । अपामार्गदेवदालीदन्तीतुम्बरविग्रहा(?) । अङ्कोलोन्मत्तभल्लातफलेभ्यस्तैलसंभवः"—इति । तैलैरपि न द्रवति । पुनर्माक्षिकसत्वेन गर्भे द्रुतिर्जायते । किंविशेषेण माक्षिकसत्वेन ? रक्तेन रक्तवर्गेण, त्रिदिनं दिनत्रयं निहितेन रक्तवर्गान्तःस्थापितेन । रक्तवर्गो यथा,—"दाडिमं किंशुकं चैव बन्धूकं च कुसुम्भकम् । समाञ्जिष्ठो हरिद्राद्यो लाक्षारससमन्वितः ॥ रक्तचन्दनसंयुक्तो रक्तवर्गः प्रकीर्तितः"—इति ॥ ७ ॥

लवणं देवीस्वरसप्लुतमहिपत्रं विचूर्णितं शिलया ।
एतत्पुटनत्रितयात्सुमृतं संस्थापयेदयःपात्रे ॥ ८ ॥
विहिताऽर्धाङ्गुलनिम्ना स्फुटविकटकटोरिका मुखाधारा ।
तस्योपर्यादेया कटोरिका चाऽङ्गुलोत्सेधा ॥ ९ ॥
विहितच्छिद्रत्रितया शस्ता चतुरङ्गुलोर्ध्वछिद्रेषु ।
लोहशलाका योज्यास्तत्रापि च हेमपत्राणि ॥ १० ॥
संस्थाप्य विधूप्यन्ते यत्राधस्तात् प्रदीपयेदग्निम् ।
धूमोपलेपमात्राद्भवन्ति कृष्णानि हेमपत्राणि ॥ ११ ॥

तान्यग्नितापितानि च पश्चाद्यन्त्रे मृतानि धूमेन ।
पाचितहेमविधानाज्जरति रसेन्द्रो द्रवति गर्भे च ॥ १२ ॥

स्वर्णजारणयन्त्रविधानमाह–लवणमित्यादि । प्रथमं लवणं सैन्धवं देवीस्वरसप्लुतं कुर्यात् ब्राह्मीस्वकीयरसेन संमिश्रं कुर्यात् । पुनर्ब्राह्मीरसप्लुतं लवणं च अहिपत्रं ताम्बूलिदलं तच्च द्वयं शिलया[1] विततग्रावेण चूर्णितं पेषितं कुर्यात् । पुनरेतदयःपात्रे लोहभाजने संस्थापयेत् । एतत् स्थापितं द्रव्यं पुटत्रितयात्रिपुटकरणादग्निसंयोगेन सुमृतं स्यात् । तस्य देवीस्वरसप्लुतस्य सुमृतसैन्धवस्य मुखाधारा स्फुटविकटकटोरिका पात्री कार्या; मुखमेव आधारो यस्याः सा एवंविधा; स्फुटा प्रकटा, विकटा विपरीता अधोमुखेत्यर्थः, सा कटोरिका विहीता कार्या अयःपात्रस्य । तस्याः कटोरिकाया उपरि ऊर्ध्वभागे एषा कटोरिका आदेया स्थाप्या । किंविशिष्टा? अङ्गुलोत्सेधा अङ्गुल उत्सेधः परिमाणं यस्याः सा तथोक्ता । पुनः किंविशिष्टा? अर्धाङ्गुलनिम्ना अर्धाङ्गुलपरिमाणनिम्ना मध्यगा । पुनः किंविशिष्टा ? विहितच्छिद्रत्रितया विहितानि कृतानि छिद्रत्रितयानि यस्यां सा एवंविधा; शस्ता च सन्तुलविहितछिद्रत्रितया(?) । चतुरङ्गुलोर्ध्वा तदुपरिभागे कटोरिका चतुरङ्गुलिप्रमाणोन्नतेति भावः । पुनःश्छिद्रेषु त्रिषु शलाका योज्या लोहशलाकाः क्षेप्या; पुनस्तत्रापि छिद्रेषु हेमपत्राणि कण्टकवेधीनि कनकपत्राणि योज्यानीति । एवंविधे पूर्वं निर्मिते यन्त्रे हेमपत्राणि स्थाप्य विधूप्यन्ते । ततोऽग्निं प्रदीपयेत् यन्त्राधस्ताद्यन्त्राधोभागे वह्निं प्रज्वालयेत्, तदा तानि हेमपत्राणि कृष्णानि श्यामवर्णानि भवन्ति । कस्मात्? धूमोपलेपमात्रात् धूमश्चासावुपलेपश्च धूमोपलेपस्तन्मात्रात्तत्प्रमाणात् । येनौषधेन धूपो निरुक्तस्तेनौषधेनोपलेपः कार्यः पत्रेष्विति । पुनः किंभूतानि हेमपत्राणि रसेन्द्रो जरति ? अग्नितापितानि सन्ति वह्नियोगात्तप्तानि कृतानि । स्वर्णजारणमिदं गदितम् । इति पञ्चभिः श्लोकैः कुलकम् ॥ ८—१२ ॥

तेनैव तारपत्रं विधिना संस्वेद्ययन्त्रयोगेन ।
जायेत कृष्णवर्णं तत्तारं द्रवति गर्भे च ॥ १३ ॥

अथ रूप्यजारणमाह–तेनेत्यादि । तेनैव विधिना पूर्वविधानेन, तारपत्रं रूप्यदलं, कृष्णवर्णं श्यामलप्रभं, जायेत । केन ? संस्वेद्ययन्त्रयोगेन; संस्वेदः प्रबलाग्निस्तस्येदं सम्बन्धि यद्यन्त्रं तस्य यो योगस्तेन । तत्तारपत्रं पुनः गर्भे रसोदरे द्रवति जलत्वमाप्नोति । पुनस्तस्मिन् यन्त्रे द्रवति, चशब्दात् रसेन्द्रस्तत्पत्रं जरति तारकृष्णीति ॥ १३ ॥

---

१ अत्र 'शिलया' शब्देन 'मनःशिलया' इत्यर्थो भवेत् ।

अथवा बलिना वङ्गं नागाभिधानेन[1] यन्त्रयोगेन ।
हेमाह्वं तारं वा द्रवति च गर्भे न संदेहः ॥ १४ ॥

अथ योगान्तरमाह—अथवेत्यादि । अथवेति समुच्चये, एकार्थनिष्ठत्वात् । बलिना गन्धेन सह वङ्गं यन्त्रयोगेन कृष्णं जायेत । न केवलं वङ्गं पुनर्नागाभिधानेन सह नागविधानमप्येवं स्यादिति व्यक्तिः। नागाभिधानेनेति नागनाम्ना, "आख्याह्वे अभिधानं च नामधेयं च नाम च-" इत्यमरः । एवंविधं वङ्गं वा नागं वा हेमाह्वं हेमपत्रं वा तारं तारपत्रं वा एतत्सर्वं बलिना कृष्णं जायेत, मृतं च सर्वं गर्भे रसान्तरे द्रवति, नात्र संदेहः असंदिग्धमिदमुक्तम् । चशब्दाज्जरति निःशेषत्वमाप्नोति ॥ १४ ॥

रसकं बलिना युक्तं पूर्वोक्तविधानयोगेन ।
पक्वं चूर्णं यावद्द्रवति भृशं द्रवति गर्भे च ॥ १५ ॥

प्रयोगान्तरमाह—रसकमित्यादि । रसकं खर्परिकं, बलिना गन्धेन सह, युक्तं सत् मिलितं सत्, 'समभागेन' इति शेषः; केन कृत्वा ? पूर्वोक्तविधानयोगेन; पूर्वोक्तं यद्विधानं यन्त्रादिकं तस्य योऽसौ योगस्तेन कृत्वा; तावद्भृशमत्यर्थं पक्वं कार्यं यावदशरीरतां याति; तच्चूर्णं गर्भे रसोदरे द्रवति गर्भद्रुतिर्भवति, चशब्दाज्जरति च ॥ १५ ॥

व्यूढोऽथ गन्धकाश्मा शतगुणसंख्यं तथोत्तमे हेम्नि ।
सूते च भवति पिष्टिर्द्रवति हि गर्भे न विस्मयः कार्यः॥१६॥

विध्यन्तरमाह–व्यूढ इत्यादि । अथेत्यनन्तरम् । गन्धकाश्मा गन्धपाषाणः, शतगुणसंख्यं यथा स्यात्तथा उत्तमे हेम्नि पूर्णवर्णे व्यूढो निर्वाह्यः, तद्गन्धव्यूढं हेम सूते पारदे पिष्टिर्भवति, हि निश्चितं, गर्भे रसान्तर्द्रवति, गर्भद्रुतिर्भवतीत्यत्रविस्मयो न कार्यः ॥ १६ ॥

अथवा शतनिर्व्यूढं रसकवरं शुद्धहेम्नि वरबीजम् ।
बीजं जरति रसेन्द्रे द्रवति च गर्भे न सन्देहः ॥ १७ ॥

विध्यन्तरमाह—अथवेत्यादि । अथवेति समुच्चये, रसकवरं श्रेष्ठं खर्परिकं, शुद्धहेम्नि पूर्णवर्णे, शतनिर्व्यूढं कुर्यात् शतगुणनिर्वाहः कार्यः, एकगुणस्वर्णे शतगुणनिर्वाह इति युक्तं, एवं कृते सति वरबीजं श्रेष्ठबीजं भवति, तद्बीजं गर्भे रसोदरे द्रवति गर्भे द्रुतिर्भवति, रसेन्द्रे पारदे, शीघ्रं अविलम्बितं, जरति च निःशेषतामाप्नोति 'विधानेन' इति शेषः; अत्र द्रवणे जरणे च न सन्देहः ॥ १७ ॥

---

[1] 'नागविधानेन' इति पाठान्तरम् ।

अथवा तालकसत्त्वं शिलया वा तच्च हेम्नि निर्व्यूढम् ।
शतगुणमथ मूषायां जरति रसेन्द्रो द्रवति गर्भे च ॥१८॥

पूर्वार्थे विध्यन्तरमाह—अथवेत्यादि । तालकसत्त्वं हरितालसारं, शतगुणं शतगुणितं, हेम्नि कनके, निर्व्यूढं अन्धमूषायां वा प्रकाशमूषायां 'वह्नियोगेन' इति शेषः, तालकसत्त्वस्य हेम्नि निर्वाहः कार्य इति व्यक्तिः; तच्च तत्सत्त्वं केवलं वा शिलया मनःशिलया सार्धं निर्व्यूढं कार्यं; तद्धेम गर्भे रसोदरे द्रवति, अथ रसेन्द्रो रसराजः द्रुतं जरति विधानेनेति ॥ १८ ॥

रसदरदाभ्रकताप्यविमलामृतशुल्बलोहपर्पटिका ।
स्नुह्यर्कदुग्धपिष्टं कङ्कुष्ठशिलायुतं नागम् ॥ १९ ॥

अथ विध्यन्तरमाह—रसेत्यादि । रसदरदाभ्रकताप्यमिति रसः पारदः, दरदो हिङ्गुलः, अभ्रकं प्रतीतं, ताप्यं स्वर्णमाक्षिकं, विमला रुक्ममाक्षिकं, मृतं यच्छुल्वं ताम्रं लोहो मुण्डादिश्च, एतेषां रसादीनां रसपर्पटीवत् पर्पटिका कार्या । तया युतं नागं, पुनः कङ्कुष्ठशिलायुतं कङ्कुष्ठं हरितपीतवर्णो विषहरपाषाणजातिः, शिला मनोह्वा, ताभ्यां युतं मिश्रितं यन्नागं सीसकः; स्नुह्यर्कदुग्धपिष्टं कार्यं स्नुही सेहुण्डः, अर्कः प्रसिद्धो विटपी, तयोर्दुग्धेन पिष्टं पांशुभूतं मृतं यन्नागं, कुक्कुटपुटविधानेति शेषः, एतदपि बीजं सिद्धं, गर्भे द्रवति च, पूर्वसंबन्धात् ॥ १९ ॥

अभ्रकतालकशङ्खरससहितं तत्पुनः पुनः पुटितम् ।
चिञ्चाक्षारविमिश्रं वङ्गं निर्जीवतां याति ॥ २० ॥

अथ वङ्गबीजविधानमाह—अभ्रकेत्यादि । चिञ्चाक्षारविमिश्रं यद्वङ्गं अम्लिकाक्षारयुक्तं वङ्गं, अभ्रकतालकशङ्खरससहितं अभ्रकं प्रतीतं, तालकं हरितालं, शङ्खं कम्बुग्रीवं, रसः पारदः, एतैश्चतुर्भिः सहितं यथा स्यात्तथा पुनः पुनः वारं वारं निरुत्थं यावत् तावत्पुटितं कुर्यात् । एतदौषधस्यांशभागेन सह पुटनाद्वङ्गं निर्जीवतां याति पञ्चत्वमाप्नोति, एतदपि बीजं सिद्धं गर्भद्रावणे जारणार्थे च, पूर्वसंबन्धात् ॥ २० ॥

विधिनाऽनेन च पुटितं म्रियते नागं निरुत्थतां च गतम् ।
वङ्गं च सर्वकर्मसु नियुज्यते तदपि गतजीवम् ॥ २१ ॥

नागवङ्गयोरेतदौषधं कारणमित्याह—विधिनेत्यादि । अनेन विधिना उक्तविधानेन, नागं सीसकं, पुटितं सत् म्रियते मृतं भवतीति; वाऽमुना विधानेनैव निरुत्थतां गतं अशरीरतां प्राप्तं वङ्गं सर्वकर्मसु चारणजारणभक्षणादि-

कार्येषु नियुज्यते, रसज्ञैरिति शेषः । नागवङ्गमारणमेकविधमेवोक्तमतो तद्भक्षणादिषु परस्परं गुणाधिकयोग्यं नतु जारणादिषु ॥ २१ ॥

मृतनागं मृतवङ्गं मृतवरशुल्वं मृतं तथा तीक्ष्णम् ।
एकैकं हेमवरे शतनिर्व्यूढं द्रवति गर्भे च ॥ २२ ॥

नागवङ्गशुल्वतीक्ष्णानां जारणविधानमाह—मृतनागमित्यादि । मृतनागमिति मृतं निर्जीवतां गतं यन्नागं सीसकं, तथाऽनेन विधानेन मृतं वङ्गं, तथा मृतं निरुत्थतां गतं वरशुल्वं ताम्रं, तथा च मृतं तीक्ष्णं, अरिवर्गेणेति शेषः; एषां मध्ये एकैकं नागं वा वङ्गं वा शुल्वं वा तीक्ष्णं वा पृथक्त्वेन हेमवरे पूर्णवर्णे स्वर्णे शतनिर्व्यूढं हेम्नः शतगुणनिर्वाहितं कुर्यात्; तत्सिद्धं गर्भे रसोदरे द्रवति, चशब्दाज्जरति च ॥ २२ ॥

समगर्भे द्रुतिकरणं हेम्नो वक्ष्याम्यहं परं योगम् ।
आमकसस्यकचूर्णं शतनिर्व्यूढं महाबीजम् ॥ २३ ॥

महाबीजप्रभावं दर्शयन्नाह—समगर्भ इत्यादि । इहास्मिन्शास्त्रे विधिना शास्त्रोक्तरीत्या यानि बीजान्युक्तानि तानि कर्तव्यानि सामान्येनेति भावः; परं गर्भद्रुत्यर्थं अयं वार्तिकेन्द्रो योगः वार्तासु कुशला वार्तिकाः, शास्त्रोपदेशरहिता इत्यर्थः, अत्र भावार्थे 'इक्'प्रत्ययः, तेषु वार्तिकेषु इन्द्रः प्रवरो योगः; तथानेनैव प्रकारेण एकमतश्चायं शास्त्रोपदेशिकानां शास्त्रोपदेशरहितानां च, अभिमत इत्यर्थः (?) ॥ २३ ॥

अथवा गन्धकधूमं तालकधूमं शिलाह्वरसकस्य ।
दत्त्वाऽधोभागमुखीं दीर्घतमां खर्परस्यार्धे ॥ २४ ॥
ऊर्ध्वं लग्ना पिष्टी सुदृढा च यथा तथा च कर्तव्या ।
दत्त्वा खर्परपृष्ठे दैत्येन्द्रं दाहयेत्तदनु ॥ २५ ॥
स्तोकं स्तोकं दत्त्वा कर्षाग्नौ ध्मापयेन्मृदा लिप्ताम् ।
गर्भे द्रवति हि बीजं म्रियते च तथाधिके दाहे ॥ २६ ॥

रसोदरे बीजद्रावणविधानमाह—अथवेत्यादि । अथवेति समुच्चये । ऊर्ध्वं दीर्घतममूषायन्त्रस्य तलभागे, पिष्टी रसेन्द्रबीजयोर्निर्मिता पिष्टिका, च पुनः सुदृढा यथा स्यात्तथा लग्ना कर्तव्या । किं कृत्वा ? खर्परस्यार्धे मृन्मयपात्रस्य खण्डार्धे खण्डैकदेश इत्यर्थः, दीर्घतमां, अधोभागमुखीं अधोभागे मुखं यस्याः सा तथोक्ता तां दत्त्वा । पुनः किं कृत्वा ? गन्धकधूमं दत्त्वा, वा स्तोकं स्तोकं अल्पमल्पं तालकधूमं दत्त्वा, वा शिलाह्वरसकस्य शिला-

ह्वा मनःशिला, रसकः खर्परः, एकवद्भावसमासः, तस्य धूमं दत्त्वा । पुनस्तत्खर्परं अधोमुखमुखां च मृदा लिप्तां मृद्वेष्टितां करीषाग्नौ ध्मापयेत्, करीषवह्नावित्यर्थः । एवं अधोमुखां खर्परं च दत्त्वा दैत्येन्द्रं बलिनामानं प्रस्तावाद्गन्धकं तदनु तत्करणपश्चाद्दाहयेत् । एवं कृते सति रसेन्द्रमिलितं यद्बीजं तद्गर्भे रसेन्द्रान्तर्द्रवति । पुनर्बीजसहितो रसेन्द्रो अधिके दाहे सति म्रियत इत्यर्थः । श्लोकत्रयसंबन्धाद्विशेषकम् ॥ २४ ॥ २५ ॥ २६ ॥

गन्धकतालकशैलाः सौवीरकरसकगैरिकं दरदम् ।
क्षाराम्ललवणानि विडो माक्षिकवैक्रान्तविमलसमभागैः२७

अथ सुवर्णजारणार्थं विडमाह—गन्धकेत्यादि । गन्धकतालकशैला इति गन्धकं प्रतीतं, तालकं हरितालं, शैलः शिलाजतुः, द्वन्द्वः समासः, तेन तथोक्ताः समभागाः कार्याः । पुनः सौवीरकं शुक्लाञ्जनं, रसकं खर्परिकं, गैरिकं धातुगैरिकं, दरदं हिङ्गुलं, अत्रैकवद्भावसमासः, तत्तथोक्तं समभागं कार्यम् । पुनः क्षाराम्ललवणानि क्षारा यवक्षारादयः, अम्लं जम्बीरादि, लवणानि सैन्धवादीनि, एतान्यपि समभागानि । कैः सह ? माक्षिकवैक्रान्तविमलसमभागैः सह; माक्षिकं स्वर्णमाक्षिकं, वैक्रान्तं वज्रभूमिजं रजः, विमलं रुक्ममाक्षिकं, एतानि समभागानि, तैर्बिड उच्यते; सर्वैः समभागैः सुमर्दितैर्बिडः कार्य इत्यर्थः ॥ २७ ॥

कृत्वा सुवर्णपिष्टीं मृदितां च सुवेष्टितामनेनैव ।
त्रिपुटैस्तप्ते खल्वे मृदिता गर्भे तथा द्रवति ॥ २८ ॥

बिडयोगाद्यथा बीजं गर्भे द्रवति तथाह—कृत्वेत्यादि । पूर्वोक्ता या पिष्टी, तामनेनैवोक्तबिडयोगेन, तप्ते खल्वे तप्तसंबन्धाल्लोहमये, त्रिपुटैः करीषाग्न्यात्मकैर्मृदिता घर्षिता सति अनेनैव च वेष्टिता कार्या । किं कृत्वा ? सुवर्णपिष्टीं कनकपिष्टीं वा अन्यस्यापि धातोः सुवर्णपिष्टीं शोभनवर्णां पिष्टीं कृत्वा । खल्वे मृदिता सती, तथा तेनैव प्रकारेण नत्वन्यप्रकारेण, गर्भे रसोदरे, द्रवति सलिलरूपा तिष्ठति ॥ २८ ॥

रक्ते शतनिर्व्यूढं नेत्रहितं भस्म वैक्रान्तकं चाथ ।
विमलं शतनिर्व्यूढं ग्रसति समं द्रवति गर्भे च ॥ २९ ॥

अथ वैक्रान्तगर्भद्रुतिमाह—रक्त इत्यादि । वैक्रान्तभस्म वैक्रान्तं वज्रभूमिजं रजः, तदुद्भवं भस्म; रक्ते रक्तगणे, शतनिर्व्यूढं शतवारं निर्वाहितं कुर्यात् । किंविशिष्टं ? नेत्रहितं; नेत्रहितशब्देन मणित्वं दर्शितं, मणयो नेत्रहिता इति । विमलं रूप्यमाक्षिकं श्वेतवर्णं यन्माक्षिकं, रक्तगणे शतनिर्व्यूढं कुर्यात् । तदुभयं वैक्रान्तं

विमलं च रक्तशतनिर्व्यूढं सत् रसो ग्रासविधानं विहाय समं ग्रसति कवलयति; पुनस्तद्ग्रसितं गर्भे रसान्तर्द्रवति, जरति च इति चशब्दार्थः ॥ २९ ॥

ये केचिद्विडयोगा क्षाराम्ललवणानि दीप्तवर्गाश्च ।
सर्वे शतनिर्व्यूढा गर्भद्रुतिकारकाः कथिताः ॥ ३० ॥

रक्तगणाधिक्यं दर्शयन्नाह—य इत्यादि । ये केचिद्विडयोगा अत्र ग्रन्थान्तरेष्वपि च कथिताः; तथा क्षाराम्ललवणानि कथितानि क्षारा यवक्षारादयः अथ च वृक्षौषधिसमुद्भवाः, अम्ला जम्बीरादयः अम्लवृक्षशाकसमुद्भवाश्च यान्येतानि कथितानि; च पुनर्ये दीप्तवर्गाः कथिता दीप्तिकरा योगा अभिहिताः, ते सर्वे विडक्षाराम्ललवणदीप्तवर्गाः शतनिर्व्यूढाः गर्भद्रुतिकारकाः गर्भे रसोदरे द्रुतं द्रवरूपं कुर्वन्ति, धातुमणिरत्नादीनीति शेषः ॥ ३० ॥

शतनिर्व्यूढे च समं पादोनं पञ्चसप्ततिव्यूढे ।
पञ्चाशति तदर्धं पादः स्यात्पञ्चविंशतिके ॥ ३१ ॥

शतनिर्वाहितादौ समादिविधानमाह—शतेत्यादि । शतनिर्व्यूढ इति शतवारं निर्वाहिते 'रक्तगणे' इति शेषः, समं तुल्यं ग्रसति 'रस' इति शेषः । पुनः पञ्चसप्ततिव्यूढे सति पादोनं चतुर्थांशवर्जितं समग्रं ग्रसतीति । पुनः पञ्चाशन्निर्व्यूढे सति तदर्धं समस्यार्धमिति । पुनः पञ्चविंशतिके सति पादश्चतुर्थांशम् । न्यूनाधिके निर्व्यूढे सति न्यूनाधिकांशो ज्ञेय इति विशेषार्थः ॥ ३१ ॥

अष्टांशं तु तदर्धे षोडशांशभागं तदर्धनिर्व्यूढे ।
तस्यार्धे द्वात्रिंशच्चतुःषष्ट्यंशं तदर्धनिर्व्यूढे ॥ ३२ ॥

अल्पनिर्व्यूढक्रममाह—अष्टांशमित्यादि । तु पुनस्तदर्धे सार्धद्वादशके निर्व्यूढे सति अष्टांशं, तदर्धे षड्वारनिर्व्यूढे सति षोडशांशमिति, पुनस्तस्यार्धे त्रिवारनिर्व्यूढे सति द्वात्रिंशदंशं तदर्धनिर्व्यूढे एकद्विवारनिर्व्यूढे सति चतुःषष्ट्यंशं रसो ग्रसतीत्यर्थः ॥ ३२ ॥

इति गदितां गर्भद्रुतिमभिषवयोगेन चाम्लवर्गेण ।
स्वेदनविधिना ज्ञात्वा मृदितां तप्ते तु खल्वतले ॥ ३३ ॥

गर्भद्रुतौ सत्यां कर्तव्यमाह—इतीत्यादि । इत्युक्तविधानेन, गदितां कथितां गर्भद्रुतिं ज्ञात्वा, तप्ते खल्वतले लोहमये करीषाग्निना उष्णतां नीते मृदितां कुर्यात् । केन ? अभिषवयोगेन अभिषवः संमर्दनं तस्य योगेन, न केवलमनेन अम्लवर्गेण च जम्बीरादिना, न केवलमनेनापि स्वेदनविधिना च स्वेदनविधिः स्वेदनसंस्कारोक्तत्वान्नात्राभिहितः, जारणहेतोरिति शेषः ॥ ३३ ॥

ज्ञात्वा बीजबलाबलमर्दनयोगं कृतं च रसराजे ।
स्वेदविधानं च पुटं यन्त्रं वा विहितरसकर्म ॥ ३४ ॥

मर्दनस्वेदनयोः पूर्वोपकरणं दर्शयन्नाह—ज्ञात्वेत्यादि । बीजबलाबलमर्दनयोगं कृतं ज्ञात्वा बीजानां धातूपधातुयोगजनितानां बलाबले न्यूनाधिके योऽसौ मर्दनयोगस्तमेव कृतं ज्ञात्वा विदित्वा रसराजे स्वेदविधानं कुर्यात्, वा पुटं वह्नियोगं कुर्यात्, वा यन्त्रं विहितरसकर्म कुर्यात् विहितं कृतं रसस्य कर्म संस्काररूपं यत्र तथोक्तं, गर्भयन्त्रादिकमित्यर्थः ॥ ३४ ॥

सूतवरं लक्षयते बीजं नोपेक्षतां यथा याति ।
तद्वत्कार्यं विधिना सुकर्म गुरुपादनिर्दिष्टम् ॥ ३५ ॥

सूतकर्मणो दुर्बोधत्वाद्गुरुपादं स्तुवन्नाह—सूतेत्यादि । यथा येन प्रकारेण सूतवरं पारदः लक्षयते ज्ञायते कर्मकृतेति शेषः; पुनर्यथा बीजं उपेक्षतां न याति सम्यक् मिलति, तद्वत्तेनैव प्रकारेण गुरुपादनिर्दिष्टं कर्म आचार्यवर्यदर्शितं पूज्यं संस्काररूपं, विधिना आचार्योक्तविधानेन कुर्यात् । गुरुपादलक्षणम्, "सर्वशास्त्रविशेषज्ञः कुशलो रसकर्मणि । एवंलक्षणसंयुक्तो रसविद्यागुरुर्भवेत्—" इति ॥ ३७ ॥ इति गर्भद्रुतिजारणप्रकरणम् ॥ ३५ ॥

बाह्यद्रुतिरतिविमला स्फुरति हि केषांचिदेव सिद्धानाम् ।
तेभ्यः सम्यक् ज्ञात्वा कलनाः कार्यास्तथा द्रुतयः ॥ ३६ ॥

बाह्यद्रुतिं प्रशंसन्नाह—बाह्यद्रुतिरित्यादि । द्रुतिर्द्विधोक्ता—गर्भद्रुतिर्बाह्यद्रुतिश्चेति । गर्भद्रुतिः पूर्वमुक्ता, बाह्यद्रुतिरधुनाऽभिधीयते । किंविशिष्टा ? अतिविमला निर्मलतरा । एषा च पुनः केषांचिदेव सिद्धानां स्फुरति, सिद्धा रसविद्यापारगा नित्यनाथादयः तेषां, ते जानन्तीति । दुष्प्राप्यत्वात् बाह्यद्रुतिरिह विरला । तेभ्यः सम्यक् ज्ञात्वा, तथा तेनैव सिद्धोदेशविधानेन, द्रुतयो बाह्यद्रुतयः कार्याः ॥ ३६ ॥

वरनागं रसराजं बीजवरं सारितं तथा त्रितयम् ।
गन्धकशिलालसहितं निर्नागं दीपवर्तितो भवति ॥ ३७ ॥
बद्ध्वा सुदृढे वस्त्रे पोटलिकायां शिखीकृतो दीपः ।
तैले मग्नं कृत्वा निर्नागं जायते क्षिप्रम् ॥ ३८ ॥

अथ नागजारणमाह—वरनागमित्यादि । वरनागं श्रेष्ठजाति सीसकं जारणयोग्यं, रसराजं उक्तसंस्कारैः संस्कृतं पारदं, बीजवरं हेमबीजं, एतत्त्रयं सारितं

मिलितं कार्यं; पुनर्गन्धकशिलालसहितं गन्धकं प्रतीतं, शिला मनःशिला, आलं हरितालं, द्वन्द्वस्तानि, तैः सहितं च कार्यं; एतत्सर्वं षट्कं दीपवर्तितः प्रज्वालितदीपवर्तियोगात् निर्नागं नागवर्जितं भवति नागं जरतीत्यर्थः । यथा निर्णागं स्यात्तथा विधानमाह—बद्धेत्यादि । तत्पूर्वोक्तं षट्कं सुदृढे वस्त्रे नूतने वस्त्रे, अत्रौपश्लेषिकेऽधिकरणे सप्तमी, पोटलिकायां बद्ध्वा, पुनस्तैले तिलोद्भवे तत्षट्कं मग्नं निमज्जितं कृत्वा, तदधः शीखीकृतो दीपोऽवधार्यः, न शिखी शिखायुक्तः कृतः शिखीकृतः शिखावानित्यर्थः । अनेन विधिना क्षिप्रं शीघ्रं निर्नागं स्यादिति युग्मम् ॥३७॥३८

कृत्वाऽत्र दीर्घमूषां सुदृढां ध्मातं तु भस्मगर्तायाम् ।
क्षिप्त्वा शिलालचूर्णं पश्चात्सूतं ततः शिलाचूर्णम् ॥ ३९ ॥
संस्थाप्य भस्मनातो ध्मातं स्यात्स्वाङ्गशीतलं यावत् ।
आकृष्य तत्र सूतं ज्ञात्वा नागं सुभक्षितं सकलम् ॥ ४० ॥

निर्नागकरणे विधानमाह—कृत्वेत्यादि । तु पुनः । दीर्घां गोस्तनाकारां, सुदृढां निर्व्रणवज्रोपमां मूषां कृत्वा, तां मूषां प्रति शिलालचूर्णं क्षिप्त्वा शिला मनोह्वा, आलं हरितालं, एतयोश्चूर्णं; पश्चात्सूतं पूर्वोक्तं पारदं क्षिप्त्वा; ततोऽनन्तरं शिलाचूर्णं क्षिप्त्वा; तामेव रससंयुतां मूषां भस्मगर्तायां भस्मना युक्ता या गर्ता तस्यां ध्मातं कुर्यात्, पुनस्तावद्भस्मना आच्छाद्य यावत्स्वाङ्गशीतलं स्वयमेव शीतलं स्यात् । तत्र तस्यां मूषायां सकलं समस्तं नागं सुभक्षितं जीर्णतांगतं ज्ञात्वा सूतं आकृष्य उद्धार्य, निर्नागकरणविधानमेतत् ॥ ३९ ॥ ४० ॥

ज्ञात्वा नागं त्रुटितं पुनरपि दद्याद्यथा भवेत्त्रिगुणम् ।
पश्चाच्छुद्धं कृत्वा बीजवरं योजयेत्तदनु ॥ ४१ ॥

निर्नागानन्तरं यत्कर्तव्यं तदाह—ज्ञात्वेत्यादि । नागं सीसकं त्रुटितं बुद्ध्वा पुनरपि नागं दद्यात्, 'पूर्वोक्तविधानेन पारदे' इति शेषः । यथा नागं त्रिगुणितं भवेत्तथैव कुर्यात् । पश्चात्सूतं शुद्धं कृत्वा पारदं निर्नागं विधाय, तदनु नागजारणानन्तरं बीजवरं पूर्वोक्तं योजयेत् ॥ ४१ ॥

अथवा तारं वङ्गं सूतं संसार्य वङ्गपरिहीनम् ।
तालकयोगेन तथा निर्वङ्गं यन्त्रयोगेन ॥ ४२ ॥

अथ तारयोगमाह—अथवेत्यादि । अथवेति विधानान्तरम् । तारं वङ्गं सूतमिति तारं रूप्यं, वङ्गं खुरकं, सूतं संस्कृतपारदं, एतत्त्रितयं संसार्य मेलनं विधाय, वङ्गपरिहीनं कुर्यात्; तथा तेनैव विधानेन तालस्य योऽसौ योगस्तेन, यन्त्रयोगेन च दीर्घमूषायोगेन च निर्वङ्गं वङ्गविवर्जितं कुर्यात् ॥ ४२ ॥

अथवा वस्त्रनिबद्धं गिरिजतुसहितं सुवेष्टितं माषैः ।
पक्कं तैले वटकं निर्वङ्गं जायते नूनम् ॥ ४३ ॥

विध्यन्तरमाह—अथवेत्यादि । अथवा तारं वङ्गं वटकाकारं तैले तिलोद्भवे पक्कं कुर्यात्, नूनं निश्चितं, तद्वटकं तथा पक्कं कुर्याद्यथा निर्वङ्गं जायते 'वह्नियोगेन' इति शेषः ॥ ४३ ॥

पिष्टीस्तम्भं कृत्वा बीजवरेणैव सारितं तदनु ।
अथवा बद्धरसेन तु सहितं बीजं सुरञ्जितं कृत्वा ॥ ४४ ॥

विधानान्तरमाह—पिष्टीत्यादि । बीजवरेणैव पूर्वकनकबीजेनैव, सारितं मिलितं सत्, पिष्टीस्तम्भं खोटस्तम्भं कृत्वा, तदनु तत्पश्चात्, अथवेति प्रकारान्तरं दर्शयति, तु पुनः, बद्धरसेन खोटबद्धरसेन सहितं, सुरञ्जितं शोभनविधानेन वर्णवृद्धीकृतं, बीजं स्वर्णबीजं, संयुतं कुर्यात् योग एव कार्य इति द्विविधानमुक्तम् ॥ ४४ ॥

गन्धकनिहितं सूतं निहितानिहितं च शृङ्खलायां तत् ।
योजितनिर्व्यूढरसे गर्भद्रुतिकारकं नूनम् ॥ ४५ ॥

अन्यच्चाह—गन्धकेत्यादि । गन्धकनिहितं गन्धके निहितं स्थापितं सूतं, ऊर्ध्वाधो गन्धकं दत्त्वा सूतं मध्यस्थं कुर्यादित्यर्थः । च पुनरेवंविधं सूतं शृङ्खलायां शृङ्खलीकरणयोगे, निहितानिहितं यन्निहितं तदनिहितमजारितं कार्यं, निहितानिहितसंयोगात् शृङ्खलेयं, नूनं निश्चितं, योजितनिर्व्यूढरसे पूर्वं योजितं पश्चान्निर्वाहितं निर्व्यूढं यत्र तत्तस्मिन्नेवंविधरसे, गर्भद्रुतिः पारदस्योदरे बीजानि द्रवन्तीति ॥४५॥

सूतकभस्मवरेण तु बीजं कृत्वा रसेन्द्रके गर्भे ।
मृदिता पिष्टीविधिना ह्यभिषवयोगाद्द्रवति गर्भे च ॥४६॥

पिष्टीविधिना जारणमाह—सूतकेत्यादि । तु पुनः, रसेन्द्रके गर्भे रसेन्द्रकृतो योऽसौ गर्भस्तस्मिन्, बीजं कृत्वा विधिना पिष्टीर्विधेया, सा पिष्टी मृदिता कार्या; कस्मात् ? अभिषवयोगात् संमर्दनयोगात्; केन सह ? सूतकभस्मवरेण सह सूतकस्य यद्भस्मवरं तेन, सा पिष्टी गर्भे द्रवति, चशब्दाज्जरति च ॥ ४६ ॥

पत्राभ्रकं च सत्वं कांक्षी वा कान्तमाक्षिकं पुटितम् ।
निर्गुण्डीगृहकन्याचाङ्गेरीपलाशशाकैश्च ॥ ४७ ॥
तावत्पुटितं कृत्वा यावत्सिन्दूरसप्रभं भवति ।
तत्पादशेषलवणं हण्डिकपाकेन पाचितं सुदृढम् ॥ ४८ ॥

एकैकं शतव्यूढं बीजवरं जारयेद्रसेन्द्रस्य ।
गर्भे द्रवति च क्षिप्रं ह्यभिषवयोगेन मृदितमङ्गुल्या ॥४९॥

बीजवरविधानमाह—पत्राभ्रकमित्यादि । पत्राभ्रकमिति अभ्रकस्य पत्राणि, वाऽभ्रकस्य सत्वं, पुनः कांक्षी सौराष्ट्री, कान्तमाक्षिकं कान्तश्चुम्बकः, माक्षिकं स्वर्णमाक्षिकं, एतेषां द्वन्द्व एकत्वं; पुनरेतत् निर्गुण्डीगृहकन्याचाङ्गेरीपलाश-शाकैः पुटितं निर्गुण्डी सेफालिका, गृहकन्या कुमारी, चाङ्गेरी अम्लशाकः, पलाशो ब्रह्मवृक्षः, शाको वृक्षविशेषः, एतेषां द्वन्द्वसमासः; एतेषां रसं गृहीत्वा पूर्वौषधपुटितं कुर्यात् 'घर्मे' इति शेषः । तदौषधं पुटितं कृत्वा, पुनस्तत्पुटितमौ-षधं तत्पादशेषं चतुर्थांशं, लवणं सैन्धवं दत्त्वा, हण्डिकापाकेन हण्डिकायां मृद्भाजने यो पाकस्तेन पाचितं वह्नौ पुटितं तावत्कुर्याद्यावत्सिन्दूरसंप्रभं सिन्दूरतुल्यवर्णं भवति । कथं पाचितं कुर्यात् सुदृढं यथास्यात्तथा एकैकं शत-व्यूढमिति । पूर्वोक्तानां सिन्दूरीकृतानामुपरसानामधरात् एकैकं एकं एकं पृथक्त्वेन शतव्यूढं शतवारं वाहितं बीजवरं जायते, 'कनके' इति शेषः; तद्बीजं रसेन्द्रस्य गर्भे द्रवति, चशब्दात् क्षिप्रं शीघ्रं जरति च । कथं ? अङ्गुल्या अनामिकया यो अभिषवयोगः संमर्दनयोगस्तेनेति विशेषकम् ॥ ४७–४९ ॥

आवृत्तेऽप्यावर्त्य हेमवरे क्षेप्यमुज्ज्वले नागम् ।
त्रिगुणशिलाप्रतिवापं ह्यहिबीजं तत्समुद्दिष्टम् ॥ ५० ॥

नागेन बीजकरणमाह–उज्ज्वलहेमवरे स्वर्णश्रेष्ठे, आवर्त्ये सम्यग्द्रुते, नागं शुद्धसीसकं, आवर्त्य प्रद्राव्यं, किं कृत्वा ? समं स्वर्णसमभागक्षेपं क्षिप्त्वा, पुनर्नागोपरि त्रिगुणशिलाप्रतिवापं त्रिगुणा या शिला तस्या निर्वापं कुर्यात् । शिला मनःशिला । तत्सिद्धं अहिबीजं नागयोगेन बीजं समुद्दिष्टं, 'रसविद्भिः' इति शेषः ॥ ५० ॥

वङ्गं तु तेन विधिना हेमवरे क्षेप्य तालवापेन ।
तारे वा निर्व्यूढं बीजवरं त्रुटितसंयोगात् ॥ ५१ ॥

अथ वङ्गयोगेन बीजमाह—वङ्गमित्यादि । तेन पूर्वोक्तेन, विधिना विधानेन, तु पुनः, हेमवरे पूर्ववर्णिते, वङ्गं क्षेप्य, तालवापेन हरितालनिक्षेपेण निर्व्यूढं कुर्यात्, वा तारे आवर्त्ते वङ्गं निक्षिप्य निर्व्यूढं निर्वाहितं सद्बीजवरं भवेत् । कस्मात् ? त्रुटितसंयोगात् त्रुटितं भवति तथा बीजवरमिति वङ्गबीजं, तत् पूर्ववत् द्रवति जरति च ॥ ५१ ॥

यो निःसृतो भुजङ्गाद्रसकेसरीवज्रपञ्जरः स पुनः ।
फणिहेमगुणात्कुटिलो रसाङ्कुशो नाम विख्यातः ॥ ५२ ॥

सुवर्णाभिधानवीजप्रशंसनमाह—य इत्यादि । भुजङ्गात् सीसकात्, निःसृतः भुजङ्गशिलावापेन क्षयं नीत्वा यः पृथग्भूतः; स रसकेसरीवज्रपञ्जरः कथितः रस एव केसरी सिंहः, तदर्थं वज्रपञ्जरः वज्रेण व्यधितः पञ्जरोऽतिदृढत्वात्, सिंह-रक्षणसमर्थ इत्यर्थः । पुनर्विशेषेणोच्यते–अयं वज्रपञ्जरो न किंतु अयं रसाङ्कुशः रसो गजरूपः तस्याङ्कुशः वशीकरणसमर्थः । नाम संभावनायाम् । विख्यातः प्रकथितः । कस्मात् ? कुटिलात् किमपि वस्तुहरणात्, कुटिलो वक्रो भवति दुष्ट-स्वभाव एव, अनेन हेम्ना नागहरणं कृतम्। कथंभूतात् कुटिलात्? फणी भुजङ्गः, हेम स्वर्णं, तयोर्गुणा विद्यन्ते यस्मिन् एवंविधात्; कुटिलादेशो युक्तः अङ्कु-शोऽपि वक्रो भवतीति । अत्र भ्रान्तिमानलङ्कारः हेमवीजे वज्रपञ्जर-गजाङ्कुश-दर्शनाद्भ्रान्तिर्जातेति ॥ ५२ ॥

एवं पक्कं विधिना बीजवरं सूतराट् तथाऽम्लेन ।
कर्तव्यः संस्वेद्यो यावत्पिष्टी भवेच्छ्लक्ष्णा ॥ ५३ ॥

बीजस्यास्य पिष्टीकरणमाह—एवमित्यादि । एवं अमुना प्रकारेण, विधिना-र्थादुपदेशेन, पक्कं यद्वीजवरं, तथा पूर्वसंस्कृतः सूतराट् पारदः, अम्लेन जम्बीरादिना संस्वेद्यः स्वेदाख्यो विधिः कर्तव्यः । अत्र किमावधिस्तत्कर्तव्यो ? यावत् श्लक्ष्णा स्पष्टा पिष्टी एकशरीरता भवेत्, रसवीजयोरिति शेषः ॥ ५३ ॥

तैलेन तेन विधिना स्विन्ना पिष्टी भवेदखिलम् ।
अथवा श्लक्ष्णं शिलया निघृष्टबीजं भवेत्पिण्डी ॥ ५४ ॥

विध्यन्तरमाह—तैलेनेत्यादिना । तेन पूर्वोक्तेन, विधिना वधविधानेन, तिल-तैलेन स्विन्ना स्वेदिता सती पिष्टिर्भवति, वह्नाविति शेषः । अथवेति विधानान्तरं दर्शयति । शिलया दृषन्मयया, निघृष्टबीजं निघृष्टं घर्षितं यद्बीजं नागाख्यं तत्, सूतेनेति शेषः; अखिलं समस्तं यथा स्यात्तथा पिष्टिर्भवतीति ॥ ५४ ॥

पाको वटकविधिना कर्तव्यस्तैलयोगेन ।
क्रामणपिण्डे क्षिप्त्वा माषैश्च स्यात्सुदृढपिण्डत्वम् ॥ ५५ ॥

यथा वटकः पाच्यस्तथाह—पाक इत्यादि । वटकविधिना माषवटकविधिना, तैलयोगेन पाकः कर्तव्यः वह्नौ पाचनं विधेयमित्यर्थः । किं कृत्वा ? क्रामण-पिण्डे क्षिप्त्वा बिडपिण्डमध्ये स्थाप्य, च पुनर्माषैरन्नविशेषैर्दृढपिण्डत्वं स्यात् माषचूर्णवेष्टितं क्रामणपिण्डं दृढं भवेदिति व्यक्तिः ॥ ५५ ॥

मृद्वग्निना सुपक्कं दग्धं यावन्न तद्भवेत्पिण्डम् ।
आकृष्य चाथ सूतं पिण्डे शेषं तथा पुनः पाच्यम् ॥ ५६ ॥

तद्विधानमाह—मृद्वित्यादि । माषचूर्णितजातं कामणपिण्डं तावत् सुपक्वं कर्तव्यं यावद्दग्धं न भवेत् । केन सुपक्वं ? मृद्वग्निना कोमलवह्निना पुटः; तत्पिण्डतः शेषं शिष्टं तं निर्मलपारदं आकृष्य गृहीत्वा पिण्डमन्यस्मिन् पिण्डे तथा पूर्वप्रकारेण पाच्यमिति ॥ ५६ ॥

अथवाप्यौषधपिण्डे दोलातप्ते खर्परे विधिना ।
पुनरपि पिण्डे क्षेप्यं गर्भे यावद्द्रुतिर्भवति ॥ ५७ ॥

अपरं चाह—अथवेत्यादि । अथवेति प्रकारान्तरे । पुनरपि पिष्टीर्दोलातप्ते औषधपिण्डे दोलयोत्तप्ते उष्णतां नीते कामणौषधानां पिण्डे क्षेप्य मध्ये स्थाप्य; कस्योपरि ? खर्परे मृन्मयपात्रोपरि । केन विधिना ? पूर्वोक्तेन तैलेन वा अम्लेनेति । कियत्कालं ? यावद्गर्भे रसोदरे पिष्टी द्रवति तावद्विडान्तरे पिण्डान्तरे क्षेप्येति तात्पर्यार्थः ॥ ५७ ॥

एवं द्रुतं हि गर्भे बीजवरं जरति रसराजे ।
गर्भद्रुत्या रहितं विडयोगैर्जरति गर्भे च ॥ ५८ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयाख्ये तन्त्रे गर्भद्रुत्यात्मकः पञ्चमोऽवबोधः ।

अपरं चाह—एवमित्यादि । एवं अमुना प्रकारेण, गर्भे रसोदरे, जरति निःशेषत्वं प्राप्नोति, च पुनर्गर्भद्रुत्या रहितं रसोदरे द्रवेण वर्जितं बीजवरं बिडैर्जरति द्रुतबीजमारणसमर्थो विड इत्यर्थः । "द्रुतग्रासपरिमाणो विडयन्त्रादियोगतः । जारणेत्युच्यते तस्याः प्रकाराः सन्ति कोटिशः" प्रकारा 'यन्त्राणां' इति शेषः । जारणभेदास्तु—"ग्रासस्य चारणं गर्भद्रावणं जारणं तथा । इति त्रिरूपा निर्दिष्टा जारणा वरवार्तिकैः"—इति ॥ ५८ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां
मुग्धावबोधिन्यां रसहृदयटीकायां गर्भद्रुत्यात्मकः
पञ्चमोऽवबोधः ॥ ५ ॥

अथ षष्ठोऽवबोधः ।

अथ बीजादिप्रमाणजारणयुक्तिः प्रारभ्यते ।

परितापकरो धूर्तखलव्यसनिनां च यः ।
सत्यधर्मपरीतानां चन्द्रचन्दनसाधुवत् ॥

ग्रासमिति चारयित्वा गर्भद्रुतिं ततो भूर्जे।
लवणक्षाराम्लसुधासुरभीमूत्रेण कृतलेपे ॥ १ ॥

गर्भद्रुतिजारणमाह—ग्रासमित्यादि । पूर्वोक्तप्रकारेण ग्रासं कवलं यथासंख्यं चारयित्वा, पुनर्गर्भद्रुतिं कृत्वा, ततस्तदनन्तरं तद्गर्भद्रुतं सूतं, भूर्जे भूर्जवृक्षत्वक्पुटके स्थापयेदित्यर्थः । किंविशिष्टे भूर्जे ? लवणक्षाराम्लसुधासुरभिमूत्रेण कृतलेपे; लवणानि सैन्धवादीनि, क्षाराः स्वर्जिकादयः, अम्लो जम्बीरादिः, सुधा शुक्तिचूर्णं, सुरभी धेनुस्तन्मूत्रं, एतेन योगेन कृत्वा कृतो लेपो यस्मिन् । उदरद्रुतियुक्तः सूतः स्थाप्य इत्यर्थः ॥ १ ॥

दृढवस्त्रबाह्यबद्धे दोलास्वेदेन जारयेद्ग्रासम् ।
सौवीरेणार्धपूर्णे कुम्भे सक्षारमूत्रकैरथवा ॥ २ ॥

जारणविधानमाह—दृढेत्यादि । दृढवस्त्रबाह्यबद्धे इति दृढं नूतनं घनं च यद्वस्त्रं तेन बाह्ये सर्वतो बद्धे संयते, पूर्वोक्तेन दोलास्वेदेन दोलायन्त्रविधिना यः स्वेदस्तं कृत्वा, ग्रासं रसान्तर्द्रुतं कवलं जारयेत् । कुत्र ? कुम्भे कलशे; किंविशिष्टे ? सौवीरेणार्धपूर्णे सौवीरेण स्वेदनसंस्कारोदितकाञ्जिकेन कृत्वा अर्धपूर्णे । अथवेति विध्यन्तरे । सक्षारमूत्रकैः सह क्षारैः स्वर्जिकादिभिः वर्तन्ते यानि मूत्राणि गोजाविनारीणामिति शेषः, एतैः अर्धभृते कुम्भे जारयेदित्यर्थः ॥ २ ॥

अमुना क्रमेण दिवसैस्त्रिभिस्त्रिभिर्जारयेद्ग्रासम् ।
जीर्णस्य लक्षणमथो ज्ञेयं यन्त्रात्समुद्धृत्य ॥ ३ ॥

अथ रसजारणे कालसंख्यामाह—अमुनेत्यादि । अमुना क्रमेणेति उक्तप्रकारेण, त्रिभिस्त्रिभिर्दिवसैः त्रिभिः संख्याकैर्दिवसैः ग्रासे जाते अन्यग्रासः क्रियते गर्भद्रुतग्रासः क्रियते, गर्भद्रुतग्रासः त्रिदिवसैर्जरतीति भावः । अथेति त्रिदिनस्वेदानन्तरं जीर्णस्य रसस्य लक्षणं ज्ञेयं ग्रासो जीर्णो न वेति ज्ञातव्यः । किं कृत्वा ? यन्त्राद्दोलिकाभिधानादुद्धृत्य यन्त्राद्बहिर्गृहीत्वेति ॥ ३ ॥

उद्धृतमात्रं पात्रे प्रक्षाल्य काञ्जिकेनातः ।
समलं च काञ्जिकमतो हरणार्थं वस्त्रयोगेन ॥ ४ ॥

रसमलापनयनमाह—उद्धृतेत्यादि । उद्धृतमात्रमिति यन्त्राद्बहिर्गृहीतमात्रं तत्पात्रे भाजने मृन्मये काञ्जिकेन प्रक्षाल्य । पुनरतो रसात्समलं मलसंयुतं काञ्जिकं हरणीयं बहिः कार्यम् । केन कृत्वा ? वस्त्रयोगेन वस्त्रे क्षिप्तं सत् तदेव तिष्ठति न काञ्जिकम् ॥ ४ ॥

तदनु सुखोष्णे पात्रे संमर्द्योऽसौ यथा न हीयेत ।
तावद्यावच्छुष्यति तल्लग्नं काञ्जिकं सकलम् ॥ ५ ॥

तस्यैव विधानं चाह—तदन्वित्यादि । तदनु वस्त्रयोगानन्तरं सुखोष्णे पात्रे असौ रसः संमर्द्यः । कथं ? यथा न हीयेत नाशं नाप्नुयात्; अत्यौष्ण्यात्, वा कांस्यताम्रनागवङ्गकनकतारपात्रात्, वा दृढकरघातात् रसो हीन एव स्यात्; अतोऽसौ पारदस्तावत् संमर्द्यो यावल्लग्नं काञ्जिकं रससंसर्गसौवीरं शुष्यति निःशेषतां यातीत्यर्थः ॥ ५ ॥

इत्थं च शोषितजलः करमर्दनतः सुनिर्मलीभूतः ।
पीड्यः पात्रस्योपरि वस्त्रेण चतुर्गुणेनैव ॥ ६ ॥

तस्यैव विधानं चाह—इत्थमित्यादि । इत्थं अमुना प्रकारेण, करमर्दनतः हस्ततलमर्दनतः, सुनिर्मलीभूतो मलरहितः, शोषितजलो रसश्चतुर्गुणेन वस्त्रेण कृत्वा पात्रस्योपरि पीड्यः ॥ ६ ॥

यदि परिगलितः सकलो वस्त्राद्ग्रासेन चैकतां यातः ।
न भवति यदि दण्डधरो जीर्णग्रासस्तदा ज्ञेयः ॥ ७ ॥

जीर्णग्रासलक्षणमाह—यदीत्यादि । तदा पारदो जीर्णग्रासो ज्ञेयः जीर्णो निःशेषत्वमापन्नो ग्रासो यस्मिन् स तथोक्तः । यदि सकलः सर्वः, वस्त्रात्परिगलितः चतुर्गुणवस्त्रात् च्युतो भवति 'पात्रे' इति शेषः । पुनर्यदि ग्रासेन सह एकतां यातः सन् मिलितः सन्, रसो दण्डधरो न भवति स्थिररूपो न स्यात्, तदा जीर्णग्रासो ज्ञातव्य इत्यर्थः ॥ ७ ॥

ग्रासादजीर्णपिष्टीं सूतादुद्धृत्य पातयेद्यन्त्रे ।
स्वस्थो भवति रसेन्द्रो ग्रासः पक्वः पुनर्जरति ॥ ८ ॥

रसाजीर्णलक्षणमाह—ग्रासादित्यादि । ग्रासात् कवलसंयोगात् अजीर्णपिष्टीं अजीर्णा अपरिपक्वा या पिष्टी पूर्वोक्तलक्षणा तां, सूतात् रसात्, यन्त्रे पातनकर्मोचिते पातयेत् । एवं ग्रासात्पृथक्कृत्य पतितः स्वस्थो निर्मलो भवति । पुनर्ग्रासः पक्वो वह्निं तले दत्त्वा पक्वः कृतस्तं रसेन्द्रो जरतीति ॥ ८ ॥

दोलायां चत्वारो ग्रासा जार्या यथाक्रमेणैव ।
शेषाः कच्छपयन्त्रे यावद्द्विगुणादिकं जरति ॥ ९ ॥

ग्रासजारणायां यन्त्रादिकरणमाह—दोलायामित्यादि । यथाक्रमेणैव चतुःषष्ट्यादिनैव चत्वारो ग्रासा दोलायां जार्याः; शेषा ग्रासाश्चत्वारः असंख्या वा

कच्छपयन्त्रे जलयन्त्रे च जार्याः । शेषाश्चत्वारः कुतः ? यतो अन्यशास्त्रेषु अष्टैव ग्रासाः । जारणे किमवधिः ? यावद्द्विगुणादिकं जरति पारदाद्द्विगुणितं, आदिशब्देन द्विगुणान्न्यूनं न कार्यं, अधिकमधिकं च भवतु । शक्त्यवतरेऽष्टौ, बृहच्छास्त्रे क्वचिदष्टौ ग्रासा उक्ताः क्वचिद्विंशतिग्रासा इति ॥ ९ ॥

नादौ कर्तुं शक्यो ह्यत्र ग्रासप्रमाणनियमस्तु ।
ग्रसते नहि सर्वाङ्गं गगनमतो लक्षणैर्ज्ञेयम् ॥ १० ॥

ग्रासेऽनिर्दिष्टसंख्यत्वं दर्शयन्नाह—नेत्यादि । अत्रास्मिन् शास्त्रे, आदौ प्रथमं, ग्रासप्रमाणनियमः कर्तुं न शक्यः । यतः कारणात् गगनमभ्रं सर्वाङ्गं न ग्रसते 'रस' इति शेषः । तत्सर्वाङ्गग्रस्तं गगनमभ्रं लक्षणैरेव ज्ञातव्यमित्यर्थः ॥ १० ॥

यदि हि चतुःषष्ट्यंशान् ग्रसति रसस्तदा धरेद्दण्डम् ।
चत्वारिंशद्भागप्रवेशतः पायसाकारः ॥ ११ ॥

चतुःषष्ट्यंशादिग्रासे रसाकारमाह—यदीत्यादि । यदि चेद्रसः चतुःषष्ट्यंशान् प्रमाणतो ग्रासं ग्रसति, हि निश्चितं, तदा दण्डं धारयेत् वस्त्रान्न क्षरतीत्यर्थः । पुनश्चत्वारिंशद्भागप्रवेशतो 'रसोदरे' इति शेषः; तदा पायसाकारः क्वथितदुग्धाकारो भवेत्, निबिडत्वात् ॥ ११ ॥

भवति जलौकाकारस्त्रिंशद्भागादविप्लुषश्च विंशत्या ।
छेदीव षोडशांशादत ऊर्ध्वं दुर्जरो ग्रासः ॥ १२ ॥

तदेवाह—भवतीत्यादि । त्रिंशद्भागात् त्रिंशद्भागस्य जारणतो जलौकाकारो भवेत् 'रस' इत्यध्याहारः । पुनः विंशत्या विंशद्भागजारणेन अविप्लुषो भवेदासनान्न चलति । पुनः षोडशांशात् षोडशांशभागजारणतः छेदी भवेत् क्षुरिकादिभिः छेदे कृते पृथक्त्वमाप्नोति । अतः षोडशभागादूर्ध्वं ग्रासो दुर्जरो भवेत् ॥ १२॥

पञ्चभिरेभिर्ग्रासैर्घनसत्वं जारयित्वाऽऽदौ ।
गर्भद्रावे निपुणो जारयति बीजं कलांशेन ॥ १३ ॥

तच्चाह—पञ्चभिरित्यादि । एवं उक्तप्रकारेण पुनर्गर्भद्रावे निपुणः रसोदरे अभ्रधात्वादीनां द्रुतिकरणे प्रवीणः पुमान्, कलांशेन ग्रासं योजयेत् । किं कृत्वा? पञ्चभिः पूर्वोक्तैः ग्रासैश्चारु यथास्यात्तथा घनसत्वमादौ जारयित्वा, पञ्चभिर्ग्रासैर्घनसत्वजारणानन्तरं षोडशभागेन बीजं जारयेदित्यर्थः ॥ १३ ॥

धूम्रश्चिटिचिटिशब्दो मण्डूकगतिस्तथा सकम्पश्च ।
निष्कम्पो भवति रसो विज्ञातव्योऽभ्रजीर्णस्तु ॥ १४ ॥

अभ्रकजीर्णरसलक्षणमाह—धूम्र इत्यादि। अभ्रजीर्णरस एवंविधो भवति, अभ्रं जीर्णं यस्मिन् स तथोक्तः । वह्नियोगात्प्रथमं धूम्रो धूम्राभो भवति, पुनश्चिटिचिटिशब्दो भवति, ततो मण्डूकगतिर्भवति, पुनस्तथा तेन प्रकारेण धृते सति सकम्पो भवति, पुनर्वह्नौ निष्कम्पः स्वस्थो भवति, अभ्रसत्वद्रुतस्य लक्षणमिति ॥ १४ ॥

कपिलोऽथ निरुद्गारी विप्लुपभावं च मुञ्चते सूतः ।
निष्कम्पो गतिरहितो विज्ञातव्योऽभ्रजीर्णस्तु ॥ १५ ॥

तदेवाह—कपिल इत्यादि । पुनरेवंविधो रसोऽभ्रजीर्णो विज्ञातव्यः । कीदृशः? कपिलः वर्णतः, निरुद्गारी स्थिरभावः, पुनः स रसो विप्लुषभावं चञ्चलत्वं मुञ्चते । पुनर्निष्कम्पः स्वस्थः, पुनर्गतिरहितः पक्षच्छिन्नः, इति लक्षणान्यभ्रजीर्णस्य भवन्ति ॥ १५ ॥

जलपूर्णपात्रमध्ये दत्त्वा घटखर्परं सुविस्तीर्णम् ।
तदुपरि बिडमध्यगतः सूतः स्थाप्यस्ततः कुड्ये ॥ १६ ॥
लघुलोहकटोरिकया कृतपटमृत्सन्धिलपेयाच्छाद्य ।
पूर्णं तद्घटखर्परमङ्गारैः करीषतुषमिश्रैः ॥ १७ ॥

कच्छपयन्त्रमाह—जलेत्यादि । जलपूर्णपात्रमध्ये इति जलपूर्णं यत्पात्रं तस्य मध्ये, सुविस्तीर्णं सुन्दरायतं, घटखर्परं कुम्भखण्डं दत्त्वा, तदुपरि खर्परोपरि, बिडमध्यगतः सूतः स्थाप्यः । कुत्र? कुड्ये मृदा विनिर्मिते विशालमुखे, लघुलोहकटोरिकया अतिलघ्वी या लोहस्य मुण्डादेः कटोरिका पात्रविशेषः, तया बिडावृतं सूतं आच्छाद्य आसमन्तात्संरुध्य । किंविशिष्टया? कृतपटमृत्सन्धिलेपया कृतः पटमृद्भ्यां सन्धेर्लेपो रोधो यस्याः सा तया । पुनस्तत्कुड्यान्तर्गतघटखर्परं अङ्गारैः पूर्णं; किंविशिष्टैः? करीषतुषमिश्रैः करीषो गोमयस्य चूर्णं, तुषाः शाल्यादेर्धान्यस्य, तैर्मिश्रितैरिति ॥ १६ ॥ १७ ॥

स्वेदनतो मर्दनतः कच्छपयन्त्रस्थितो रसो जरति ।
अग्निबलेनैव ततो गर्भद्रुतिः सर्वलोहानाम् ॥ १८ ॥

कच्छपयन्त्रे यद्विहितं तदाह—स्वेदनत इत्यादि । कच्छपयन्त्रस्थो रसो जरति 'ग्रासं' इति शेषः । कुतः? स्वेदनतः वह्नौ परितापतः । न केवलं स्वेदनतो मर्दनतश्च 'बिडादिना' इत्यध्याहारः । ततो अग्निबलेनैव सर्वलोहानां स्वर्णादीनां अस्मिन्नन्तराले गर्भद्रुतिर्भवति, अत्राग्निबलमेव मुख्यं ॥ १८ ॥

एवं दत्त्वा जीर्यति न क्षयति रसो यथा तथा कार्यः ।
क्षयमेति क्षारबिडैः स तूपरसैर्ग्राससमुद्गिरति ॥ १९ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे बीजादिजारणात्मकः षष्ठोऽवबोधः ।

जारणायां विधिद्वयमाह—एवमित्यादि । एवममुना प्रकारेण कच्छपयन्त्रे निधाय जीर्यति 'ग्रासं रस' इति शेषः । यथा रसो न क्षयति क्षयं नाप्नोति तथा कार्यो 'विधिः' इति शेषः । कार्यस्याश्रयरक्षणायेति भावः । पुनः क्षारबिडैः क्षयमेति नाशमाप्नोति 'ग्रास' इत्यध्याहारः । पुनः स रस उपरसैर्गन्धादिभिः ग्रासं उत्प्राबल्येन गिरति गिलतीत्यर्थः । "क्षारैरम्लैश्च गन्धाद्यैर्मूत्रैः पटुभिरेव च । रसग्रासस्य जीर्णार्थं बिडः स परिकीर्तितः"—इति परिभाषा । बिडशब्देन पिण्डः ॥ १९ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजश्रीचतुर्भुजविरचितायां मुग्धावबोधिन्यां रसहृदयटीकायां बीजादिजारणात्मकः षष्ठोऽवबोधः ॥ ६ ॥

अथ सप्तमोऽवबोधः ।

अथ बिडविधानमारभ्यते ।

ग्रासं न मुञ्चति न वाञ्छति तं च भूयः
कांश्चिद्गुणान् भजति भुक्तविभुक्तिमात्रात् ।
यज्जीर्यते प्रचुरकेवलवह्नियोगा-
त्तस्माद्बिडैः सुनिबिडैः सह जारणा स्यात् ॥ १ ॥

बिडैर्जारणायाः सुगमत्वमाह—ग्रासमित्यादि । ग्रासं न मुञ्चति, च पुनस्तमेवान्यग्रासं न वाञ्छति, भूयः पुनः भुक्तविभुक्तिमात्रात् कांश्चिद्गुणान् नित्यं भजति दधाति, ग्रासग्रसनमात्रात् गुणं करोतीत्यर्थः । यतो हेतोर्बिडैर्वक्ष्यमाणलक्षणैः कृत्वा जीर्यते ग्रासमित्यर्थः । कुतः ? प्रचुरकेवलवह्नियोगात् प्रचुर उदग्रो यः केवलवह्नियोगः शुद्धाग्नियोगस्तस्मात् । किंविशिष्टैः ? सुनिबिडैः घनैः । यतो बिडाः श्रेष्ठास्तस्माद्बिडैरेव जारणा स्यात्, सुगमत्वादिति भावः ॥ १ ॥

सौवर्चलकटुकत्रयकाक्षीकासीसगन्धकैश्च बिडैः ।
शिग्रो रसशतभाव्यैस्ताम्रदलान्यपि च जारयति ॥ २ ॥

बिडविधानमाह—सौवर्चलेत्यादि । ताम्रदलान्यपि जारयति 'बुद्धिमान्' इति

शेषः, स्वर्णवीजादीनां का कथेति भावः । कैः कृत्वा ? विडैः कृत्वा । किंविशिष्टैः विडैः ? सौवर्चलकटुकत्रयकांक्षीकासीसगन्धकैः; सौवर्चलं रुचकं, कटुत्रयं शुण्ठीमरिचपिप्पल्यात्मकं, काक्षी सौराष्ट्री, कासीसं पुष्पकासीसं, गन्धकं लेलितकं, एतान्यौषधानि येषु विडेषु सन्ति ते तथोक्ताः, तैः । पुनः किंविशिष्टैः ? शिग्रो रसशतभाव्यैः शिग्रोः सौभाञ्जनस्य रसेन शतवारं भाव्याः ये विडास्तैः, एवं निष्पन्नैर्विडैर्निश्चितं जारणा स्यादिति भावः ॥ २ ॥

सर्वाङ्गदग्धमूलकभस्म प्रतिगालितं सुरभिमूत्रेण ।
शतभाव्यं वलिवसया तत्क्षणतो जार्यते हेम ॥ ३ ॥

विडान्तरमाह—सर्वेत्यादि । सर्वाङ्गदग्धमूलकभस्म प्रतिगालितमिति सर्वाङ्गेन मूलत्वक्पत्रपुष्पफलेन सह दग्धं भस्मतांप्राप्तं यन्मूलककन्दं तद्भस्म सुरभिमूत्रेण गोजलेन गालितं कार्यं क्षारो ग्राह्य इत्यर्थः । पुनर्वलिवसया बलमुख्या या जलौकामण्डूकादीनां वसा, यथा च,—"भेकमत्स्यवसा या तु कुक्कुटस्य वसाऽथवा । भाव्यमेभिः क्रमाद्गन्धं शिशुमारवसापि वा ॥ एका वलिवसा सम्यक् सूतस्य बन्धिनी परम् । रञ्जनं चैव कुरुते मणिमूषाविधिक्रमात्"–इति । वलिवसया शतं शतवारं क्षारभूतं भस्म भाव्यं; पुनः तच्छतभाव्यमौषधं तत्क्षणतः तत्कालतो हेम स्वर्णं जार्यते रसो ग्रासभूतं हेम जरतीति, विडयोगादिति भावः ॥ ३ ॥

कदलीपलाशतिलनिचुलकनकसुरदालिवास्तुकैरण्डाः ।
वर्षाभूवृषमोक्षकसहिताः क्षारो यथालाभम् ॥ ४ ॥

अथ क्षारवृक्षगुल्मौषधिविशेषानाह—कदलीत्यादि । यथालाभं लाभमनतिक्रम्य, एषां क्षारः कर्तव्यः । ते के? कदलीपलाशतिलनिचुलकनकसुरदालिवास्तुकैरण्डाः; कदली रम्भा, पलाशो ब्रह्मवृक्षः, तिलाः प्रतिताः, निचुलो वेतसवृक्षः, कनको धत्तूरः, सुरदाली देवदाली, वास्तुकं क्षारशाकं, एरण्डो वातारिः, एते क्षारसंभवाः । किंविशिष्टा एते ? वर्षाभूवृषमोक्षकसहिताः; वर्षाभूः पुनर्नवा, वृषो वासकः, मोक्षको 'मोखावृक्ष' इति प्रतीतः, एतैः संयुता इत्युद्देशः ॥ ४ ॥

आनीय क्षारवृक्षान् कुसुमफलशिफात्वक्प्रवालैरुपेतान्
कृत्वाऽतः खण्डशस्तान् विपुलतरशिलापिष्टगात्रातिशुष्कान् ।
दग्ध्वा काण्डैस्तिलानां करिसुरभिहयाम्भोभिरास्राव्य वस्त्रै-
र्भस्म त्यक्त्वा जलं तन्मृदुशिखिनि पचेद्वंशपाकेन भूयः ॥५॥

क्षारकरणविधानमाह—आनीयेत्यादि । प्रथमं क्षारवृक्षान् पूर्वोक्तानानीय

वनान्तराद्गृहीत्वा । किंविशिष्टान् ? कुसुमफलशिफात्वक्पलाशैरुपेतान्; कुसुमानि प्रसूनानि प्रतीतानि, शिफा मूलं, त्वक्त्वचा, प्रवाला नूतनपल्लवाः, एतैः पञ्चाङ्गाह्वयैरुपेतान् संयुतान् । खण्डशः बहुशकलान् कृत्वा । न केवलं खण्डशः विपुलतरशिलापिष्टगात्रातिशुष्कान् कृत्वा; विपुलतरा अतिविस्तीर्णा या शिला तस्यां पिष्टानि गात्राणि येषां तेऽशुष्का निरसाः, तानेवंविधान् कृत्वा । पुनस्तानेव च तिलानां काण्डैर्नालैः सह दग्ध्वा । पुनः करिसुरभिहयाम्भोभिः हस्तिगोश्वानां मूत्रैरास्राव्य आप्लुत्य, तद्भस्म त्यक्त्वा, वस्त्रैर्जलं ग्राह्यमिति शेषः । तज्जलं मृदुशिखिनि कोमलाग्नौ पचेत्; केन ? वंशपाकेन, वंशानां समवह्नित्वात् ॥ ५ ॥

तच्छुष्यमाणं हि सबाष्पबुद्बुदान् यदा विधत्ते क्षणभङ्गुरान् बहून् ।
तदा क्षिपेत्र्यूषणहिङ्गुगन्धकं क्षारत्रयं षड् लवणानि भूखगौ ६

क्षारजलपाकलक्षणमाह—तदित्यादि । तज्जलं क्षारपानीयं शुष्यमाणं सत् निश्चितं यदा सबाष्पबुद्बुदान् विधत्ते सह बाष्पेण जलात्ययधूमेन वर्तन्ते ये बुद्बुदास्तान्; तदा क्षारो निष्पन्नो ज्ञेयः । पुनस्तदा त्र्यूषणं शुण्ठीमरिचपिप्पल्यः, हिङ्गु रामठं, गन्धकं लेलीतकं, पुनः क्षारत्रयं सर्जिकायवाग्रजटङ्कणाह्वयं, लवणानि षट् सैन्धवादीनि, भूः तुवरी, खगं कासीसं, एतानि क्षिपेत् एतत्क्षारेणार्द्रेण सह मिश्रं कार्यमित्यर्थः ॥ ६ ॥

द्रव्याणि संमिश्र्य निवृत्य भूतले व्यवस्थितं शस्त्रकटोरिकापुटे।
संस्थापयेत्सप्तदिनानि धान्यगतं प्रयोज्यं रसजारणादिकम् ७

तथा च द्रव्याणि त्र्यूषणादीनि संमिश्र्य एकीकृत्य, निवृत्य च संमर्द्य, शस्त्रकटोरिकापुटे लोहमयपात्रसंपुटे व्यवस्थितं सप्तदिनानि धान्यगतं कस्यचिद्धान्यस्य मध्यगतं स्थापयेत्; कुत्र ? भूतले पृथिव्या आस्थाने, ततोऽनन्तरं तत्सिद्धं रसजारणादिकं प्रति प्रयोज्यं; एतद्विडरूपं रसजारणादिषु प्रशस्तमित्यर्थः ॥ ७ ॥

जम्बीरबीजपूरकचाङ्गेरीवेतसाम्लसंयोगात् ।
क्षारा भवन्ति नितरां गर्भद्रुतिजारणे शस्ताः ॥ ८ ॥

जारणायां क्षारविधानमाह—जम्बीरेत्यादि । क्षारा उक्तवृक्षोद्भवाः नितरामतिशयेन, गर्भद्रुतिजारणे रसान्तर्ग्रासजारणे, शस्ता उत्कृष्टा भवन्ति । कुतः ? जम्बीरबीजपूरकचाङ्गेरीवेतसाम्लसंयोगात्; जम्बीरः प्रतीतः, बीजपूरको मातुलुङ्गः, चाङ्गेरी अम्लपत्रिका, वेतसाम्लं चुक्रकं, एषां यो रसस्तस्य संयोगात्; एतैर्भाविताः क्षारा बिडवत्कार्यकरा इति भावः ॥ ८ ॥

त्रिडमधरोत्तरमादौ दत्त्वा सूतस्य चाष्टमांशेन ।
कुर्याज्जारणमेवं क्रमक्रमाद्वर्धयेदग्निम् ॥ ९ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयाख्ये तन्त्रे विडात्मकः सप्तमोऽवबोधः ।

रसे विडयोजनमाह—विडमित्यादि । आदौ प्रथमं, सूतस्य रसस्याष्टमांशेन पूर्वनिर्मितं विडं अधरोत्तरं अध उपरिभागं च दत्त्वा; एवं अमुना प्रकारेण जारणं कुर्यात्; पुनः क्रम्यते अनेनेति क्रमो विडरूपः तत्क्रमः परंपरा तस्मात्, अग्निं विवर्धयेत्'कर्मक्रत्' इत्यध्याहारः, वारंवारं विडसंप्रयोगादग्निर्विर्धते ॥ ९ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां
मुग्धावबोधिन्यां रसहृदयटीकायां विडात्मकः
सप्तमोऽवबोधः ॥ ७ ॥

अथाष्टमोऽवबोधः ।

अथ रसरागोऽभिधास्यते ।

जीर्णाभ्रको रसेन्द्रो दर्शयति घनानुरूपिणीं छायाम् ।
कृष्णां रक्तां पीतां सितां तथा संकरैर्मिश्राम् ॥ १ ॥

द्योतते दिवि चन्द्रोऽसौ जीर्णेऽभ्रे कान्तिमत्तया ।
तथेह तामुपाश्रित्य शालते मनुजेषु च ॥ १ ॥

''सुसिद्धविडधात्वादिजारणेन रसस्य हि । पीतादिरागजननं रञ्जनं परिकीर्तितम्''–इति परिभाषा । अभ्रस्य छायाविशेषमाह—जीर्णाभ्रक इत्यादि । रसेन्द्रो यदा जीर्णाभ्रो भवति तदा घनानुरूपिणीं जीर्णाभ्रसमवर्णां छायां दर्शयति । कृष्णे जीर्णे कृष्णां, रक्तेऽभ्रे जीर्णे रक्तां, पीते पीतां, तथा सिते शुभ्रे सितां, एवं चतुर्विधां छायां दर्शयति । पुनर्द्वयोस्त्रयाणां वा चतुर्णां संकरे मेलापे सति द्वित्रिचतुर्णामनुरूपिणीं छायां दर्शयतीत्यर्थः ॥ १ ॥

कृष्णाभ्रकेण बलवदसितरागैर्युज्यते रसेन्द्रस्तु ।
श्वेतै रक्तैः पीतैर्वद्धेः खलु वर्णतो ज्ञेयः ॥ २ ॥

अभ्रयोगाद्वर्णविशेषमाह—कृष्णेत्यादि । कृष्णाभ्रकेण जीर्णेन रसो बलवान् भवेत्; तु पुनः असितरागैः कृष्णरागैर्युज्यते । तथा श्वेतेन श्वेतै रागैर्युज्यते, रक्तेन रक्तैः, पीतेन पीतैः, कपिलाभ्रैर्दिव्यस्यापि सर्वस्यादर्शनरूप क्षयकरस्य बलैर्द्रव्याणां तादृशो वर्णो रसवर्णतो वर्णकोविदैर्ज्ञेयः ॥ २ ॥

अथ निजकर्मे वर्णं न जहाति यदा स रज्यते रागैः ।
क्रमशो हि वक्ष्यमाणैर्निर्णिक्तो रञ्जनं कुरुते ॥ ३ ॥

रञ्जितरसप्रशंसामाह—अथेत्यादि । अथानन्तरं रसः रसेन्द्रो यदा वक्ष्यमाणैः श्वेतादिभिः रागैः रज्यते, तदा निजकर्मैः वर्णं स्वकीयमेव स्वाभाविकं रूपं न जहाति न त्यजति, पुनस्तैरेव रागैः निर्णिक्तो रक्तः सन्, रञ्जनं कुरुते रागदायी भवतीति । तथा नो रक्तो न रञ्जनं कुरुते, अविद्यमानत्वान्निषेधः ॥ ३ ॥

बलमास्तेऽभ्रकसत्वे जारणरागाः प्रतिष्ठितास्तीक्ष्णे ।
बन्धश्च सारलोहे सारणमथ नागवङ्गाभ्याम् ॥ ४ ॥

अभ्रसत्वादीनां योगे रसे व्यवस्थामाह—बलमित्यादि । अभ्रकसत्वेऽधिकरणे बलमास्ते अभ्रसत्वसंयोगेन रसो बलमाप्नोतीत्यर्थः । पुनस्तीक्ष्णे लोहभेदे जारणरागा जारणेन तीक्ष्णस्था रागाः प्रतिष्ठिता भवन्तीत्यर्थः । सारणमथ नागवङ्गाभ्यामिति नागवङ्गाभ्यां दुःसरणं सारणद्रव्यं सरत इति ॥ ४ ॥

क्रामति तीक्ष्णेन रसस्तीक्ष्णेन च जीर्यते क्षणाद्ग्रासः ।
हेम्नो योनिस्तीक्ष्णं रागान् गृह्णाति तीक्ष्णेन ॥ ५ ॥

सर्वकारणं तीक्ष्णमाह—क्रामतीत्यादि । तीक्ष्णेन लोहभेदेन रसः क्रामति क्रामणं विदधाति, पुनस्तीक्ष्णेन कृत्वा ग्रासः क्षणादल्पकालतो जीर्यते जारणमाप्नोति, पुनर्हेम्नः सुवर्णस्य योनिरुत्पत्तिस्थानं तीक्ष्णमस्ति, पुनः रागान् रञ्जनभावान् तीक्ष्णेन कृत्वा रसो गृह्णाति स्वस्मिन् रागान् दधातीत्यर्थः ॥ ५ ॥

तदपि च दरदेन हतं हत्वा माक्षिकेण रविसहितम् ।
वासितमपि वासनया घनवच्चार्यं च जार्यं च ॥ ६ ॥

तीक्ष्णस्य हिङ्गुलयोगेन गुणाधिक्यमाह—तदपीत्यादि । अपि निश्चयेन, तत् तीक्ष्णं, दरदेन हिङ्गुलेन, हतं मारितं, वा माक्षिकेन स्वर्णमाक्षिकेन रविसहितं ताम्रसंयुतं तीक्ष्णं हतं मारितं, पुंनर्वासनया वासनौषधेन वासितं परिभावितं, घनवदभ्रवत् चार्यं जार्यं च, सत्वाभ्रवत् नान्यथा ॥ ६ ॥

कान्तं वा तीक्ष्णं वा काञ्चीं वा वज्रसस्यकादीनाम्[१] ।
एकतमं सर्वं वा रसरञ्जने संकरोऽभीष्टः ॥ ७ ॥

तीक्ष्णवदेतानाह—कान्तमित्यादि । रसरञ्जने रसेन्द्रे रागकर्मणि, कान्तं चुम्बकपाषाणोत्थं लोहं श्रेष्ठं, वेति समुच्चये, तीक्ष्णं लोहभेदो वा, काञ्चीं स्वर्णमाक्षिकं

---

१ 'वज्रसस्यकं वापि' इति पाठान्तरम् ।

वा; वज्रसस्यकादीनां वज्रसस्यकावादिर्येषां ते, तेषां हीरकचपलादीनां; एकतमं तन्मध्यादेकतमं, सर्वं वा; अत्राभीष्टशब्दस्य प्रत्येकं संबन्धः; हीरकादीनि रत्नानि, सस्यकाद्या उपधातवः । वा रसरञ्जने अयमेव संकरः सर्वेषां कान्तादीनां मेलापः सर्वत्राभीष्टः ॥ ७ ॥

कुटिले बलमभ्यधिकं रागस्तीक्ष्णे तु पन्नगे स्नेहः ।
रागस्नेहबलानि तु कमले शंसन्ति धातुविदः ॥ ८ ॥

स्वे स्वे विकारे वक्ष्यमाणमाह—बलमित्यादि । धातुविदो रसवैद्या इति शंसन्ति । इति किं ? कुटिले बलं अभ्यधिकं सर्वाधिकं, पुनस्तीक्ष्णेऽभ्यधिको रागः रञ्जनं, तु पुनः पन्नगे नागेऽभ्यधिकं स्नेहः स्निग्धत्वं, तु पुनः रागस्नेहबलानि त्रीण्येवोक्तानि कमले ताम्रे, कुटिलतीक्ष्णपन्नगानां जारणाद्रसे यथा बलरागस्नेहा भवन्ति तथैकताम्रजारणात्रयो भवन्तीत्यर्थः ॥ ८ ॥

सर्वैरेभिर्लोहैर्माक्षिकनिहतैस्तथा द्रुतैर्गर्भे ।
बिडयोगेन तु जीर्णो रसराजो बन्धमुपयाति ॥ ९ ॥

रसबन्धनोपायमाह—सर्वैरित्यादि । बिडयोगेन पूर्वोक्तेन जीर्णो जारणमापन्नो रसराजो बन्धमुपयाति बन्धनमादत्ते । कैः सह जीर्णः ? एभिः पूर्वोक्तैः सर्वैर्लोहैर्धातुभिः । किंविशिष्टैः ? माक्षिकनिहतैः स्वर्णमाक्षिकमारितैः । पुनः किंविशिष्टैः ? गर्भे रसोदरे द्रुतैर्विद्रुतैरिति ॥ ९ ॥

तालकदरदशिलाभिः स्नेहक्षाराम्ललवणसहिताभिः ।
समकद्विगुणत्रिगुणान् पुटो वहेद्वङ्गशस्त्रादीन् ॥ १० ॥

वक्ष्यमाणधातूनां मारणविधानमाह—तालकेत्यादि । वङ्गशस्त्रादीन् वङ्गं त्रपुषं, शस्त्रं तीक्ष्णं, ते आदिर्येषां ते तान् । काभिः सह पुटो वहेत् ? तालकदरदशिलाभिः; तालकं हरितालं, दरदं हिङ्गुलं, शिला मनःशिला, ताभिः । किंविशिष्टाभिः ? स्नेहक्षाराम्ललवणसहिताभिः; स्नेहः तैलं कङ्गुणितुम्बिन्यादीनां, क्षारः स्वर्जिकादिः, अम्लं जम्बीरादि, लवणानि सैन्धवादीनि, एतैः सहिताभिः । एकधातुतो द्वादशांशादारभ्य यावत्समकद्विगुणत्रिगुणभागाः समाप्यन्ते तावत्पुटो वहेदिति व्यक्तिः ॥ १० ॥

रक्तस्नेहनिषेकैः शेषं कुर्याद्रसस्य कृष्टिरियम् ।
चारणजारणमात्रात्कुरुते रसमिन्द्रगोपनिभम् ॥ ११ ॥

पुटितधातुकृत्यमाह—रक्तेत्यादि । उक्तधातुर्गर्भितं रसं रक्तस्नेहनिषेकैः रक्तो रक्तवर्गः, स्नेहः कङ्गुण्यादीनां, अनयोर्निषेकाः सिञ्चनानि, तैः शेषं धातुवर्जितं

कुर्यात्; इयं रसस्य कृष्टिः रसस्य गुणाकर्षणं; पुनरियं कृष्टिः रसेन्द्रं इन्द्रगोपनिभं कुरुते अतिरक्तवर्णं कुरुते। कुतः ? चारणजारणमात्रात् पुनः पुटितधातूनां चारणं च जारणं जीर्णकरणं च तन्मात्रात्; वा चारणस्य द्रव्यस्य जारणं तन्मात्रात्; उभयोः पक्षयोरेक एवार्थः, परमुक्तिविशेषः ॥ ११ ॥

अथवा केवलममलं कमलं दरदेन वापितं कुरुते।
त्रिगुणं हि चीर्णजीर्णं लाक्षारससन्निभं सूतम् ॥ १२ ॥

मुख्यत्वेन ताम्रप्रशंसनमाह—अथवेत्यादि। अथवेति विधानान्तरे, केवलं शुद्धं वाऽन्यसंयोगेन वर्जितं, अमलं जातपूर्वशोधनं, त्रिगुणं चीर्णजीर्णं कुर्यादित्यर्थः, पूर्वं चीर्णं चारणमाप्तं पश्चाज्जीर्णं जारणमापन्नं, एवंभूतं ताम्रं सूतं लाक्षारससन्निभं अलक्तकप्रभं कुरुते ॥ १२ ॥

रक्तगणगलितपशुजलभावितताप्यगन्धकशिलानाम्।
एकेन वापितमृतं कमलं रञ्जयति रसराजम् ॥ १३ ॥

विध्यन्तरमाह—रक्तेत्यादि। रक्तगणेन दाडिमकिंशुकबन्धूकादिना पूर्वोक्तेन गलितं यत् पशुजलं गोमूत्रं, तेन भाविता यास्ताप्यगन्धकमनःशिलास्तासां मध्यादेकेन ताप्येन स्वर्णमाक्षिकेन, वा गन्धकेन, वा शिलया, वापितमृतं सत् कमलं ताम्रं, रसं रञ्जयति रागं ददातीत्यर्थः ॥ १३ ॥

बाह्यो गन्धकरागो विलुलितरागे मनःशिलाताले।
माक्षिकसत्वरसकौ द्वावेव हि रञ्जने शस्तौ ॥ १४ ॥

रागाधिकारिगन्धकादीनाह। तत्र गन्धकः कीदृशं रागं ददाति तत्स्वरूपमाह—बाह्य इत्यादि। गन्धकरागो बाह्यो बहिर्भवः; पुनर्मनःशिलाताले मनःशिला मनोह्वा, तालं हरितालं, तावुभे विलुलितरागे चञ्चलरागे; पुनर्माक्षिकसत्वरसकौ स्वर्णमाक्षिकसत्वखर्परिकौ द्वावेव रञ्जने रसरागे शस्तौ गन्धकमनःशिलाताप्लेभ्यः प्रधानौ, अत्यधिकावित्यर्थः ॥ १४ ॥

क्रमवृत्तौ रविरसकौ संशुद्धौ मूकमूषिकाध्मातौ।
त्रिगुणं चीर्णो जीर्णो हेमाभो जायते सूतः ॥ १५ ॥

प्रधानयोस्ताम्रखर्परयोः कृत्यमाह—क्रमवृत्तावित्यादि। क्रमवृत्तौ रविरसकौ संशुद्धौ विशेषविधानेन शोधितौ, वा उत्तमजातीयौ; मूकमूषिकाध्मातौ अन्धमूषायां ध्मातौ वह्नियोगीकृतौ कार्यौ; एतत्त्रिगुणं यथा स्यात्तथा चीर्णो जीर्णश्च सूतः हेमनिभो जायते; एतेन चारणमापन्नः पश्चात्तेनैव जारणामापन्नो रसः स्वर्णप्रभो भवेदित्यर्थः ॥ १५ ॥

अथ कृष्णाभ्रकचूर्णं पुटितं रक्तं भवेत्तथा सकलम् ।
त्रिगुणं चीर्णो जीर्णो हेमद्रुतिसन्निभः सूतः ॥ १६ ॥

अभ्रकयोगमाह—अथेत्यादि । अथ रसकयोगानन्तरं कृष्णवर्णाभ्रकचूर्णं श्यामवर्णाभ्रकरजः, तथा रविरसकविधानेन खर्परकेण सहितं पुटितं सत्, सकलं समस्तं रक्तं भवेत्, तद्रक्तभूतमभ्रं त्रिगुणं यथा स्यात्तथा चीर्णः चारणमापन्नः, ततो जीर्णो जारणमापन्नश्च सन्सूतो, हेमद्रुतिसन्निभः स्वर्णद्रवसदृशो भवेदित्यर्थः ॥ १६ ॥

त्रिगुणेन माक्षिकेण तु कनकं च मृतं रसकतालयुतम् ।
पटुसहितं तत्पक्वं हण्डिकया यावदिन्द्रगोपनिभम् ॥ १७ ॥

अथ स्वर्णमारणमाह—त्रिगुणेनेत्यादि । तु पुनः, त्रिगुणेन माक्षिकेण स्वर्णत्रिगुणितेन ताप्येन यत्कनकं मृतं तत्कनकं; इन्द्रगोपको वर्षाकालीनो रक्तवर्णो जीवविशेषः, तद्वन्निभा दीप्तिर्यस्य तदिन्द्रगोपनिभं, भवतीति शेषः । किंविशिष्टं कनकं ? मृतं रसकतालयुतं; रसकं खर्परं, तालं हरितालं, ताभ्यां युतं मिश्रितं सत् यन्मृतं पञ्चत्वमाप्तमित्यर्थः । पुनः पटुसहितं लवणमिश्रितं, पुनः हण्डिकया भाजनेन पक्वं वह्निपुटितं, तदपि पूर्ववत् ॥ १७ ॥

तच्चूर्णं सूतवरे त्रिगुणं चीर्णं हि जीर्णं तु ।
द्रुतहेमनिभः सूतो रञ्जति लोहानि सर्वाणि ॥ १८ ॥

मृतकनकचूर्णं सूतवरे पारदे, त्रिगुणं चीर्णं जीर्णं चारितं जारितं च सत् सूतो द्रुतहेमनिभो भवेत् गलितस्वर्णप्रभ इत्यर्थः । एवं रञ्जितो रसः सर्वलोहानि धातूनि कृत्रिमाकृत्रिमानि नवविधानि रञ्जति स्वर्णरूपाणि करोतीत्यर्थः ॥ १८ ॥

पत्रादष्टगुणं सत्वं सत्वादष्टगुणा द्रुतिः ।
द्रुतेरष्टगुणं बीजं तस्माद्बीजं तु जारयेत् ॥ १९ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे रसरञ्जनात्मकोऽष्टमोऽवबोधः ।

सर्वेषां धातुरसानामुत्तरोत्तरविशेषत्वमाह—पत्रादित्यादि । पत्रादष्टगुणं सत्वं अभ्रपत्रे जीर्णे सति रसे यो गुणस्तस्मादष्टगुणो गुणस्तत्सत्वे इत्यर्थः; पुनः सत्वात् द्रुतिस्तद्द्रवरूपा अष्टगुणा; पुनर्द्रुतेर्बीजं धातूपरससंयोगजनितं पूर्वोपवर्णितं तदष्टगुणं; ततः सर्वोत्कृष्टत्वाद्बीजं जारयेन्नत्वन्यत् ॥ १९ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां मुग्धावबोधिन्यां रसहृदयटीकायां रसरञ्जनात्मकोऽष्टमोऽवबोधः ॥ ८ ॥

अथ नवमोऽवबोधः।

अथ बीजविधानमभिधास्यते।

इति रक्तोऽपि रसेन्द्रो बीजेन विना न कर्मकृद्भवति।
द्विविधं तत्पीतसितं नियुज्यते सिद्धमेवैतत् ॥ १ ॥

हिमांशुरिव दीप्त्यासौ चण्डांशुरिव तेजसा।
निशाह्नोरिव कर्ता च दुर्जनैः सहनालयः (?) ॥
"निर्वापणविशेषेण तद्वद्वर्णं भवेद्यदा।
मृदुलं चित्रसंस्कारं तद्वीजमिति कथ्यते"—इति परिभाषा।

बीजप्रशंसनमाह—इतीत्यादि। इत्युक्तविधानेन रक्तोऽपि रसेन्द्रो बीजेन विना कर्मकृन्न भवति, बीजेनैव कर्मकारी स्यादित्यर्थः। तद्वीजं द्विविधं द्विप्रकारं; पीतसितं एकं पीतं, अपरं सितं श्वेतं, स्वर्णरूप्यक्रियायोग्यमित्यर्थः। तद्वीजं सिद्धं सर्वलक्षणोपेतं, रसे पारदे नियोज्यं नासिद्धमिति ॥ १ ॥

तस्य विशुद्धिर्बहुधा गगनरसोपरसलोहचूर्णैश्च।
द्विविधं बीजं तैरपि नाशुद्धैः शुध्यते वै तत् ॥ २ ॥

तस्येत्यादि। तस्य बीजस्य, विशुद्धिः शोधनं, बहुधा बहुप्रकारैः कृत्वा, रसोपरसधातूनां बहुविधत्वात्। कैः कृत्वा गगनरसोपरसलोहचूर्णैः; गगनमभ्रं, रसा वैक्रान्तादयोऽष्टौ वक्ष्यमाणाः, उपरसा गन्धकादयः, लोहा धातवः, तेषां चूर्णानि, तैः। च पुनः तैर्गगनरसोपरसलोहचूर्णैरशुद्धैः शुद्धिवर्जितैस्तद्वीजं न शुध्यते शुद्धिहीनं स्यात्, कारणानुरूपं कार्यमितिन्यायात् ॥ २ ॥

यः पुनरेतैः कुरुते कर्माशुद्धैर्भवेद्रसस्तस्य।
अव्यापकः पतङ्गी, न रसे रसायने योग्यः ॥ ३ ॥

अशुद्धबीजप्रभावमाह—य इत्यादि। पुनर्विशेषेण यः संस्कारकृदेतैर्गगनाद्यैरशुद्धैः कृत्वा रसस्य कर्म कुरुते तस्य पुरुषस्य रसः पारदो अव्यापको असरणशीलो भवेत्, पतङ्गी ऊर्ध्वगामी च भवेत्, यन्त्रस्याधोभागे न तिष्ठतीत्यर्थः ॥३॥

वैक्रान्तकान्तसस्यकमाक्षिकविमलाद्रिदरदरसकाश्च।
अष्टौ रसास्तथैषां सत्वानि रसायनानि स्युः ॥ ४ ॥

एते वक्ष्यमाणा अष्टौ रसाः रससंज्ञकाः स्युः। एते के? वैक्रान्तकान्तसस्यकमाक्षिकविमलाद्रिदरदरसकाश्चेति; वैक्रान्तं वज्रभूमिजं रजः, कान्तं चुम्ब-

कोत्थं, सस्यकं चपलं, माक्षिकं ताप्यं, विमला रौप्यमाक्षिकं, अद्रि शिलाजतु, दरदं हिङ्गुलं, रसकः खर्परिकः, एते रससंज्ञिका ज्ञेयाः । तथा एषां सत्वानि साराणि, रसायनानि जराव्याधिनाशनानि स्युरिति ॥ ४ ॥

गन्धकगैरिकशिलालक्षितिखेचरमञ्जनं च कङ्कुष्ठम् ।
उपरससंज्ञकमिदं स्याच्छिखिशशिनौ सारलोहाख्यौ ॥ ५॥

उपरससंज्ञकानाह—गन्धकेत्यादि । इदं वक्ष्यमाणं उपरससंज्ञकं स्यात् । किमिदं ? गन्धकगैरिकशिलालक्षितिखेचरमिति; गन्धकं प्रतीतं, गैरिकं धातुगैरिकं, शिला मनोह्वा, आलं हरितालं, क्षितिः स्फटिका, खेचरं कासीसं, एतत्सर्वमिति; च पुनः अञ्जनं नीलाञ्जनं, पुनः कङ्कुष्ठं विरङ्गं, इत्यष्टौ उपरससंज्ञका इत्यर्थः । शिखिशशिनौ स्वर्णतारकौ, सारलोहाख्यौ सारलोहसंज्ञकाविल्यर्थः ॥ ५ ॥

ताम्रारतीक्ष्णकान्ताभ्रसत्वलोहानि वङ्गनागौ च ।
कथितास्तु पूतिसंज्ञास्तेषां संशोधनं कार्यम् ॥ ६ ॥

पूतिलोहसंज्ञानाह—ताम्रेत्यादि । ताम्रारतीक्ष्णकान्ताभ्रसत्वलोहानीति; ताम्रं नेपालकं, आरं राजरीतिः, तीक्ष्णं सारं, कान्तं चुम्बकोद्भवं, अभ्रसत्वं गगनसारं, लोहं मुण्डं, एतानीति; पुनर्वङ्गनागौ एते पूतिसंज्ञकाः कथिताः । तेषां पूतिलोहसंज्ञकानां, शोधनं सम्यङ्मलापनयनं कार्यमिति ॥ ६ ॥

सौवर्चलसैन्धवकचूलिकसामुद्ररोमकबिडानि ।
षट् लवणान्येतानि तु स्वर्जीटङ्कणयवक्षाराः ॥ ७ ॥

लवणक्षारसंज्ञे आह—सौवर्चलेत्यादि । एतानि वक्ष्यमाणानि लवणसंज्ञान्याहुः, 'आचार्याः' इति शेषः । कानि ? सौवर्चलसैन्धवकचूलिकसामुद्ररोमकबिडानीति; सौवर्चलं रुचकं, सैन्धवं मणिकमन्थाह्वयं, चूलिकं काचलवणं, सामुद्रं क्षाराब्धिजं, रोमकं प्रतीतं, बिडं लवणविशेषः, एतानीति । पुनः स्वर्जी सर्जिका, टङ्कणं सौभाग्यं, यवक्षारः प्रतीतः, एते क्षाराः क्षारसंज्ञिकाः, 'रसकर्मणि' इत्यध्याहारः ॥ ७ ॥

सूर्यावर्तः कदली वन्ध्या कोशातकी च सुरदाली ।
शिग्रुश्च वज्रकन्दो नीरकणा काकमाची च ॥ ८ ॥

सद्रावकं शोधकगणमाह—सूर्यावर्त इत्यादि । सूर्यं प्रति आवर्तको भ्रमणं यस्येत्येवंविधः, कदली रम्भा, वन्ध्या फलरहिता कर्कोटी, कोशातकी जालिनी, सुरदाली

१ 'कथितौ कुभूतसंज्ञौ तेषां' इति, तथा 'कथितौ तु पूतिसंज्ञौ' इति च पाठान्तरद्वयमुपलभ्यते ।

देवदाली, शिग्रुः सौभाञ्जनं, वज्रकन्दो वनसूरणकन्दः, नीरकणा जलपिप्पली, काकमाची वायसी, इति गणः शोधनद्रावणयोग्य इति ॥ ८ ॥

आसामेकरसेन तु लवणक्षाराम्लभाविता बहुशः ।
शुध्यन्ति रसोपरसा ध्माताः सत्वानि मुञ्चन्ति ॥ ९ ॥

शोधनद्रावकाणां शोधनद्रावणविधानमाह—आसामित्यादि । आसां पूर्वौ-षधीनां मध्यात्, एकरसेन एकस्या रसेन, रसोपरसा वैकान्तादयोऽष्टौ रसाः गन्धकादयोऽष्टावुपरसाः, बहुशोऽनेकवारं, भाविताः घर्मपुटिताः कार्याः; पुनर्लवणक्षाराम्लभाविताश्च लवणानि सौवर्चलादीनि षट्, क्षाराः स्वर्जिकादयः, अम्ला जम्बीरादयः, तैर्बहुवारं भावितास्तीव्रघर्मपुटिता रसोपरसाः शुध्यन्ति दोषवर्जिता भवन्ति; पुनस्ते ध्माताः सन्तः सत्वानि स्वीयसाराणि मुञ्चन्ति त्यजन्तीति ॥ ९ ॥

स्विन्नं सक्षाराम्लैर्ध्मातं वैक्रान्तकं हठाद्द्रवति ।
तद्द्रुतमात्रं शुध्यति, कान्तं शशरक्तभावनया ॥ १० ॥

रसानां क्रमेण शोधनमाह—स्विन्नमित्यादि । सक्षाराम्लैर्वैक्रान्तकं स्विन्नं दोलाभिधानेन स्वेदितं कुर्यात्, तत् स्विन्नं वैक्रान्तं हठात् प्राबल्यात् ध्मातं सत् द्रवति सारं मुञ्चति, द्रुतमात्रं सत्वनिर्गममात्रमेव शुध्यति, पूर्वसंबन्धात् द्रवति च ॥ १० ॥

सस्यकमपि रक्तगणैः सुभावितं स्नेहरागसंसिक्तम् ।
शुध्यति वारैः सप्तभिरतः परं युज्यते कार्ये ॥ ११ ॥

तच्चाह—सस्यकमित्यादि । सस्यकमपि चपलमपि, रक्तगणैर्दाडिमकिंशुक-बन्धूकादिभिः सुभावितं कुर्यात् । किंविशिष्टं ? स्नेहरागसंसिक्तं; स्नेहः कङ्गुणितुम्बु-र्न्यादीनां, रागो रक्तवर्णद्रवः, ताभ्यां वह्नौ तप्तं सस्यकं संसिक्तं सेचितमिति घृतैः संसिक्तं कोमलं भावनायोग्यं स्यात् । कतिभिर्वारैः सुभावितं कुर्यात् ? सप्तभिः सप्तसंख्याकैः । अतःपरं कार्ये बीजादिके युज्यते ॥ ११ ॥

क्षारैः स्नेहैरादौ पश्चादम्लेन भावितं विमलम् ।
शुध्यति तथा च रसकं दरदं माक्षिकमप्येवम् ॥ १२ ॥

तच्चाह—क्षारैरित्यादि । विमलं रौप्यमाक्षिकं, आदौ प्रथमं, क्षारैः स्वर्जिकादिभिः, स्नेहैस्तैलैः कङ्गुण्यादीनां, भावितं कुर्यात्; पश्चादम्लेन जम्बी-रादिना भावितं कुर्यात्, एवंविधं कृतं सत् शुध्यति । तथा तेनैव विधिना रसकं खर्परकं शुध्यति, दरदं हिङ्गुलं चैवं, माक्षिकमप्येवं शुध्यति ॥ १२ ॥

तनुरपि पत्रं लिप्तं लवणक्षाराम्लरविस्नुहिक्षीरैः ।
ध्मातं निर्गुण्डीरससंसिक्तं बहुशो भवेद्धि रक्तं च ॥ १३ ॥

स्वर्णरूप्ययोः शोधनमाह—तनुरित्यादि । लवणेत्यादि । लवणानि सौवर्चलादीनि, क्षाराः स्वर्जिकादयः, अम्लाः जम्बीरादयः, रविरर्कः, स्नुही सुधा, तयोः क्षीराणि, एतैः तनुरपि सूक्ष्ममपि; पत्रं दलं, 'सारलोहाख्ययोः' इति शेषः, लिप्तं ध्मातं सत्, बहुशोऽनेकवारं, निर्गुण्डीरसे संसिक्तं सेफालीद्रवे सिञ्चितं कुर्यात् । तर्हि स्वर्णं रूप्यं च रक्तं आरक्तच्छवियुतं भवेदित्यर्थः; चशब्दाच्छुध्यति च ॥ १३ ॥

शुध्यति नागो वङ्गो घोषो रविणा च वारमपि मुनिभिः ।
निर्गुण्डीरससेकैस्तन्मूलरजःप्रवापैश्च ॥ १४ ॥

लोहशोधनमाह—शुध्यतीत्यादि । नागः सीसकः, निर्गुण्डीरससेकैः शेफालीरससेचनैः, शुध्यति निर्दोषो भवति, वङ्गश्च शुध्यति । एवं रविणा ताम्रेण सह घोषोऽपि कांस्यमपि शुध्यति । कतिवारं सेचनैः ? मुनिभिः सप्तसंख्याकैः; तन्मूलरजः निर्गुण्डीशिफाचूर्णं, तत्प्रवापैः गलितेषु नागवङ्गरविघोषेषु रजोनिक्षेपणैश्च चत्वारः शुध्यन्तीति ॥ १४ ॥

रक्तगणगलितपशुजलभावितपुटितं हि रज्यते तीक्ष्णम् ।
शुध्यति कदलीशिखिरसभावितपुटितं त्रिभिर्वारैः ॥१५॥

तच्चाह—रक्तगणेत्यादि । तीक्ष्णं साराख्यं, रक्तगणगलितपशुजलभावितं पुटितं सत् रक्तगणेन सह गलितं मिलितं यत् पशुजलं गोमूत्रं, तेन भावितं ततो वह्निपुटितं सत्, रज्यते रागमाप्नोति । पुनस्तीक्ष्णं कदलीशिखिरसभावितपुटितं वा रम्भाचित्रकरसभावितं घर्मपुटितं ततो वह्निपुटितं च सत् त्रिभिर्वारैः शुध्यतीत्यर्थः ॥ १५ ॥

सर्वः शुध्यति लोहो रज्यति सुरगोपसन्निभो वापात् ।
माक्षिकदरदेन भृशं शुल्वं वा गन्धकेन मृतम् ॥ १६ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयाख्ये तन्त्रे नवमोऽवबोधः ।

सामान्येन सर्वलोहानां शोधनमारणमाह—सर्व इत्यादि । सर्वो लोहो धातुवर्गः, शुध्यति मृतश्च भवति, पुनः रज्यति च । केन ? भृशं अत्यर्थं यथा स्यात्तथा माक्षिकदरदेन ताप्यहिङ्गुलेन कृत्वा यो वापः गलितेषु लोहेषु माक्षिकदरदप्रक्षेपणं तस्मात्, सुरगोपसन्निभो इन्द्रगोपसदृशः, सर्वो लोहो भवेत् ।

वा शुल्वं ताम्रं माक्षिकदरदवापेन सुरगोपसन्निभं स्यात्, वा गन्धेन गन्धकवापेन मृतमप्येवं स्यादित्यर्थः ॥ १६ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजश्रीचतुर्भुजविरचितायां मुग्धावबोधिन्यां रसहृदयटीकायां बीजविधानात्मको नवमोऽवबोधः ॥ ९ ॥

अथ दशमोऽवबोधः ।

अथ सत्वनिर्गममभिधास्यते ।

वैक्रान्तकान्तसस्यकमाक्षिकविमलादयो विना सत्वम् ।
शुद्धा अपि नो द्वन्द्वे मिलन्ति न च तान् रसो ग्रसति ॥ १ ॥

दत्तवान्सततं सौख्यं शुद्धेभ्यश्च खलं तथा ।
दुःखमृत्यप्यमात्मानः कोपस्य समकारकम् (?) ॥ १ ॥

वैक्रान्तादीनां रससंज्ञिकानां सत्वप्रशंसनमाह—वैक्रान्तमित्यादि । वैक्रान्तकान्तसस्यकमाक्षिकविमलादयः शुद्धा अपि द्वन्द्वे न मिलन्ति । वैक्रान्तं वज्रभूमिजं रजः, कान्तं चुम्बकं, सस्यकश्चपलः, माक्षिकं ताप्यं, विमला रौप्यमाक्षिकं,इत्यादयो गन्धकादयश्चोपरससंज्ञका न मिलन्ति एकशरीरतां नाप्नुवन्ति । क ? द्वन्द्वे उभयमेलापे । पुनस्तान् शुद्धानपि रसः सूतो न ग्रसति ॥ १ ॥

नागनासिकाभिधानं चन्द्रोदकममृतमाप्तकाठिन्यम् ।
रसवैक्रान्तकमेवं बध्नाति रसं स्वसत्वेन ॥ २ ॥

वैक्रान्तप्राधान्यमाह—नागेत्यादि । एवं लक्षणं वैक्रान्तकं ज्ञातव्यम् । किंविशिष्टं ? नागनासिकाभिधानं नागानां फणिनां नासिका एव अभिधानं संज्ञा यस्य तत् । पुनः किंविशिष्टं ? चन्द्रोदकं चन्द्रमसः संम्बन्धि यदुदकं बलं, तस्मादेवामृतं, आप्तकाठिन्यं प्राप्तं काठिन्यं येन, पूर्वमेतच्च मृदूत्पन्नमित्यर्थः । एवंविधं रसवैक्रान्तं रससंज्ञकं वैक्रान्तं, रसं सूतं, बध्नाति । केन ? स्वसत्वेन स्वीयसारेणेति ॥ २ ॥

नानाविधसंस्थानं निर्जरशिखरिशिखरसंभूतम् ।
धारोदम्भसि श्रेष्ठं तदश्म शैलोदकं प्राप्य ॥ ३ ॥

वैक्रान्तप्रकारमाह—नानेत्यादि । पूर्वमुपवर्णितं वैक्रान्तं नानाविधसंस्थानमस्ति नानाविधमनेकप्रकारं संस्थानं लक्षणं यस्य तत्, "संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः"—इति माधवनिदानं; सितासितरक्तपीतवर्णत्वान्नानाविध-

संस्थानमित्यर्थः । पुनर्निर्जरशिखरिशिखरसंभूतं निर्जराणां देवानां यः शिखरी पर्वतस्तस्य शिखरं शृङ्गं तत्र संभूतमुत्पन्नम् । नानाविधसंस्थानं कुतः ? धारोदम्भसि धाराभिरुदन्त उन्मत्तमम्भो यत्र समये तस्मिन् वर्षाकाले, शैलोदकं शिलासंबन्धि यदुदकं जलं तत् प्राप्य, श्रेष्ठं तदश्म वैक्रान्ताभिधानं नानावर्णं भवति; यतः शिलोदकस्य नानाविधत्वम् ॥ ३ ॥

भस्त्राद्वयेन हठतो ध्मातव्यं पञ्चमाहिषसुबद्धम् ।
दत्त्वा दशांशसर्जिकपट्टुटङ्कणगुञ्जिकाक्षारान् ॥ ४ ॥
तद्गच्छति कठिनत्वं मुञ्चति सत्त्वं स्फुलिङ्गकाकारम् ।
मुक्तानिकरप्रायं ग्राह्यं तत्काचमधिवर्ज्य ॥ ५ ॥

वैक्रान्तसत्वपातनमाह—भस्त्रेत्यादि । तद्वैक्रान्तं पञ्चमाहिषसुबद्धं दधिदुग्धाज्यमूत्रशकृद्भिः पञ्चसंख्याकैर्माहिषैः सह सुबद्धं पिण्डाकृति कृतं सत्, भस्त्राद्वयेन खल्लयुग्मेन हठतो बलात् ध्मातव्यम् । किं कृत्वा ? दशांशसर्जिकपट्टुटङ्कणगुञ्जिकाक्षारान् दत्त्वा; दशांशविभागेन सर्जिकालवणसौभाग्यरक्तिकायवक्षारान् पिष्टवैक्रान्ते क्षेप्येत्यर्थः । ध्मातं सत् किं स्यात्तदाह—तदित्यादि । स्फुलिङ्गकाकारं वह्निकणनिभं, सत्वं सारं, मुञ्चति । पुनस्तत्सत्वं कठिनत्वं गच्छति कठिनं स्यादित्यर्थः । तत्सत्वं आकारतः मुक्तानिकरप्रायं मौक्तिकराशिसदृशं स्यात्, एवंविधं सत्वं काचं अधिवर्ज्य दूरीकृत्य, तत् निर्मलं ग्राह्यमित्यर्थः । युग्मम् ॥ ४ ॥ ५ ॥

रसवैक्रान्तकमेवं मिलति द्वन्द्वान्वितं समं हेम्ना ।
निर्व्यूढं घनसत्वं तेन रसो बन्धमुपयाति ॥ ६ ॥

वैक्रान्तसत्वयोगमाह—रसेत्यादि । तद्रसवैक्रान्तकं सत्वं हेम्ना समं स्वर्णेन समभागं, द्वन्द्वान्वितं सत् द्वन्द्वमेलापकौषधसहितं सत्, एवममुना विधानेन, मिलति 'रसे' इति शेषः । पुनस्तेन सत्वेन सह घनसत्वमभ्रसारं निर्व्यूढं निर्वाहितं सत्, तेनोभयसत्वसंयोगेन रसः सूतो बन्धमुपयाति बन्धनमाप्नोति ॥ ६ ॥

वज्राभ्रकान्तसस्यकमाक्षिकप्रभृतिसकलधातूनाम् ।
पातयति सत्वमेषां पिण्डी ध्माता दृढाङ्गारैः ॥ ७ ॥

सत्वपातनविधानमाह—वज्रेत्यादि । दृढाङ्गारैरिति दृढकथनात् खदिरादीनां, पूर्वोक्तत्वाद्भस्त्राद्वयेन च ध्माता सती; वज्राभ्रकान्तसस्यकमाक्षिकप्रभृतिसकलधातूनां वज्रसंज्ञकं यदभ्रं तद्वज्राभ्रं, कान्तं चुम्बकं, सस्यकं चपला, माक्षिकं

स्वर्णमाक्षिकं, इति प्रभृतयः सकलधातवः सर्वोपरसास्तेषां पिण्डी सत्वं पातयति ॥ ७ ॥

हित्वा माक्षिकसत्वं नान्येषां शक्तिरस्ति लोहघ्नी ।
न पतति तावत्सत्वं भस्त्रान्ते न यावदाह्रियेत ॥ ८ ॥

शक्तिमत्वेन माक्षिकसत्वप्रशंसनमाह—हित्वेत्यादि । माक्षिकसत्वं ताप्यसारं, हित्वा त्यक्त्वा, अन्येषां रसोपरसानां, शक्तिः सामर्थ्यं नास्ति । किंभूता शक्तिः ? लोहघ्नीति लोहान् हन्तीति विग्रहः । पुनस्तावत्सत्वं न पतति यावद्भस्त्रा अन्ते सत्वसमीपे, न आह्रीयेत न प्राप्येत, तस्मादल्पेनाग्निना सत्वाप्रवृत्तिरित्यर्थः ॥ ८ ॥

रक्तं मृदु नागसमं सत्वं यस्माद्धि माक्षिकात्पतितम् ।
गन्धाश्मनोऽपि तद्वत्कार्यं यत्नेन मृदुभावम् ॥ ९ ॥

माक्षिकसत्वमुदास्यान्यसत्वप्रवृत्तिमाह—रक्तमित्यादि । रक्तं लोहितं, नागसमं सीसकतुल्यं, मृदु कोमलं, एवंविधं सत्वं यस्माद्धेतोर्माक्षिकात्पतति ताप्यात् निर्गच्छति, तद्वत्तस्माद्धेतोः वा तस्माद्विधानतः, गन्धाश्मनो गन्धकस्य, यत्नेन मृदुभावं कार्यं यथा गन्धकोऽपि मृदुर्भवतीत्यर्थः ॥ ९ ॥

लवणाम्लेन सुपुटितं माक्षिकमम्लेन मर्दितं विधिना ।
मुञ्चति सोष्णे ग्राह्यमायसपात्रे तु पिष्टिका भवति ॥१०॥

माक्षिकसत्वविधानमाह—लवणेत्यादि । माक्षिकं ताप्यं; लवणाम्लेन लवणं मुख्यत्वात् ग्रन्थान्तरसाम्याच्च सैन्धवं, अम्लो जम्बीरादिः, तेन मर्दितं पुनरम्लेन जम्बीरादिना, विधिना उक्तरीत्या, पुटितं वह्नौ प्रतापितं सत्, मुञ्चति पूर्वश्लोकसंबन्धात् 'सत्वं' इति शेषः । इत्थं पतितं सत्वं ग्राह्यम् । लवणाम्लेन गन्धकमपि मृदु स्यात् । तु पुनः सोष्णे आयसपात्रे वह्नौ तापिते लोहपात्रे, पिष्टिका भवति रक्तवर्णरजोरूपेत्यर्थः ॥ १० ॥

तुत्थाद्धि ताप्यजसमं समसृष्टं पतति वै सत्वम् ।
अभ्रवैक्रान्तकान्तप्रभृतीनां तत्र लोहनिभम् ॥ ११ ॥

तुत्थादीनां सत्वपातनमाह—तुत्थादित्यादि । तुत्थात् तुत्थं शिखिग्रीवं तस्मात् ताप्यजसममिति माक्षिकसत्ववत्, माक्षिकसत्वविधानेनास्य सत्वपात इत्यर्थः । समसृष्टं समं ताप्येन तुल्यं वर्णमार्दवाभ्यां सृष्टं कथितमित्यर्थः । एवंविधं तुत्थकसत्वं पतति । अभ्रकेत्यादि अभ्रकं प्रतीतं, वैक्रान्तं रसवैक्रान्तं, कान्तं चुम्बकं, इति प्रभृतीनामित्यादीनां सत्वं, तत्र सत्वपातनयोगे, लोहनिभं मुण्डवर्णमित्यर्थः ॥ ११ ॥

स्त्रीवज्रीदुग्धभावितमेरण्डस्नेहभावितं शतं ध्मातम् ।
एवं त्रिभिरिह वारैः शुल्वसमं भवति रञ्जकं हैमम् ॥ १२॥

पुनर्माक्षिकविधानान्तरमाह—स्त्रीत्यादि । ताप्यं स्त्रीवज्रीदुग्धभावितं स्त्री नारी, वज्री सेहुण्डः, तयोर्दुग्धं, तेन भावितं घर्मपुटितं कुर्यात् । पुनरेरण्डस्नेहेन शतं शतवारं भावितं च कुर्यात् । ततो वारैस्त्रिभिरेव ध्मातं सत् हैमं हेम स्वर्णमाक्षिकं तस्येदं हैमं सत्वं, शुल्वसमं ताम्रनिभं भवति; पुनः रञ्जकं रसे रागदायी स्यात्कनकेऽपि च ॥ १२ ॥

कदलीरसशतभावितमध्वैरण्डतैलपरिपक्कम् ।
ताप्यं मुञ्चति सत्वं रसकं चैवं त्रिसंतापैः ॥ १३ ॥

विध्यन्तरमाह—कदलीत्यादि । ताप्यं माक्षिकं, कदलीरसशतभावितमध्वैरण्डतैलपरिपक्कमिति प्रथमं रम्भाद्रवेण शतवारं भावितं, पश्चात् मध्वैरण्डतैलाभ्यां सह परिपक्कं सम्यक् पाचितं सत् सत्वं मुञ्चति । कैः कृत्वा? त्रिसन्तापैः त्रिवारं धमनैः । एवं रसकं खर्परकमपि सत्वं मुञ्चतीति ॥ १३ ॥

ऊर्णाटङ्कणगुडपुरलाक्षासर्जरसैः सर्वधातुभिः पिष्टैः ।
छागीक्षीरेण कृता पिण्डी शस्ता हि सत्वविधौ ॥ १४ ॥

सत्वपातने पिण्डीमाह—ऊर्णेत्यादि । ऊर्णा इति ऊर्णा मेषरोम, टङ्कणं सौभाग्यं, गुडः प्रतीतः, पुरो गुग्गुलुः, लाक्षा जतु, सर्जरसो रालः, एतैः; किंविशिष्टैः ? सर्वधातुभिः रसोपरसैर्वा स्वर्णादिभिः सह, पिष्टैः पेषितैः, पुनः छागीक्षीरेण अजापयसा कृता या पिण्डी सा सत्वविधौ सत्वपातनकर्मणि शस्ता प्रधाना । धातुरसोपरसानां सत्वं पातयत्येवेति ॥ १४ ॥

चूर्णितसत्वसमानं त्रिंशत्पलमादरेण संगृह्य ।
टङ्कणपलसप्तयुतं गुञ्जापलत्रितययोजितं चैव ॥ १५ ॥
तिलचूर्णककिट्टपलैर्मत्स्यैरालोड्य द्विरंशयुक्तैश्च ।
गोधूमबद्धपिण्डी गोपञ्चकभाविता बहुशः ॥ १६ ॥
कोष्टकधमनविधिना तीव्रं भस्त्रानलेन तत्पतति ।
संद्रवति चाभ्रसत्वं तथैव सर्वाणि सत्वानि ॥ १७ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते रसहृदये तन्त्रे शुद्धरससत्वपातनात्मको दशमोऽवबोधः ।

विध्यन्तरमाह—चूर्णितेत्यादि । चूर्णितसत्वसमानं चूर्णितं पिष्टं यत् सत्वं सारं तत्समानं विशुद्धत्वात् सत्वसमानं, 'धातुरसोपरसचूर्णं' इति शेषः । एवं-विधं विशुद्धं चूर्णं आदरेण प्रीत्या आदौ संगृह्य, टङ्कणपलसप्तयुतं कुर्यात् सौभाग्यस्य पलैः सप्तसंख्याकैः सहितं कुर्यादित्यर्थः । विशुद्धे चूर्णे त्रिंशत्पले सप्तपलं सौभाग्यं योज्यं; एवं टङ्कणविधानेन, च पुनः गुञ्जापलत्रितयेन रक्तिका-पलत्रितयपरिमाणेन योजितं कुर्यादिति । तिलचूर्णककिट्टपलैः तिलं प्रतीतं तेषां चूर्णकं, किट्टं मुण्डादीनां मलं, तयोः पलैः पलमानैर्गोधूमवद्धपिण्डी वहुशो वहुवारं, गोपञ्चकभाविता गवां क्षीराज्यदधिमूत्रविड्भिः भाविता; किं कृत्वा ? मत्स्यैरालोड्य, मत्स्यैः क्षुद्रजलचरैरालोड्य संमिश्र्येत्यर्थः । कोष्ठके कोष्ठिका-यन्त्रे, धमनविधिना उत्क्षिप्योत्क्षिप्य धमनेन, भस्त्रानलेन तत् सत्वं पतति पूर्वसंबन्धात् 'ताप्यादीनां' इति शेषः । च पुनरभ्रसत्वं अभ्रकात्सारं संद्रवति । तथैवोक्तविधानेन सर्वाणि समस्तानि सत्वानि साराणि पतन्ति 'अनुक्तानां' इति शेषः ॥ १५—१७ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां मुग्धावबोधिन्यां रसहृदयटीकायां शुद्धरससत्वपातनात्मको दशमोऽवबोधः ॥ १० ॥

अथैकादशोऽवबोधः ।

अथ बीजनिर्वाहणमारभ्यते ।

स्वीकृत्य सर्वसरितो गङ्गा जलधौ यथा तथा हैमम् ।
प्रविशति रसे गृहीत्वा संमिलिति सर्वलोहगुणान् ॥ १ ॥

सुवृत्तः सद्व्रतारम्भः सुज्ञः संज्ञानदर्शकः ।
अभूच्च धनधर्मज्ञो हारी कुजनसंपदाम् ॥ १ ॥

आदौ हैमप्रशंसामाह—स्वीकृत्येत्यादि । हैमं स्वर्णमाक्षिकसत्वं संमिलिति, किंकृत्वा ? सर्वलोहगुणान् सर्वलोहेषु समस्तधातुषु संमिलिता मिश्रिताः ये गुणास्तान् गृहीत्वा, तथा रसे प्रविशति यथा गङ्गा सर्वा नद्यः सरितो स्वीकृत्य अङ्गीकृत्य जलधौ समुद्रे प्रविशति ॥ १ ॥

जीर्यति मिलति च शुल्वे तत्सत्वं किट्टतां याति ।
हेमक्रियासु करिणा त्रपुणा तारक्रियासु निर्व्यूढम् ॥ २ ॥

ताप्यसत्वाधिकारमाह—जीर्यतीत्यादि । तत् हैमं ताप्यसत्वं, शुल्वे ताम्रे मिलति सति सत्वं जीर्यति जारणत्वमाप्नोति, 'रसे' इति शेषः। तस्मिन् सत्वे शुल्वे

मिलति सति किट्टतां याति लोहमलसदृशं स्यात् । प्रथमं तत्सत्वं करिणा नागेन सह हेमक्रियासु स्वर्णकार्येषु निर्व्यूढं रसे निर्वाहितं कुर्यादित्यर्थः । पुनस्त्रपुणा वङ्गेन सह तारक्रियासु रूप्यकार्येषु निर्व्यूढं कुर्यात्; नागवङ्गौ सर्वत्र पीतसितकार्येषु प्रशस्तावित्यर्थः ॥ २ ॥

घनसत्वं खलु रविणा रसायने द्वन्द्वकं योज्यम् ।
रक्तगणपातभावितगिरिजतुमाक्षिकगैरिकदरदैः ॥ ३ ॥

अभ्रसत्वयोगमाह—घनसत्वमित्यादि । खलु निश्चये वाक्यालङ्कारे वा, घनसत्वमभ्रसारं, रविणा ताम्रेण सह, रसायने जराव्याधिनाशने, द्वन्द्वकं घनसत्वताम्रं, योज्यं; पुनः रक्तगणपातभावितगिरिजतुमाक्षिकगैरिकदरदैः रक्तगणस्य यः पातः पातनं निक्षेपो वा, तेन भावितानि घर्मपुटितानि, गिरिजतुमाक्षिकगैरिकदरदानि गिरिजतु शिलाजतु, माक्षिकं प्रतीतं, दरदं हिङ्गुलं, एतैर्बीजशेषं कुर्यादित्यागामिश्लोकाज्ज्ञेयम् ॥ ३ ॥

मृदुलताम्रकान्तघनसत्वं मृतनागतीक्ष्णकनकं च ।
कुर्वीत बीजशेषं दरदशिलातालमाक्षिकैर्वापात् ॥ ४ ॥

विध्यन्तरमाह—मृदुलेत्यादि । मृदुलं नेपालसंज्ञिकं ताम्रं, कान्तं लोहजाति, घनसत्वमभ्रसारं, पुनर्मृतं नागं सीसकं, तीक्ष्णं लोहजाति, कनकं हेम, एतत्रयं बीजं, शुल्वादित्रयं च बीजसंज्ञकं; दरदशिलातालमाक्षिकैर्वापात् दरदं हिङ्गुलं, शिला मनोह्वा, तालं हरितालं, एतैः कृत्वा यो वापः वह्नितप्ते परिक्षेपः तस्मात्, बीजशेषं कुर्वीत उभयोर्बीजे अभ्रसत्वहेमनी शेषे कुर्यादित्यर्थः; वा एवं कृते यच्छेषं तिष्ठति तद्बीजमिति ॥ ४ ॥

मृतनागं वङ्गं वा शुल्वं घनसत्वतारकनकं वा ।
ध्मातं तदेव सर्वं गिरिणाऽधिकशोधनैर्वापात् ॥ ५ ॥

विध्यन्तरमाह—मृतनागमित्यादि । मृतं यन्नागं सीसकं तन्मृतनागं, च मृतं यद्वङ्गं, रक्तगणावापमृतं च यच्छुल्वं, वा घनसत्वतारकनकं घनसत्वमभ्रसारं, तारं रूप्यं, कनकं हेम, एतन्नागादिगणसर्वं, वा प्रत्येकं पृथक् गिरिणा शिलाजतुना सह ध्मातं कुर्यात्; अधिकशोधनैः दरदशिलातालैर्वापात् बीजशेषं कुर्यादिति पूर्वसंबन्धात् ॥ ५ ॥

रक्तगणं पीतं वा माक्षिकराजवर्तमथो विमलम् ।
एकतमं वा गैरिककुनटीक्षितिगन्धकखगैर्वा ॥ ६ ॥

निर्व्यूढैरेव रसो रागादि गृह्णाति बन्धमुपयाति ।
मृतलोहोपरसाद्यैर्निर्व्यूढं भवति शृङ्खलाबीजम् ॥ ७ ॥

रक्तगणं दाडिमकिंशुकादिकं, वा पीतगणं यथा, "किंशुकः कर्णिकारश्च हरिद्राद्वितयं तथा । पीतवर्गोऽयमुद्दिष्टो रसराजस्य कर्मणि"—इति । वा माक्षिकं ताप्यं, वा राजावर्तं राजावर्तो 'लाजवरद' इति भाषायां, अथ विमलं तारमाक्षिकं, इत्येकतमं सर्वमेव वा, गैरिककुनटीक्षितिगन्धकखगैः गैरिकं प्रतीतं, कुनटी मनोह्वा, क्षितिः स्फटकी, गन्धकः प्रतीतः, खगः कासीसं, एतैरिति । एतैः पूर्वोक्तैरेव रसे निर्व्यूढे रसो रागादि रञ्जनादि गृह्णाति, आदिशब्दात् सारणं च विज्ञेयं, पुनर्बन्धमुपयाति बन्धनमाप्नोति, पुनः मृतलोहोपरसाद्यैः मृताश्च ते लोहाश्च धातवश्च त एव उपरसा गन्धकाद्याः आद्यशब्दात् रसा अपि, तैर्निर्व्यूढैः कृत्वा शृङ्खलाबीजं उत्तरोत्तरं रञ्जकं भवतीत्यर्थः ॥ ६ ॥ ७ ॥

आयसशलाकिकाभ्यामद्वन्द्वाख्यैश्च संकराख्यैश्च ।
निर्व्यूढं रसलोहैर्जारणकर्मोचितं भवति ॥ ८ ॥

रसलोहैरिति रसा वैक्रान्तादयः, लोहा धातवः प्रतीतास्तैः निर्व्यूढं; किंविशिष्टैः ? अद्वन्द्वाख्यैः एकतमैः, संकरैर्वा सर्वैः 'संकरोऽवकरे' इत्यमरः, एवं निष्पन्नं बीजं जारणयोग्यं स्यादित्यर्थः ॥ ८ ॥

बीजमिदं रक्तगणे निषेचितं तेन कृतवापम् ।
चारितजारितमात्रं सूतं रञ्जयति बध्नाति ॥ ९ ॥

विशेषविध्यन्तरमाह—बीजमित्यादि । इदं निष्पन्नबीजं रक्तगणे निषेचितं कुर्यात् । पुनस्तेन रक्तगणेन कृतवापं कृतो वापो यस्मिन् तत् । पुनस्तद्बीजं चारितजारितमात्रं पूर्वं चारितं पश्चात् जारितं सत् सूतं रञ्जयति रागं प्रापयति, बध्नाति चेति ॥ ९ ॥

रक्तस्नेहविशोधितमृतलोहरसादिभिस्तु सर्वेषाम् ।
बीजानां कुरु वापं रक्तस्नेहे निषेकं च ॥ १० ॥

तच्चाह—रक्तेत्यादि।रक्तस्नेह इति रक्तो रक्तगणो दाडिमकिंशुकादिकः स्नेहाः कङ्गुण्यादीनां, एतैर्विशोधिताः पश्चान्मृता धातवो रसादयश्च रसोपरसास्तैः सर्वेषां बीजानां पूर्वोक्तानां वापं कुरु 'रसे' इति शेषः; वा रक्ते रक्तवर्णे स्नेहे स्नेहवर्गे निषेकं च; विधानद्वयमिदम् ॥ १० ॥

वङ्गाभ्रमभ्रतारं, सितशैलमलाहतौ च सितवङ्गौ ।
रक्तं सितताप्यहतं, रञ्जति निर्व्यूढवङ्गाभ्रम् ॥ ११ ॥

पीतक्रियायां बीजान्युक्तानि, अथ श्वेतक्रियायां बीजान्याह—वङ्गेत्यादि । वङ्गाभ्रमिति वङ्गं रङ्गं, अभ्रं गगनं, एते 'बीजहेतवे' इति शेषः । पुनरभ्रतारं अभ्रं गगनं, तारं रूप्यं इति च; सितं श्वेतं यच्छैलमलं शिलाजतु तेन आहतौ सम्यक् मृतौ, सितवङ्गौ ताररङ्गौ कार्यौ । पुनः रक्तं हेम, सितं तारं, ताप्यं माक्षिकं, ताभ्यां हतं मारितं कुर्यात् । पुनस्तारं रूप्यं, निर्व्यूढं वङ्गं चाभ्रं च यत्र तदेवंविधं कुर्यात् । एतत्सर्वं रसे तारक्रियासु योज्यमित्यर्थः ॥ ११ ॥

निर्वाहणविधिरेषः प्रकाशितोऽशेषदोषशमनाय ।
बीजानामप्येवं घनसत्वं युज्यते प्रथमम् ॥ १२ ॥

बीजेऽभ्रसत्वं प्रधानमाह—निर्वाहणेत्यादि । एषः किमर्थः ? अशेषदोषशमनाय धात्वादीनां समस्तदोषनाशनायेत्यर्थः। एवममुना प्रकारेण यथा धातुनिर्वाहणविधिस्तथा बीजानां रसे निर्वाहणं कुर्यात्, सर्वबीजनिर्वाहणे अभ्रकसत्वं प्रथमं निर्वाह्यमिति ज्ञेयम् ॥ १२ ॥

छागास्थिभस्मनिर्मितमूषां कृत्वैव मल्लकाकाराम् ।
दलयोगे घनरन्ध्रां टङ्कणविषगुञ्जाकृतलेपाम् ॥ १३ ॥

इति परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे बीजनिर्वाहणात्मक एकादशोऽवबोधः ।

निर्वाहणविधानमाह—छागेत्यादि । एवंविधां मूषां कृत्वा धातुनिर्वाहणं 'कुर्यात्' इति शेषः । किंभूतां ? छागास्थिभस्मनिर्मितमूषामिति; छागो बस्तस्तस्यास्थीनि, तद्भस्मना निर्मिता कृता या मूषा ताम् । पुनः किंभूतां ? मल्लकाकारां गोस्तनसदृशीम् । पुनः किंविशिष्टां ? घनरन्ध्रां निबिडच्छिद्राम् । पुनः टङ्कणविषगुञ्जाकृतलेपां टङ्कणं सौभाग्यं, विषं सक्तुकं, गुञ्जा रक्तिका, ताभिः कृतो लेपो यस्यां सा ताम् । एवंभूता मूषा दलयोगे पत्रमेलने कार्येत्यर्थः ॥ १३ ॥

इति कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां
मुग्धावबोधिन्यां रसहृदयटीकायां बीजनिर्वाहणात्मक
एकादशोऽवबोधः ।

अथ द्वादशोऽवबोधः ।

अथ द्वन्द्वमेलनमभिधास्यते ।

यावन्नागाङ्गतया न मिलन्ति लोहानि सर्वसत्त्वेषु ।
तावत्सर्वाङ्गं न च चरति रसो द्वन्द्वयोगेन ॥ १ ॥

वाचां विलासेन सुधानुकारी·········नु जगत्करोति ।
किंचित्स्वयं यत्पुरुषत्वमेव सुधाद्विजिह्वाश्रितमित्यदोषः(?) ॥

अथ द्वन्द्वयोगप्रकारमाह—यावदित्यादि । यावदित्यवधौ । लोहानि हेमादीनि, नागाङ्गतया भुजङ्गशरीरतया, न मिलन्ति सुगमत्वेन एकशरीरतां नाप्नुवन्ति। केषु ? सर्वसत्त्वेषु अभ्रादीनां सारेषु; सत्त्वस्य काठिन्याद्विनोपायं नैकतां यान्ति लोहानि । अतस्तावद्रसः सर्वाङ्गं न चरति । केन कृत्वा सत्वेषु लोहानि मिलन्ति ? द्वन्द्वयोगेन दरदादिना वा गुडपुरटङ्कणादिनेति ॥ १ ॥

माक्षीकरसकसस्यकदरदान्यतमेन वापितं लोहम् ।
संत्यजति निबिडभावं सत्त्वे संमिलति सुध्मातम् ॥ २ ॥

सत्त्वमेलनविधानमाह—माक्षिकेत्यादि । लोहं स्वर्णादि । माक्षिकं ताप्यं, रसकं खर्परिकं, सस्यकं चपला, दरदं हिङ्गुलं, एतेन चतुष्केण; वा एभ्यो अन्यतमेनोक्तरसोपरसेन, वापितं सुध्मातं शोभनयुक्त्या ध्मातं च सत् निबिडभावं संत्यजति सत्वे संमिलति च ॥ २ ॥

गुडपुरटङ्कणलाक्षासर्जरसैर्धातकीसमायुक्तैः ।
स्त्रीस्तन्येन तु पिष्टै रसायने द्वन्द्वितं योज्यम् ॥ ३ ॥

विध्यन्तरमाह—गुडेत्यादि । इदं द्वन्द्वितं द्वन्द्वीकृतं लोहं सत्त्वेन मिलितं, रसायने जराव्याधिनाशने, योज्यम् । कैर्द्वन्द्वमेलापकैः कृत्वा द्वन्द्वितमित्याह—गुडेत्यादि । गुडः प्रतीतः, पुरो गुग्गुलुः, टङ्कणं सौभाग्यं, लाक्षा जतु, सर्जरसो राला, एतैः; धातकीसमायुक्तैः धातकी प्रतीता, तत्समायुक्तैः; पुनः स्त्रीस्तन्येन नारीदुग्धेन, पिष्टैर्मर्दितैः, एतैर्द्वन्द्वमेलापकैः कृत्वा ॥ ३ ॥

ऊर्णाटङ्कणगिरिजतुकर्णाक्षिमलेन्द्रगोपकर्कटकैः ।
नारीपयसा पिष्टैः सर्वे द्वन्द्वेषु हि मिलन्ति ॥ ४ ॥

सर्वे द्वन्द्वेषु सत्वं प्रति द्वन्द्वेषु मिलन्ति एकीभवन्ति, 'लोहानि' इति शेषः। एतैः कैः ? ऊर्णादिभिः । ऊर्णा प्रतीता, टङ्कणं सौभाग्यं, गिरिजतु शिलाजतु, कर्णाक्षिमलं मनुष्यस्य, इन्द्रगोपको जीवविशेषः, कर्कटकश्च कुलीरः, 'स्यात्कुलीरः कर्कटकः' इत्यमरः, एतैः । किंविशिष्टैः ? नारीपयसा स्त्रीदुग्धेन, पिष्टैः कल्कितैः, त्रयोऽपि द्वन्द्वमेलापकयोगा इति ॥ ४ ॥

रसवैक्रान्तकमेवं मिलति द्वन्द्वान्वितं समं हेम्ना ।
निर्व्यूढं तत्सत्त्वं तेन रसो बन्धमुपयाति ॥ ५ ॥

विध्यन्तरमाह—रसेत्यादि । एवमुक्तविधानेन, रसवैक्रान्तकं द्वन्द्वान्वितं स्वकी-

यद्द्वन्द्वसहितं मिलति पृथग्भावं त्यजति । केन समं ? हेम्ना सह । तद्रसवैक्रान्तसत्त्वं, हेम्ना सह निर्व्यूढं कुर्यात्, तेन रसवैक्रान्तसत्त्वहेमयोगेन रसो बन्धमुपयाति बद्धो भवतीति ॥ ५ ॥

शस्तं सर्वद्वन्द्वे गिरिजतुलेलीतकेन्द्रगोपाद्यैः ।
महीपीकर्णमलाद्यैः स्याद्बीजं टङ्कणालविषैः ॥ ६ ॥

अथ विशेषविध्यन्तरमाह—शस्तमित्यादि । एवंविधं बीजं शस्तं; क ? सर्वद्वन्द्वे । पुनरेतैः कृत्वा बीजं शस्तं स्यात् । कैः ? गिरिजतुलेलीतकेन्द्रगोपाद्यैः, गिरिजतु शिलाजतु, लेलीतको गन्धकः, इन्द्रगोपः सुरेन्द्रगोपो जीवविशेषः, एते आद्या येषां तैः । न केवलमेतैः महिषीकर्णमलाद्यैश्च; महिष्याः कर्णयोर्मल आद्यो येषां ते, आद्यशब्दान्नासाक्षिमलं च । पुनष्टङ्कणालविषैः; टङ्कणं सौभाग्यं, आलं हरितालं, विषं कन्दजं, एतैः पिष्टैर्द्वन्द्वमेलापः स्यादिति पुनः संबन्धः ॥६॥

मधुसहितैरप्येतैस्ताराभ्रं मिलति ताप्यकनकं च ।
एरण्डतैलटङ्कणकङ्कुष्ठशिलेन्द्रगोपैस्तु ॥ ७ ॥

विध्यन्तरमाह—मध्वित्यादि । एतैः पूर्वोक्तैर्योगैः, मधुसहितैः क्षौद्रयुतैः, ताराभ्रं रूप्यगगनं, मिलति । च पुनस्ताप्यकनकं माक्षिकस्वर्णं, इदं द्वन्द्वं च मिलति । न केवलं पूर्वोक्तयोगैर्मिलति पुनरेतैरेरण्डतैलटङ्कणकङ्कुष्ठशिलेन्द्रगोपैश्च; एरण्डतैलं वातारिस्नेहः, टङ्कणं सौभाग्यं, कङ्कुष्ठं विरङ्गं, शिला मनोह्वा, इन्द्रगोपको जीवविशेषः, एतैश्च मधुसहितैः कृत्वा द्वन्द्वं मिलतीत्यवश्यम् ॥ ७ ॥

सूतेन शुद्धकनकं निष्पिष्य समाभ्रयोजितं कृत्वा ।
पादेन तु पूर्वोक्तद्वन्द्वान्यतमकं कल्प्यम् ॥ ८ ॥

तद्विधानमाह—सूतेनेत्यादि । प्रथमं सूतेन रसेन सह शुद्धकनकं निष्पिष्य संमर्द्य, पुनः समाभ्रयोजितं कृत्वा समं च तदभ्रं च तेन योजितं कृत्वा, पश्चात्पादेन चतुर्थांशविभागेन, पूर्वोक्तद्वन्द्वान्यतमकं कल्प्यं पूर्वोक्तद्वन्द्वं एरण्डतैलादिकं गिरिजत्वादिकं च, तेभ्यो अन्यमतकं द्वन्द्वं योज्यमिति ॥ ८ ॥

रसोपरसस्य हेम्नो द्विगुणं वै शुद्धमाक्षिकं दत्त्वा ।
स्वरसेन काकमाच्या रम्भाकन्देन मृद्गीयात् ॥ ९ ॥
कृतमित्येतत्पिण्डं हेमाभ्रं मिलति वज्रमूषायाम् ।
रविशशितीक्ष्णैरेवं मिलन्ति गगनादिसत्त्वानि ॥ १० ॥

विध्यन्तरमाह—रसेत्यादि । रसोपरसस्य वैक्रान्तगन्धकादेर्मध्ये, शुद्धमा-

क्षिकं निर्दोषं ताप्यं, हेम्नो द्विगुणं कनकाद्विगुणितं दत्त्वा, द्विगुणमाक्षिकयुतं हेम दत्त्वेत्यर्थः । एतद्रसोपरसादिकं काकमाच्या वायस्याः स्वरसेन मृद्नीयात् मर्दनं कुर्यात् । रम्भाकन्देन च कदलीकन्देनापीत्यर्थः । एतत्पूर्वौषधं पिण्डं गोलाकारं कुर्यात् । इतिविधानेन हेमाभ्रं मिलति हेमताप्यं चेति । क ? वज्रमूषायाम् । तथाह "मृदस्त्रिभागाः शणलद्दिभागौ भागश्च निर्दग्धतुषोपलादेः । किट्टार्धभागं परिखण्ड्य वज्रमूषां विदध्यात्खलु सत्वपाते"—इति । एवममुना विधिना, रविशशितीक्ष्णैः सह; रविस्ताम्रं, शशी रूप्यं, तीक्ष्णं लोहजातिः, एतैः सार्धं, गगनादिसत्वानि अभ्रादीनां साराणि, मिलन्तीति युग्मम् ॥ ९ ॥ १० ॥

संकरबीजानामपि विधानमित्यादिगगनसत्त्वयोगेन ।
माक्षीकयोगादन्यं योज्यमवश्यं तु सर्वत्र ॥ ११ ॥

अभ्रसत्वस्याधिकारमाह—संकरेत्यादि । संकरबीजानामपि विधानं कर्तव्यार्थोपदेश इति यावत् । इत्यादि पूर्वोक्तं, तु पुनः, गगनसत्वयोगेन अभ्रकसत्वेन सार्धं, माक्षीकयोगादन्यं योज्यं अभ्रसत्वेन सह माक्षीकं न स्यादिति व्यक्तिः॥११॥

कान्तमुखं सर्वेषां सत्वानां मेलकं प्रथमम् ।
पूर्वोक्तकल्कसहितं माक्षीकमृतनागतालशिलम् ॥ १२ ॥

इति परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे द्वन्द्वाधिकारात्मको द्वादशोऽवबोधः ।

कान्तेत्यादि । माक्षिकेण मृतं यन्नागं, तालं हरितालं, शिला मनोह्वा च, तत्तथा, पूर्वोक्तकल्कसहितं पूर्वोक्तं यत्कल्कं रसोपरसादीनां तेन सहितं युक्तं; कान्तमुखं यथा,—"अभावेऽभ्रकसत्त्वस्य कान्तसत्त्वं प्रदापयेत् । कान्तसत्वस्य चाऽभावे तीक्ष्णलोहं तु दापयेत्"—इति ॥ १२ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां
मुग्धावबोधिन्यां रसहृदयटीकायां द्वन्द्वाधिकारात्मको
द्वादशोऽवबोधः ॥ १२ ॥

अथ त्रयोदशोऽवबोधः ।

अथ संकरबीजाधिकारः ।

माक्षीककान्ततीक्ष्णं तीक्ष्णं माक्षीकमभ्रकं बीजम् ।
माक्षीककान्तशुल्वं तीक्ष्णाभ्रकं महाबीजम् ॥ १ ॥

मधुनि माधव एव मधुव्रतः प्रकुरुते मुदितो मधुरं रवम् ।
वररवोऽपि सतां च समागमं शबलता किमुपैति न चारुताम् ॥

संकरबीजानां मध्ये महाबीजसंज्ञान्याह—माक्षिकेत्यादि । एतत्त्रिकं महाबीजं; किमेतत्? माक्षीककान्ततीक्ष्णं, माक्षीककान्तशुल्वं, तीक्ष्णाभ्रकं च; माक्षीकं ताप्यं, कान्तं चुम्बकं, शुल्वं ताम्रं, तीक्ष्णं लोहजातिः, अभ्रकं गगनं; एतत्त्रितयं बीजं महाबीजं, एतत्त्रित्रिमुखं प्रत्येकं महासंज्ञम् । विशेषोऽत्र,—"बीजपाकं प्रवक्ष्यामि जारणार्थं रसस्य तु । सूत्रक्रमोऽयं बीजेन समजीर्णेन शुध्यति—" इति । अवान्तरत्वेन च प्रत्येकं द्रव्यं बीजसंज्ञाभिमतम् ॥ १ ॥

माक्षीककान्तशुल्वं शुल्वाभ्रकमाक्षिकं चापि ।
कान्ताभ्रकमाक्षीकं ताप्यकशुल्वाभ्रकं महाबीजम् ॥ २ ॥

तच्चाह—माक्षीकेत्यादि । माक्षीककान्तशुल्वं माक्षीकं ताप्यं, कान्तं चुम्बकं, शुल्वं ताम्रं, एतदपि महाबीजं ज्ञेयम् । पुनः शुल्वाभ्रकमाक्षीकं; पुनः कान्ताभ्रकमाक्षीकं कान्तं कान्तपाषाणं, अभ्रकं गगनं, माक्षीकं ताप्यं; तथा ताप्यकशुल्वाभ्रकं एतदपि च महाबीजं ज्ञेयमिति ॥ २ ॥

माक्षीकतीक्ष्णशुल्वं तीक्ष्णशुल्वाभ्रकं महाबीजम् ।
माक्षीककान्तकनकं कनकारुणमाक्षिकं महाबीजम् ॥ ३ ॥

तच्चाह—माक्षीकेत्यादि । माक्षीकतीक्ष्णशुल्वं माक्षिकं ताप्यं, तीक्ष्णं सारलोहजातिः, शुल्वं ताम्रम् । पुनस्तीक्ष्णशुल्वाभ्रकं तीक्ष्णं सारं, शुल्वं ताम्रं, अभ्रकं गगनम् । पुनर्माक्षीककान्तकनकं माक्षीकं ताप्यं, कान्तं कान्तपाषाणं, कनकं स्वर्णम् । पुनः कनकारुणमाक्षिकं कनकं स्वर्णं, अरुणं ताम्रं, माक्षिकं स्वर्णमाक्षिकं चेति चतुष्टयं महाबीजं प्रवरबीजमित्यर्थः । चतुर्णां प्रत्येकं महाबीजसंज्ञेति ॥ ३॥

माक्षीकतीक्ष्णतारं तारारुणमाक्षिकं चैवम् ।
कान्ते तु शुल्वताप्यं शुल्वाभ्रताप्यकाञ्चनं चापि ॥ ४ ॥

तच्चाह—माक्षीकतीक्ष्णतारमिति ।—माक्षीकं ताप्यं, तीक्ष्णं सारं, तारं रूप्यम् । पुनस्तारारुणमाक्षिकं एवमुक्तविधानेन इदमपि, तारं रूप्यं, अरुणं ताम्रं, माक्षीकं ताप्यम् । पुनः कान्ते चुम्बकेऽभिव्यापके अधिकरणे शुल्वं ताम्रं, ताप्यं स्वर्णमाक्षिकं यत् प्रयुक्तम् । अपीति निश्चयेन । शुल्वाभ्रताप्यकाञ्चनं वा शुल्वं ताम्रं, अभ्रं गगनं, ताप्यं स्वर्णमाक्षिकं, काञ्चनं हेम, एतच्चतुष्टयमपि महाबीजं ज्ञेयम् । महाबीजसंबन्धः प्रत्येकमिति व्यक्तिः ॥ ४ ॥

कान्तेन्दुसस्यताप्यं कान्ताभ्रकतीक्ष्णमाक्षिकं चैव ।
हेमाभ्रशुल्बताप्यं हेमाभ्रकशुल्बमाक्षिकं वापि ॥ ५ ॥

तच्चाह—कान्तेन्दुसस्यताप्यमिति । कान्तं कान्तपाषाणं, इन्दुस्तारं, सस्यं चपला, ताप्यं स्वर्णमाक्षिकं, चेति । पुनः कान्ताभ्रकतीक्ष्णमाक्षिकं, तथा हेमाभ्रशुल्बताप्यं, पुनर्हेमाभ्रकशुल्बमाक्षिकं वा हेम कनकं, अभ्रकं गगनं, शुल्बं ताम्रं, माक्षीकं ताप्यं, एतच्चतुष्टयमपि महाबीजं ज्ञेयम् । प्रत्येकं द्रव्ये बीजसंज्ञा चेति ध्वन्यर्थः ॥ ५ ॥

कान्ताभ्रशुल्बताप्यं संकरबीजं चतुःषष्टिः ॥ ६ ॥

तच्चाह—कान्तेत्यादि । कान्ताभ्रशुल्बताप्यं कान्तं चुम्बकं, अभ्रकं गगनं, शुल्बं ताम्रं, ताप्यं माक्षिकं, इत्यपि महाबीजम् । एतेषां महाबीजानां चेत्संकरबीजं प्रत्येकं द्रव्यस्य बीजसंज्ञा, सा तर्हि चतुःषष्टिप्रमाणा स्यादित्यर्थः ॥ ६ ॥

सर्वेषां बीजानामादौ कृत्वा यथोक्तसंयोगम् ।
शतवाप्यं यद्वह्नौ द्रावितं हि बीजं विशुद्धमिदम् ॥ ७ ॥

बीजविधानमाह—सर्वेषामित्यादि । आदौ प्रथमं, सर्वेषां बीजानां यथोक्तसंयोगं चतुःषष्टीनां उक्तसंज्ञानां द्रव्याणां संयोगं एकत्रीकरणं कृत्वा, यदेकत्रीकृतं वह्नौ द्रावितं भवति, तत्सर्वं शतवाप्यं बीजं सिद्धं प्रयत्नेन स्यादिति शब्दार्थः ॥ ७ ॥

न पतति यदि घनसत्त्वं गर्भे नो वा द्रवन्ति बीजानि ।
न च बाह्यद्रुतियोगस्तत्कथमिह बध्यते सूतः ॥ ८ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयाख्ये तन्त्रे संकरबीजविधानात्मक-
स्त्रयोदशोऽवबोधः ।

सूतबन्धने हेतूनाह—नेत्यादि । यदि गर्भे रसोदरे घनसत्त्वं अभ्रकसारं न पतति न प्राप्नोति, वा गर्भे बीजानि अस्मिन्नध्याये अभिहितानि माक्षिककान्तशुल्बादीनि यावन्नो द्रवन्ति, च पुनर्बाह्यद्रुतिस्तस्या योगो रसे द्रुतिमेलनं न स्यात्, तत्तस्माद्धेतोः सूत इहास्यां क्रियायामसत्यां कथं बध्यते घनत्वं धत्ते । गर्भद्रुतिबाह्यद्रुतिभ्यां सूतो बध्यते नियतमित्यभिप्रायः ॥ ८ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजश्रीचतुर्भुजविरचितायां
मुग्धावबोधिन्यां रसहृदयटीकायां संकरबीजविधानात्मक-
स्त्रयोदशोऽवबोधः ॥ १३ ॥

अथ चतुर्दशोऽवबोधः ।

अथ संकरबीजजारणमभिधास्यते

समादधि च यज्जीर्णं बीजं तेनैव चावर्तता कार्या ।
कर्तव्यं तत्करणं यस्मात्खलु जायते हेम ॥ १ ॥

शरदि शारदमेघो वर्षति वर्षासु वार्षिको वार्दः ।
मधुसमये परपुष्टः प्रवरजवः शोभते सततम् ॥

बीजजारणात्किं भवति तदाह—समादीत्यादि । समं सूततुल्यं, अधिशब्दादपरिमितं समादधिकं, यज्जीर्णं जारणमाप्तं, बीजं निष्पन्नबीजं, तेनैव जीर्णेन बीजेन सह, आवर्तता कार्या आवर्त इति आवर्तः । किं तत्? यस्माद्विधानाद्धेम कनकं जायते, खलु निश्चयेन, तत्करणं तस्य विधानस्य करणम् । समादिजीर्णस्य सूतस्य रूप्यादिषु प्रयोगात्कनकं भवेदिति व्यक्तिः ॥ १ ॥

प्रद्राव्य शस्त्रपात्रे गन्धपादेन सूतकं दद्यात् ।
स्वरसेन चौषधीनां वटिकां निष्पिष्य कुर्वीत ॥ २ ॥

सूतमारणविधानमाह—प्रद्राव्येत्यादि । शस्त्रपात्रे तीक्ष्णमयपात्रे, औपश्लेषिकेऽधिकरणे सप्तमी । गन्धपादेन गन्धस्य तुर्यांशविभागेन, सूतकं दद्यात्; तत्पात्रोपरिभागे दत्तं प्रद्राव्य 'वह्निना' इति शेषः । पुनः ओषधीनां स्वरसेन औषध्यो ग्रन्थान्तरे यथा,—'मृद्नीयात्खलु तावत् पिष्टमञ्जनसदृशं भवेद्यावत् । तदनु च नियामकानां शतावरीकन्दुकीसुधादीनाम्''—इति । शतावर्यादीनां स्वकीयरसेन निष्पिष्य प्रमर्द्य, वटिकां बदराकारां कुर्वीतेति ॥ २ ॥

संस्थाप्य लोहफलके छायाशुष्कां तु तां वटिकाम् ।
लघुलोहकटोरिकया स्थगयित्वा लेपयेत्सुदृढम् ॥ ३ ॥

तच्चाह—संस्थाप्येत्यादि । तां पूर्वोक्तां वटिकां छायाशुष्कां लोहफलके शस्त्रपात्रे संस्थाप्य, पुनः लघुलोहकटोरिकया पूर्वोक्तलोहफलकात् लघ्वी या लोहकटोरिका तया, स्थगयित्वा आच्छाद्य, दृढं गाढं यथा स्यात्तथा लेपयेत्, वक्ष्यमाणेनेति शेषः ॥ ३ ॥

लवणार्द्रमृदा लिप्तां सुदृढं कुर्वीत धूम्ररोधाय ।
दत्त्वा सुदृढाङ्गारान्भस्त्राद्वयवह्निनैव निर्धूमे ॥ ४ ॥

तच्चाह—लवणेत्यादि । तां पूर्वोदितां लघुलोहकटोरिकां सुदृढं यथास्यात्तथा लवणार्द्रमृदा लवणेन सैन्धवादिना युता या आर्द्रा जलसिक्ता मृत्

तया लिप्तां कुर्वीत । किमर्थं ? धूम्ररोधाय यथा यन्त्राद्बहिर्धूमोद्गमो न स्यात् । पुनः सुदृढाङ्गारान्खदिरादीनां दत्त्वा भस्त्राद्वयवह्निना खल्लुद्वयाग्निना धम्यादिति अग्रिमश्लोकसंबन्धात् । क्व सति ? निर्धूमे सति रसे धूमनिःसरणवर्जिते सति ॥ ४ ॥

तावद्यावद्ध्माता रक्ताभा खोटिका भवति ।
अपनीय ततोऽङ्गारान्स्वभावशीतां कटोरिकां मत्वा ॥ ५ ॥

तच्चाह—तावदित्यादि । सन्धिलिप्ता पूर्वोक्ता लोहशराविका तावदवधौ ध्माता कार्या यावत्कालप्रमाणं रक्ताभा रक्तद्युतियुक्ता खोटिका भवति खोटस्येव आकृतिर्यस्याः सा खोटिका । ततोऽनन्तरं कटोरिकां स्वभावशीतलां स्वतो हिमां मत्वा ज्ञात्वा, पुनरङ्गारानपनीय अपसार्य, 'कटोरिकामुत्खन्य रसो ग्राह्य' इति शेषः, आगामिश्लोकसंबन्धात् ॥ ५ ॥

उत्खन्योत्खन्य ततः कटोरिकाया रसो ग्राह्यः ।
एष मृतसूतराजो गोलकवद्भवति स च सुखाध्मातः ॥६॥

तच्चाह—उत्खन्येत्यादि । ततोऽनन्तरं, लघुलोहकटोरिकां पूर्ववर्णितां उत्खन्योत्खन्य प्रबलत्वेनोत्पाट्य, रसः सूतो ग्राह्यः । उत्खन्योत्खन्येति कठिनतरत्वाद्वा अत्यादरेण वीप्सा । कुतः ? कटोरिकासकाशात्, एष इत्थमुत्पन्नो मृतसूतराजो ज्ञेयः । स च सुखाध्मातः सन् गोलकवद्भवति 'वज्रमूषायां' इति शेषः ॥ ६ ॥

शिखिगलतामेकरसोऽतिध्मातः काचटङ्कणतः ।
त्रिगुणं वङ्गं दद्यात्क्रमेण नागमल्पाल्पदानेन ॥ ७ ॥

काचः प्रतीतः, टङ्कणं सौभाग्यं, ततः रसो अति मर्यादामतिक्रम्य ध्मातः सन्, एकरसो भवति समरस इत्यर्थः । केषां ? शिखिगलतां, शिखिनि गलन्तीति विग्रहः, शिखिगलतां धातूनां; एवं गलिते रसे त्रिगुणं वङ्गं रङ्गं दद्यात्, ततो वङ्गदानानन्तरं क्रमेण अल्पमल्पदानेन नागं सीसकं च दद्यादिति ॥ ७ ॥

पश्चाद्धेम्ना योज्यं रसबीजं सूतबन्धकरम् ।
तालकसूतेनापि च कृत्वा वटिकां नियामकौषधिभिः ॥८॥
एवं निगृह्य धूमं सुधिया रसमारणं कार्यम् ।

तच्चाह—पश्चादित्यादि । पश्चात् त्रिगुणसीसकदानानन्तरं, हेम्ना कनकेन सह, रसबीजं महाबीजं योज्यं; हेम्ना सार्धं महाबीजं कीदृग्भवति ? रसबन्धकरं

पारदबन्धप्रदं; च पुनः तालकं हरितालं, सूतो रसः, तेनापि नियामकौषधिभिश्च शतावर्यादिभिः पूर्वोक्ताभिर्गुटिकां कृत्वा, निगृह्य धूमं रुन्धितधूमं यथा स्यात्तथा सुधिया मतिमता रसज्ञेन, एवममुना विधिना रसमारणं कार्यं पारदबन्धः कार्य इत्यर्थः ॥ ८ ॥

अथवा शिलया सूतो माक्षिकयोगेन वा सिद्धः ।
जायेत शुक्लवर्णो धूमरोधेन ताभ्यां वा ॥ ९ ॥

अन्यच्चाह—अथवेत्यादि । अथवा विध्यन्तरे, शिलया मनोह्वया कृत्वा, वा माक्षिकयोगेन ताप्यसंयोगं कृत्वा, साधितस्तालकयोगवत्, सूतो रसः शुक्लवर्णो जयेत । केन ? धूमरोधेन सैन्धवार्द्रमृदा लेपेन, वा ताभ्यां शिलामाक्षिकाभ्यामुभाभ्यां तालकयोगवत् साधितः सन् सूतः शुक्लवर्णो भवेदिति ॥ ९ ॥

मृतशुल्वताप्यचूर्णं कान्तयुतं तेन रञ्जयेत्खोटम् ।
निर्व्यूढं घनसत्वहेमयुतं तद्रसायने योज्यम् ॥ १० ॥

अन्यच्चाह—मृतेत्यादि । मृतशुल्वताप्यचूर्णं मृतं च यत् शुल्वं ताम्रं ताप्यं स्वर्णमाक्षिकं च तच्चूर्णं, किंविशिष्टं ? कान्तयुतं चुम्बकमिश्रितं, तेन मृतशुल्वताप्यचूर्णेन कान्तयुतेन, पूर्वं निष्पन्नं खोटं रञ्जयेत् । किंविशिष्टं ? घनसत्त्वहेमयुतं अभ्रसत्वस्वर्णमिश्रितम् । एवंविधं तत्खोटं रसायने जराव्याधिनाशने योज्यम् ॥ १० ॥

बलिना त्रिगुणेन रसात्पर्पटिकयुतेन मर्दितं सूतम् ।
नियमकदिव्यौषधिभिश्छायाशुष्का कृता वटिका ॥ ११ ॥

अन्यच्चाह—बलिनेत्यादि । त्रिगुणेन बलिना गन्धकेन सह, रसं सूतं, सुदृढं यथा स्यात्तथा मर्दितं 'कुर्यात्' इत्यध्याहारः । किंविशिष्टेन बलिना ? पर्पटिकयुतेन पर्पटिको लोहपर्पटिकः प्रतीतस्तेन युतेन मिलितेन, नियमसंस्कारोक्ताः नियमकाः दिव्यौषधयः शतावरीप्रमुखास्ताभिः, ततो वटिका छायाशुष्का कार्या छायाऽघर्मरूपा, शुष्का नीरसा, तथा कार्या इति ॥ ११ ॥

मूषाधृतपर्पटिकामध्ये संछाद्य निगूढसुदृढेन ।
ध्मातं गच्छति खोटं हेमयुतं सूतबन्धकरम् ॥ १२ ॥

अन्यच्चाह—मूषेत्यादि । मूषाधृतपर्पटिका मूषायां धृता या पर्पटिका पूर्वोक्तलोहपर्पटिका, सा निगूढसुदृढेन निगूढश्चासौ सुदृढश्च तेन मूलकादिक्षारविडेन कृत्वा, मध्ये स्वान्तः आच्छाद्य ध्मातं क्रियते, पुनस्तद्ध्मातं सत् खोटं गच्छति खोटत्वमाप्नोति । तत्खोटं हेमयुतं स्वर्णमिलितं, सूतबन्धकरं स्यात् रसबन्धनप्रदमित्यर्थः ॥ १२ ॥

बलियुक्ता पर्पटिका मृदिता स्नुह्यर्कभाविता गुटिका ।
मध्ये गर्ता कार्या सूतभृताऽऽच्छादिता तदनु ॥ १३ ॥

विध्यन्तरमाह—बलीत्यादि । पूर्वोक्ता या पर्पटिका लोहपर्पटिका, बलियुक्ता गन्धकमिश्रिता; स्नुह्यर्कभाविता च स्नुही वज्री, अर्को मन्दारस्ताभ्यां भाविता प्लुता, एतयोः पयसेति भावः; मृदिता च घर्षिता च, एवं कृतविधाना पर्पटिका सति गुटिका वटिका कार्या, मध्ये गुटिकान्तः गर्ता कार्या, सा गर्ता ततः सूतभृता सूतपूरिता सती तदनु गर्तकरणानन्तरं आच्छादिता कार्या पर्पटिकयेति भावः ॥ १३ ॥

बाह्ये दत्त्वा निगडं सुलिप्तमुषोदरे दृढं न्यस्तम् ।
सूतः पुटितो म्रियते ध्मातः खोटं भवत्येव ॥ १४ ॥

तच्चाह—बाह्य इत्यादि । बाह्ये सूतोदरगुटिकोपरि निगडं दत्त्वा; सुलिप्तमूषोदरे सुलिप्ता सारणकर्माभिहितौषधीरिति शेषः, एवं विधा या मूषा तस्या यदुदरं तस्मिन्दृढं यथा स्यात्तथा निगडं न्यस्तं स्थापितं कुर्यादिति शेषः । मूषोदरगुटिकान्तस्थः सूतः पुटितो वह्नियोगात् म्रियते पञ्चत्वमाप्नोति । पुनः ध्मातः सन् खोटो भवति । एवाव्ययमन्यनिषेधवाचि ॥ १४ ॥

एवं तालशिलाभ्यां माक्षिकरसकैश्च दरदशशिसहितैः ।
म्रियते पुटसंयोगाद् ध्मातं खोटं कृतं विमलम् ॥ १५ ॥

अन्यच्चाह—एवमित्यादि । एवं लोहपर्पटिकाविधानेन, तालशिलाभ्यां ध्मातं सत् युतं यत् खोटं तद्विमलं मलवर्जितं स्यात् । च पुनः माक्षिकरसकैस्ताप्यखर्परिकैः दरदशिखिसहितैश्च हिङ्गुलशिखिमिलितैश्च करणरूपैर्विमलं, च पुनः पुटयोगाद्वह्निसंपर्कात् ध्मातं म्रियते । आदौ मललक्षणमुक्तम् ॥ १५ ॥

किट्टकपुरसंयोगाद् ध्मातैः किट्टस्तु किट्टतः सत्त्वम् ।
निपतति सत्वं रससाकं जनयति तद्भस्म तस्यापि ॥ १६ ॥

तच्चाह—किट्टकेत्यादि । किट्टपुरसंयोगात् किट्टं लोहमलं, पुरो गुग्गुलुः, तयोः संयोगात्; ध्मातैः माक्षिकरसदरदरूपैः पूर्वोक्तैः किट्टो भवेत्, पुनः किट्टतो रससाकं सूतमिश्रितं, सत्त्वं सारं, निपतति; तत्सत्त्वं भस्म जनयति उत्पादयति । तस्यापि भस्मनः सत्त्वं च निपततीत्यर्थः ॥ १६ ॥

वङ्गरसगन्धतालं खटिकाया योगतः सुपर्पटिकाम् ।
रञ्जयति सत्त्वतालं धूमेन विनाऽपि सूतेन ॥ १७ ॥

विध्यन्तरमाह—वङ्गरसगन्धतालमिति । वङ्गं त्रपु, रसः सूतः, गन्धको बलिः, तालं हरितालं, एतच्चतुष्टयं खटिकाया योगतः खटिका चित्रकरजस्तस्या योगतः, सुपर्पटिकां पूर्वोक्तां लोहपर्पटिकां, रञ्जयति, सूतेन विनापि, किमुत रसमिलितेन तालसत्त्वेनेति व्यक्तिः ॥ १७ ॥

एवं बीजं कृत्वा रञ्जनविधिना सुरञ्जनं कार्यम् ।
त्रिगुणं रसस्य हेम संयोज्यं तस्य वरबीजम् ॥ १८ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवद्विरचिते
रसहृदयतन्त्रे बीजयोजनात्मकश्चतुर्दशोऽवबोधः ।

महाबीजानां बीजानां च विशेषविधानमाह—एवमित्यादि । एवमुक्तविधानेन बीजं विधाय, रञ्जनविधिना रञ्जनविधानेन, सुरञ्जनं कार्यम् । तत्कार्ये रसस्य सूतस्य त्रिगुणं हेम संयोज्यं, पुनस्तस्य हेम्नः त्रिगुणं वरबीजं योज्यं, इति विशेषविधिः ॥ १८ ॥

इति कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां
मुग्धावबोधिन्यां रसहृदयटीकायां बीजयोजनात्मक
श्चतुर्दशोऽवबोधः ।

अथ पञ्चदशोऽवबोधः ।

वक्ष्ये त्वभ्रकसत्त्वाद्विमलद्रुतिमखिलगुणगणाधाराम् ।
सा हि निबध्नाति रसं संमिलिता मिलति च सुखेन ॥ १ ॥

अथ सत्त्वप्रकरणमभिधास्यते ।

भारती भरतखण्डमण्डिता पचरेमानन्दमञ्जरी ।
कस्तया न रसमलं कुतो जया वक्रपद्ममधिशस्थया सदा (?) ॥

बाह्यद्रुतिप्रशंसामाह—वक्ष्य इत्यादि । अहं कविः, अभ्रकसत्त्वाद्गगनसारतो, विमलद्रुतिं पक्षे विमला चासौ द्रुतिश्चेति विग्रहः । किंविशिष्टां? अखिलगुणगणाधारां; अखिलाश्च ते गुणगणाश्च गुणपटलाश्च तेषां या आधारा तां, बहवो गुणास्तिष्ठन्त्यस्यामिति व्यक्तिः । सा रसभूता द्रुतिः, रसं सूतं, निबध्नाति निश्चयेन बध्नातीत्यर्थः । किंभूता सती? मिलिता सती तुल्यमिश्रिता सती; पुनः द्रुतिः सुखेन मिलति पत्रादेर्दुर्मिलापत्वात् ॥ १ ॥

वज्रवल्ल्याः स्वरसेन गगनं सौवर्चलान्वितं पिष्टम् ।
परिपक्कं निचुलपुटैर्निर्लेपं भवति रसरूपम् ॥ २ ॥

द्रुतिविधानमाह—वज्रवल्ल्या इत्यादि । वज्रवल्ल्याः स्वरसेन स्वकीयेन रसेन, गगनमभ्रसत्त्वं, सौवर्चलान्वितं रुचकसहितं, पिष्टं 'कुर्यात्' इति शेषः । किं विशिष्टं गगनं? निचुलपुटैर्वेतसद्रवभावनाभिः पक्कं वह्निपुटितं, तत्पक्कं सत् निर्लेपं संपर्कवर्जितं रसरूपं भवति, पारदस्य रूपमित्यर्थः ॥ २ ॥

अजजलशतपरिप्लावितकपितिन्दुकचूर्णवापमात्रेण ।
द्रुतजातमभ्रकसत्त्वं मूषायां रसनिभं भवति ॥ ३ ॥

विध्यन्तरमाह—अजेत्यादि । द्रुतजातमभ्रकसत्त्वं अभ्रकसत्त्वं गगनसारं, मूषायां वज्रसंज्ञायां द्रुतं सत् रससंनिभं भवति पारदभूतमित्यर्थः । केन? अजजलशतपरिभावितकपितिन्दुकचूर्णवापमात्रेण; अजः छागस्तस्य जलेन मूत्रेण शतं शतावरं परिभावितं घर्मपुटितं यत्कपितिन्दुकचूर्णं तस्य वापमात्रेण द्रुतेऽभ्रसत्त्वे वापेनेति ॥ ३ ॥

निजरसशतप्लावितकञ्चुकिकन्दोत्थचूर्णकृतपरिवापम् ।
द्रुतमास्तेऽभ्रकसत्त्वं तद्वत्सर्वाणि लोहानि ॥ ४ ॥

अभ्रकसत्वं वह्नियोगेन द्रुतं आस्ते द्रवरूपमेवावतिष्ठते । किंविशिष्टं सत्त्वं? निजरसशतपरिभावितेत्यादि; निजरसेन स्वकीयद्रवेण परिभावितं यत्कञ्चुकिकन्दोत्थचूर्णं तस्य आवापेन; यथा शतभावितकञ्चुकिकन्दोत्थचूर्णेन सत्त्वं द्रुतमास्ते तद्वत्सर्वाणि लोहानि द्रुतानि तिष्ठन्ति ॥ ४ ॥

गगनं चिकुरतैलघृष्टं गोमयलिप्तं च कुलिशमूषायाम् ।
सुध्मातमत्र सत्त्वं प्लवति जलाकारमचिरेण ॥ ५ ॥

अन्यच्चाह—गगनेत्यादि । गगनं अभ्रसारं, चिकुरतैलघृष्टं चिकुरतैलं केशतैलं प्रतीतं ग्रन्थेषु, तेन घृष्टं मर्दितं, गोमयलिप्तं गोमयेन लिप्तं यथा स्यात्तथा, कुलिशमूषायां वज्राभिधानायां, सुध्मातं सत्, अचिरेणाल्पकालेन, जलाकारं भवतीत्यन्वयः ॥ ५ ॥

गगनद्रुतिरिह सत्त्वे ज्ञेयो हि रसस्य संप्रदायोऽयम् ।
प्रथमं निपात्य सत्त्वं देयो वापो द्रुते तस्मिन् ॥ ६ ॥

सामान्येनाभ्रद्रुतिविधानमाह—गगनेत्यादि । इहास्मिन् शास्त्रे, सत्त्वे गगनसारे जाते, साङ्गतया गगनद्रुतिः, भवतीत्यध्याहार्यम् । अयं प्रत्यक्षान्तर्गतः,

हि निश्चितं, रसस्य सूतस्य, संप्रदायो ज्ञेयः । पुनः प्रथमादौ, सत्त्वं अभ्रसारं निपात्य, तस्मिन्द्रुते सत्त्वे वह्निना द्रवरूपे सति वापो कार्यः 'कथितौषधीनां' इति शेषः ॥ ६ ॥

सुरगोपकदेहरजः सुरदालिफलैः समांशकैर्देयः ।
वापो द्रुते सुवर्णे द्रुतमास्ते तद्रसप्रख्यम् ॥ ७ ॥

अथ सुवर्णद्रुतिविधानमाह—सुरगोपकदेहरज इति ।—इन्द्रगोपशरीरचूर्णं, सुरदालीफलैः देवदालीफलैः, समांशकैः सुरगोपचूर्णतुल्यभागैः कृत्वा, वापो देयः द्रुते सत्युपरिक्षेप इति, सुवर्णे वापे कृते सुवर्णं द्रुतमास्ते, किंविशिष्टं? रसप्रख्यं जलतुल्यमित्यर्थः ॥ ७ ॥

अथ निजरसपरिभावितसुरदालीचूर्णवापमात्रेण ।
द्रुतमेवास्ते कनकं लभते भूयो न कठिनत्वम् ॥ ८ ॥

अन्यच्चाह—अथेत्यादि । अथेन्द्रगोपदेवदालीयोगकथनानन्तरं, कनकं हेम, निजरसपरिभावितं यत् सुरदालीचूर्णं तस्य वापमात्रेण गलिते हेम्नि क्षेपमात्रेण द्रुतमेवास्ते गलितमेवावतिष्ठतीत्यर्थः, पुनः कनकं काठिन्यं स्थिरत्वं न लभते इति चिरकालप्रयोजनम् ॥ ८ ॥

सुरदालीभस्मगलितं त्रिःसप्तकृत्वाथ गोजलं शुष्कम् ।
वापेन सलिलसदृशं कुरुते मूषागतं तीक्ष्णम् ॥ ९ ॥

अथ तीक्ष्णविधानमाह—सुरदालीत्यादि । सुरदालीभस्मगलितं सुरदाली देवदाली, तस्याः भस्म दाहसंभूतं, तेन गलितं; त्रिसप्तकृत्वा एकविंशतिवारं, गोजलं सुरभिमूत्रं भावितं कुर्यादित्यध्याहारः । अथ मूषागतं वज्रसंज्ञायां स्थितं तीक्ष्णं सारं वापेन निक्षेपणेन जलसदृशं जलतुल्यं कुरुते, कर्मविदिति शेषः ॥ ९ ॥

कूर्मास्थिशिलाजतुकमेषीमृगगोस्थिनिर्वापिता काञ्ची ।
जलसदृशी भवति सदा वापो देयो द्रुतायां तु ॥ १० ॥

अथ माक्षिकद्रुतिविधानमाह—कूर्मेत्यादि । कूर्मास्थि कच्छपास्थि, शिलाजतुकं प्रतीतं, मेषी मेषपत्नी, मृगो हरिणः गौः प्रतीता प्रतीतो वा, तेषां यान्यस्थीनि तैर्निर्वापिता या काञ्ची स्वर्णमाक्षिकं, सा जलसदृशी भवति; कियत्कालपरिमाणं? सदा नित्यं, पुनः द्रुतायां गलितायां वापो देयः, वापो निक्षेपणम् ॥ १० ॥

अभ्रकद्रुतिरविशेषा निर्लेपा योजिता समासात्तु ।
आरोटं रसराजं बध्नाति हि द्वन्द्वयोगेन ॥ ११ ॥

सामान्याभ्रद्रुतेरधिकारमाह—अभ्रद्रुतिरित्यादि । गगनद्रवः अविशेषा सामान्यापि विधानेन कृता निर्लेपा अस्पर्शा, समा सूततुल्यभागयोजिता सती, आरोटं रसराजं पूर्वसंस्कारैः संस्कृतं सूतं बध्नाति; केन? द्वन्द्वयोगेन; उभयमेलापकौषधेन । हिशब्दो युक्तार्थ इति ॥ ११ ॥

कृष्णागरुनाभिसितैः रसोनसितरामठैरिमा द्रुतयः ।
सोष्णे मिलन्ति रसेन मृदिताः स्त्रीकुसुमपलाशबीजरसैः १२

पूर्वोक्तानां मेलनमाह—कृष्णेत्यादि । इमा द्रुतयः सोष्णतुषकरीषादिना तापिते खल्वे, मृदिताः सद्यो मिलन्ति रसेन सह तथा कार्यम् । कैः कृत्वा ? कृष्णागरुनाभिसितैः कृष्णागरुकस्तूरिकाघनसारैः कृत्वा, न केवलमेतैः रसोनसितरामठैश्च लशुनशर्कराहिङ्गुभिः, पुनः स्त्रीकुसुमपलाशबीजरसैः स्त्रीकुसुमं च पलाशस्य बीजानि च रसश्चेति द्वन्द्वः, एतैस्त्रिभिर्योगैः पृथग्भूतैर्मिलन्ति सर्वैश्चेति ॥ १२ ॥

इति बद्धो रसराजो गुञ्जामात्रोपयोजितो नित्यम् ।
एकेनैव पलेन तु कल्पायुतजीवितं कुरुते ॥ १३ ॥

इत्थं बद्धरसराजस्य माहात्म्यमाह—इतीत्यादि । इति पूर्वोक्तेन द्रुतिविधानेन बद्धो रसराजः सूतः, एकेन पलेन षोडशिकया, कल्पायुतं जीवितं कुरुते कल्पानामयुतं सहस्रपरिमाणं जीवितमिति । कस्मात् ? नित्यं यथा स्यात्तथा गुञ्जामात्रोपयोगतः, दिनं दिनं प्रति रक्तिकापरिमाणस्य रसस्य योऽसौ उपयोगस्तेन ॥ १३ ॥

अथ पूर्वोक्तग्रासक्रमाज्जरते रसो विधिवत् ।
एताः पूर्वद्रुतयो भवन्ति रसराजफलदाश्च ॥ १४ ॥

विधिना ग्रासजारितो रसो गुणवानित्याह—अथेत्यादि । अथ द्रुतियोगानन्तरं, रसः सूतः, पूर्वोक्तग्रासक्रमात् योजितकवलक्रमात्, विधिवत् शास्त्रोक्तविधानेन बिडादिना जरते, च पुनरेताः पूर्वोक्तद्रुतयो रसराजफलदा भवन्ति सूते प्रयुक्ताः फलदाः स्युरित्यर्थः ॥ १४ ॥

समजीर्णः शतवेधी द्विगुणेन रसः सहस्रवेधी च ।
क्रमशो हि कोटिवेधी द्विगुणद्विगुणद्रुतेश्चरणात् ॥ १५ ॥

अधिकद्रुतेर्जारणादधिकगुणो रसो भवतीत्याह—समजीर्ण इति । समा तुल्यभागा द्रुतिर्जीर्णा यस्मिन्निति । द्रुते द्विगुणा या द्रुतिः तस्याश्चरणात् क्रमशः कोटिवेधी कोट्यंशेन वेधकः स्यात् । द्रुतिभागो वृद्धौ ह्यधिकः स्यादिति व्यक्तिः ॥ १५ ॥

षोडश वा द्वात्रिंशद्वा ग्रासा जीर्णाश्च चतुःषष्टिः ।
विध्यति तदा रसेन्द्रो लोहं धूमावलोकनतः ॥ १६ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे बाह्यद्रुत्यात्मकः पञ्चदशोऽवबोधः ।

ग्रासवृद्धया गुणानाह—षोडशेत्यादि । यदा षोडशग्रासा वा द्वात्रिंशद्ग्रासा वा चतुःषष्टिग्रासा जीर्णा जारणमापन्ना भवन्ति, तदा रसेन्द्रः सूतः, लोहं धातुसंज्ञकं, विध्यति वेधं करोति, कुतः? धूमावलोकनतः, धूमस्य यदवलोकनं दर्शनं ततः ॥ १६ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजश्रीचतुर्भुजमिश्रविरचितायां
मुग्धाववोधिन्यां रसहृदयटीकायां बाह्यद्रुत्यात्मकः
पञ्चदशोऽवबोधः ॥ १५ ॥

अथ षोडशोऽवबोधः ।

अथ सारणम् ।

इति रक्तोऽपि रसेन्द्रो जारितबीजोऽपि सारणारहितः ।
व्यापी न भवति देहे लोहेष्वप्यथवापि हि षण्ढतां याति ॥ १ ॥

अथ सारणमभिधास्यते ।

मनो मनीषायतमायतात्मना समाचरेत्कर्म परोपकारी ।
अर्चीव शोभां लभते परात्परां परापवादादपि सन्निवृत्तः ॥

"सूते सतैलयन्त्रस्थे स्वर्णादिक्षेपणं च यत् । वेधाधिक्यकरं लोहे सारणं तत्प्रकीर्तितम्"—इति परिभाषा । सारणमुत्कृष्टं मत्वा स्तुवन्नाह—इतीत्यादि । इति पूर्वोक्तेन विधानेन, रक्तोऽपि रागवानपि, रसेन्द्रः सूतः, जारितबीजोऽपि जारितानि बीजानि यस्मिन्निति, सारणारहितः सारणा वक्ष्यमाणसंस्कारस्तेन वर्जितः, व्यापी न भवति देहे लोहे च व्यापको न स्यात्, हि निश्चितं, अथवापि सारणारहितो रसेन्द्रः षण्ढतां याति निर्वीर्यत्वमाप्नोति ॥ १ ॥

मण्डूकमत्स्यकच्छपमेषजलौकाहिसूकरादीनाम् ।
संयोज्यैकस्य वसां ततः पचेत्सारणातैलम् ॥ २ ॥

सारणाय वसातैलमाह—मण्डूकेत्यादि । मण्डूको भेकः, मत्स्यो जलचरविशेषः, कच्छपः कमठः प्रतीतः, जलौकाः प्रतीताः, अहिः सर्पः, सूकरो वराहः, आदिशब्दाद्गोमहिषगजोष्ट्रखरनरकर्कटशिशुमारा अपि ग्राह्याः । अथ तेषां मध्ये

एकैकस्य पृथक्त्वेन वसां संयोज्य सारणं तैलं सारणमेव तैलं तत्पचेदिति, 'वह्निना' इति शेषः ॥ २ ॥

ज्योतिष्मतीबिभीतककरञ्जकटुतुम्बीतैलमेकस्मात् ।
द्विगुणितरक्तकषायं क्षीरेण चतुर्गुणेन पचेत् ॥ ३ ॥

सारणतैलविशेषमाह—ज्योतिष्मतीत्यादि । ज्योतिष्मतीबिभीतककरञ्जकटुतुम्बीतैलं ज्योतिष्मती कङ्गुणी, बिभीतकः कलिद्रुमः, करञ्जः प्रतीतः, कटुतुम्बी कटुका या तुम्बी, एतासां तैलं एकं, अतो द्विगुणितो यो रक्तकषायः रक्तगणस्य क्काथः, तं नियोज्य पूर्वसंबन्धात् । केन सह? चतुर्गुणवसया, तथा तैलतः चतुर्गुणितेन दुग्धेन सह पचेत् पाकं कुर्यादिति ॥ ३ ॥

दाडिमपलाशबन्धुककुसुमरजनीभिररुणसहिताभिश्च ।
मञ्जिष्ठालाक्षारसचन्दनसहितोऽपि रक्तवर्गोऽयम् ॥ ४ ॥

सारणतैलविधानाय रक्तवर्गमाह—दाडिमेत्यादि । दाडिमं प्रतीतं, पलाशो ब्रह्मवृक्षः, बन्धूकपुष्पं मध्याह्नविकाशिकुसुमं, रजनी हरिद्रा, एताभिः; अरुणसहिताभिः अरुणं आरक्तं यद्द्रव्यं कार्पासकुसुमादिकं तत्सहिताभिः । किंविशिष्टोऽयं रक्तवर्गः? मञ्जिष्ठालाक्षारसचन्दनसहितः मञ्जिष्ठा प्रतीता, लाक्षारसः अलक्तकः, चन्दनं रक्तचन्दनम् ॥ ४ ॥

विद्रुमभूनागमलं विण्मक्षिकाध्वाङ्क्षशलभानां च ।
कर्णमलं महिषीणां क्रमेण कल्कं कलांशेन ॥ ५ ॥

सारणतैले कल्कमाह—विद्रुमेत्यादि । विद्रुमं लतामणिः, भूनागमलं गण्डूपदपुरीषं; मक्षिकाध्वाङ्क्षशलभानां मक्षिका जीवविशेषः, ध्वाङ्क्षाः काकाः, 'शलभा पतङ्गाः' इति हैमः, तेषां विद् शकृत्; पुनर्महिषीणां कर्णमलं; क्रमेण कलांशेन षोडशांशेन, कल्कं प्रतिवापं दत्त्वा पूर्वतैलमुत्तारयेत् ॥ ५ ॥

पटगालितं गृहीत्वा सूतं संपूर्णदीर्घमूषायाम् ।
तदनु खलु तप्ततैले यद्द्राव्यं समं क्षिपेद्बीजम् ॥ ६ ॥

सिद्धतैलकृत्यमाह—पटेत्यादि । तत्सिद्धतैलं पटगालितं वस्त्रपूतं गृहीत्वा, तदनु तत्पश्चात् । संपूर्णदीर्घमूषायां गोस्तनाकारायां, तप्ततैले कोष्णसारणतैले, सूतं क्षिपेत् । किं कृत्वा? बीजं समं समभागं रसतुल्यं यद्द्राव्यं महाबीजं तत् भावितं कृत्वेत्यर्थः ॥ ६ ॥

मूषावक्त्रं स्थगयेल्लताद्वयप्रोतवीततनद्धेन ।
तैलार्द्रपटेन ततो बीजं प्रक्षिप्य समकालम् ॥ ७ ॥

पिशितानुगुणं बीजैः सारणविधिना नियोजितः सूतः ।
अक्षीयमाणो मिलति च बीजैर्बद्धो भवत्येव ॥ ८ ॥

सारणयन्त्रस्य विधानमाह—मूषेत्यादि । समकालमेककालं यथा स्यात्तथा, बीजं मूषान्तर्निक्षिप्य, ततोऽनन्तरं मूषावक्त्रं स्थगयेत् आच्छादयेत् । केन? तैलार्द्रपटेन सारणतैलार्द्रवस्त्रेण । किंविशिष्टेन? लताद्वयेन वस्त्रचीरद्वयेन प्रोतं च तद्वितत विस्तीर्णं च तत् नद्धं बद्धं तेन । अक्षीयमाणो मिलति न क्षीयत इत्यर्थः । सूते मिलति सति बद्धो ज्ञेयः, बीजैः सह मिलितो बद्धो भवतीत्यर्थः । पीतादिवर्णकथनेनापि कर्तुं सूचितम् (?) ॥ ७ ॥ ८ ॥

तद्वद्गभीरमूषे सारणतैलार्द्रमेव रसराजम् ।
सूताद्विगुणं कनकं दत्त्वा प्रतिसारयेत्तदनु ॥ ९ ॥

सूतबीजसारणानन्तरं कनकसारणमाह—तद्वदित्यादि । तद्वत् पूर्वविधानेन, गभीरमूषे दीर्घमूषायां, सारणतैलार्द्रे सारणतैलाप्लुतं, एव निश्चयेन, रसराजं कुर्यादिति शेषः । तदनु तत्पश्चात्सूताद्विगुणं यत्कनकं हेम, तदत्र दत्त्वा प्रतिसारयेत् सारणं कुर्यात्पूर्ववत् ॥ ९ ॥

बीजेन त्रिगुणेन तु सूतकमनुसारयेत्प्रकाशस्थम् ।
ईषन्नागं देयं त्रिविधायां सारणायां तु ॥ १० ॥

विध्यन्तरमाह—बीजेनेत्यादि । प्रकाशस्थं प्रकाशमूषागतं सूतं त्रिगुणेन बीजेन अनुसारयेत् प्रतिसारयेत् । किं कृत्वा? ईषदल्पं नागं दत्त्वा, त्रिविधायां सारणायामेवं विधेयमिति ॥ १० ॥

कृत्वा मूषां दीर्घां बन्धितत्रिभागप्रणालिकां तां च ।
तस्याग्रे प्रकटमूषा सच्छिद्रा सुदृढमृत्तिकालिप्ता ॥ ११ ॥
तस्मिन्प्रक्षिप्य रसं सारणतैलान्वितं तप्ते ।
प्रद्राव्य तुल्यकनकं क्षिप्तेऽस्मिन्मिलति रसराजः ॥ १२ ॥

सारणयन्त्रमाह—कृत्वेत्यादि । प्रथमं दीर्घां मूषां कृत्वा, च पुनः तां बन्धितत्रिभागप्रणालिकां बन्धिता त्रिभागे प्रणालिका यस्याः सा तां च कृत्वा, तस्याग्रे यन्त्रस्याग्रे प्रणालिकायां मूषान्तरित्यर्थः । सुदृढमृत्तिकालिप्ता, सच्छिद्रा रन्ध्रसहिता, प्रकटमूषा प्रकाशमूषा, कार्येति यन्त्रम् । तस्मिन्यन्त्रे, सारणतैलान्वितं रसं प्रक्षिप्य, ततोऽनन्तरं तुल्यं कनकं प्रद्राव्य गालयित्वा, तस्मिन्नेव तप्ते यन्त्रे क्षिप्ते सति रसो मिलति एकतां याति ॥ ११ ॥ १२ ॥

कृत्वा नलिकां दीर्घां षडङ्गुलां धूर्तकुसुमसंकाशाम् ।
मूषाप्यधो विलग्ना कर्तव्या वै मृदा लेप्या ॥ १३ ॥
अपरा सूक्ष्मा नलिका कार्या सप्ताङ्गुला सुदृढा ।
मध्ये प्रविशति च यथा तद्वत्कार्या च दृढमुखा ॥ १४ ॥
तस्मिन्सूतः क्षिप्तः सारणतैलान्वितो मदनरुद्धमुखः ।
तदनु बृहत्तमया हेम प्रद्राव्य हेमकोष्ठिकया ॥ १५ ॥
तस्मिन्मध्ये क्षिप्त्वा नलिकाग्रमधोमुखीं कुर्यात् ।
अन्तरूर्ध्वं भाराक्रान्तां सरति रसो नात्र संदेहः ॥ १६ ॥

अन्ययन्त्रमाह—कृत्वेत्यादि । पूर्ववद्दीर्घां धूर्तकुसुससंकाशां धत्तुरपुष्पसंकाशां, पूर्वयन्त्रनलिकायाः स्थाने एवंविधां षडङ्गुलां नलिकां कुर्यादिति व्यक्तिः । मूषापि अधो विलग्ना नलिकायास्तलभागे मूषा विलग्ना संलग्ना कार्या । सा च मृदा मृत्स्नया लेप्या । पुनरपि अपरा सूक्ष्मा नालिका सप्ताङ्गुला सप्ताङ्गुलपरिमाणा, सुदृढा मनोहरकठिना कार्या, यथा मध्ये षडङ्गुलनालिकान्तः प्रविशति, तद्वत्तथा कार्या । किंभूता ? दृढमुखा दृढं मुखं यस्याः सा एवंरूपा, तस्मिन् संसिद्धे यन्त्रे सारणतैलान्वितः सूतः क्षिप्तः सन् मदनरुद्धमुखः कार्यः, मदनेन सिक्थकेन रुद्धं मुद्रितं मुखं यस्य सः । तदनु तत्पश्चात्, हेमकोष्ठिकया हेम्नो या कोष्ठी एव कोष्ठिका तया, हेम स्वर्णं प्रद्राव्य द्रावयित्वा 'तत्र क्षिपेत्' इत्यध्याहार्यम् । तस्मिन्यन्त्रे, मध्येऽन्तः, नलिकाग्रं नलिकायाः सप्ताङ्गुलाया अग्रभागं क्षिप्त्वा अधोमुखीं कुर्यात्, पुनरूर्ध्वं भाराक्रान्तां कुर्यात् । इति कृते सति रसो सरति हेम्ना मिलति, न संदेहः नियतमित्यर्थः ॥ १३–१६ ॥

कृत्वाऽष्टाङ्गुलमूषां धूर्तकुसुमोपमां दृढां श्लक्ष्णाम् ।
अपरा मध्यगताऽपि च सच्छिद्रा च सप्ताङ्गुला कार्या १७
निरुद्धतां च कृत्वा सूतं प्रक्षिप्य तैलसंयुक्तम् ।
निर्धूमं कर्षाग्नौ स्थाप्य मूषां सुसन्धितां कृत्वा ॥ १८ ॥

अन्ययन्त्रविधानमाह—कृत्वेत्यादि । अष्टाङ्गुलमूषां अष्टाङ्गुलपरिमाणदीर्घां, धूर्तकुसुमोपमां कनकपुष्पसदृशां, दृढां कठिनां, श्लक्ष्णां मसृणां, एवंविधां मूषां कृत्वा, अपरा द्वितीया, सप्ताङ्गुला सप्ताङ्गुलपरिमाणदीर्घा, सच्छिद्रा रन्ध्रयुक्ता, सा मध्यगता अन्तःप्रविष्टा कार्या, अपीत्यवश्यं, इति मूषाद्वययन्त्रं सिद्धम् । तच्चाह—पूर्वोक्तायामन्तःप्रविष्टायां सप्ताङ्गुलायां सूतं तैलसंयुक्तं सारणतैलसहितं

प्रक्षिप्य, निरुद्धतां च कृत्वा, निर्धूमं यथा स्यात्तथा कर्षाग्नौ तां मूषां स्थाप्य; पुनः किं कृत्वा? सुसंधितां सन्धिमुद्रितां कृत्वा, पूर्ववत्सारयेदित्यर्थः ॥१७॥१८॥

वितस्तिमात्रनलिकेऽपि कार्ये सुदृढे तदग्रतो मूषे ।
उत्तानैका कार्या निश्छिद्रा छिद्रमुद्रिता च तनौ ॥ १९ ॥
दत्त्वा सूतं पूर्वं सारणतैलान्वितं निधाप्य भुवि ।
उत्तानायां मूषायां तस्यां बीजं समावृत्त्य ॥ २० ॥
स्वच्छं ज्ञात्वा च ततस्तद्बीजं छिद्रसंस्थितं कुर्यात् ।
बीजं सूतस्योपरि निपतति बध्नात्यसंदेहम् ॥ २१ ॥
सा च प्रकाशमूषा न्युब्जा कार्याऽर्धाङ्गुलसुनिविष्टा ।
नलिका कार्या विधिना ऊर्ध्वे सूतस्त्वधो बीजम् ॥ २२ ॥
मूषां निरुध्य विधिना ध्माता कोष्ठे द्रुतं बीजम् ।
ज्ञात्वा परिवर्त्य ततो निबध्नाति सूतराजं च ॥ २३ ॥

अन्ययन्त्रविधानमाह—मूषे कार्ये; किंविशिष्टे? तदग्रतः वितस्तिमात्रनलिके वितस्तिपरिमाणे नलिके ययोस्ते एवंविधे सुदृढे उभे कार्ये इत्यभिप्रायः । तयोर्मध्ये एका मूषा उत्ताना कार्या, अपरा निम्नेति भावः । उत्ताना किंविशिष्टा? निच्छिद्रा निर्व्रणा, छिद्रमुदिता छिद्रं मुद्रितं यस्यां, तनौ मूषाशरीरे इति । तच्चाह—पूर्वं प्रथमं, सूतं यन्त्रे पूर्वोक्ते, सारणतैलान्वितं दत्त्वा, भूवि निधाप्य स्थाप्य, तस्यां उक्तायां उत्तानायां मूषायां, बीजं महाबीजं, समावृत्त्य द्रवीकृत्य दत्त्वेत्यर्थः । ततोऽनन्तरं, बीजं स्वच्छममलं द्रवरूपं ज्ञात्वा, छिद्रसंस्थितं कुर्यात् छिद्रान्तः क्षिपेदित्यभिप्रायः, छिद्रान्तःक्षेपणात् बीजं, रसस्योपरि पतति सति सूतं असंदेहं यथा स्यात्तथा बध्नाति, बीजे छिद्रान्तःक्षेपणानन्तरं छिद्रमछिद्रं स्यादित्यर्थः । सेत्यादि ।—पुनः सा वितस्तिमात्रनलिका प्रकाशमूषा, अर्धाङ्गुलसुनिविष्टा मूषान्तः प्रविष्टा न्युब्जा अधोमुखी कार्या, तस्याः प्रकाशमूषायाः नलिका प्रणालिका, विधिना शास्त्रवार्तिकसंप्रदायेन कार्या; यथोर्ध्वे सूतो भवेदधो बीजमित्यर्थः । मूषामित्यादि । मूषां निरुध्य रन्ध्रं दूरीकृत्य, विधिना कोष्ठे कोष्ठीयन्त्रे, सा मूषा ध्माता कार्या; द्रुतं द्रवरूपं कृतं बीजं ज्ञात्वा, परिवर्त्य च मूषायां बीजस्य परिवर्तनं कृत्वा, ततो बीजं सूतराजं बध्नातीति ॥ १९–२३ ॥

अथवा डमरुकयन्त्रे सारणविधिना नियोजितः सूतः ।
सरति रसेन्द्रो विधिना ज्ञात्वा तत्कर्मकौशल्यम् ॥ २४ ॥

तत्सारितं रसेन्द्रं ग्रासविधानेन जारयेत्तदनु ।
पुनरपि सारितसूतो विध्यति कोट्यंशतः शुल्वम् ॥ २५ ॥

अथान्ययन्त्रमाह—अथवेत्यादि । विधिना सारणविधानेन, डमरुकयन्त्रे उक्तलक्षणपातनकरणोचिते यन्त्रे सूतो नियोजितः सन् सरति बीजेन मिलति । किं कृत्वा रसेन्द्रो नियोजितः ? ज्ञात्वा तत्कर्मकौशल्यं रसेन्द्रकर्मप्रावीण्यं ज्ञात्वेति ॥ २४ ॥ २५ ॥

क्रामणवसादियोगाद्विधिना सूतः सरत्येव ।
चपलत्वातिलघुत्वाद्बीजं यतोऽथ विप्लुषः कार्यः ॥ २६ ॥

पूर्वोक्तं दृढीकर्तुमाह—क्रामणेत्यादि । सूतो विधिनोक्तविधानेन, क्रामणोचिता या वसाः मण्डूकादीनां ता एव आदयो येषां तेषां योगात्सरति सारणा स्यात्, पुनर्बीजयुतोऽपि सूतः चपलत्वातिलघुत्वात् चपलत्वं चञ्चलत्वं च अतिलघुत्वं च तस्माद्धेतोः, अविप्लुषः स्थिरः कार्यः ॥ २६ ॥

सरति सुखेन च सूतो दहति मुखं नैव हस्तपादादि ।
क्रमति रसः फणियोगान्माक्षिकयुतहेमगैरिकया ॥ २७ ॥

पूर्वोक्तगुणानाह—सरतीत्यादि । पूर्वविधिना सूतः सरति, सारितः सूतो मुखं न दहति हस्तपादादि च अङ्गविभागं नैव दहति । पुनः फणियोगात् नागसंयोगतः, माक्षिकयुतहेमगैरिकया सह ताप्यमिलितस्वर्णगैरिकया सार्धं क्रामति मिलति ॥ २७ ॥

माक्षीकसत्त्वयोगात्फणियोगान्नागवद्द्रवति शीघ्रम् ।
द्रवति च कनके सूतः संसार्यते विधिना ॥ २८ ॥

सुखेन सारणविधानमाह—माक्षिकेत्यादि । कनकं हेम, माक्षिकसत्वयो-गात्फणिसंयोगान्नागसंयोगाच्च शीघ्रं द्रवति, कनके द्रवति सति विधिना सारण-तैलादिना संसार्यते सारणा क्रियत इति ॥ २८ ॥

तस्माद्द्रव्यविधायी सूतो बीजेन सारितोऽलघुना ।
समसारितः सुबद्धो मूषायां स्यात्समावर्तः ॥ २९ ॥

सारणया पारदगुणानाह—तस्मादित्यादि । तस्माद्धेतोः, सूतो द्रव्यविधायी 'स्यात्' इति शेषः, द्रव्यकर्तेत्यर्थः । अलघुना बीजेन अनल्पपरिमाणेन महाबीजेन सारितः सन् समसारितः सन् बद्धो 'भवेत्' इत्यध्याहारः । मूषायां समावर्तः द्रवणं स्यात् 'वह्निधमनात्' इति शेषः ॥ २९ ॥

सारितवर्तितसूतः समानबीजेन मिलति यः सार्यः ।
द्विगुणेन प्रतिसार्यः स चानुसार्यश्च त्रिगुणेन ॥ ३० ॥

सारणक्रममाह—सारितेत्यादि । सरितवर्तितसूतः सारितश्चासौ वर्तितश्चेति विग्रहः । यः समानबीजेन तुल्यमहाबीजेन मिलति स सार्यः, यो द्विगुणेन मिलति सः प्रतिसार्यः, यश्च त्रिगुणेन सोऽनुसार्य इति सारणाक्रमो दर्शितः ॥ ३० ॥

शतवेधी सार्यः प्रतिसारितः स्यात्सहस्रवेधी च ।
अनुसारितोऽयुतेन च विधिनाऽपि बलाबलं ज्ञात्वा॥३१॥

सारणक्रमस्य गुणानाह—शतेत्यादि । यः सार्यः समसारितः स शतवेधी स्यादित्यभिप्रायः । पुनः प्रतिसारितः द्विगुणबीजेन सारितो यः सूतः स सहस्रवेधी स्यात् । च पुनः अनुसारितः त्रिगुणबीजेन सारितः स अयुतेन अयुतवेधी स्यादिति व्यक्तिः । विधिना इत्युक्तविधानेन । बलाबलं ज्ञात्वा न्यूनाधिक्यं मत्वा विधिना युक्त इति शेषः ॥ ३१ ॥

अनुसारितेन तु समः स्वच्छः सूतः सारितस्तदनु ।
स भवति लक्षवेधी प्रतिसारितोऽयुतवेधी च ॥ ३२ ॥

सारितप्रतिसारितादनुसारितस्य विशेषमाह—अन्वित्यादि । तु पुनः, स्वच्छः प्रधानसंस्कारैः संस्कृतः सूतः,अनुसारितेन समः त्रिगुणबीजेन सारितोऽनुसारितस्तेन तुल्यो यदि स्यात्स च लक्षवेधी स्यात् । एवं प्रतिसारितः सूतः समेन सारितो अयुतवेधी स्यात् । एवं स्वच्छातिस्वच्छवृद्धौ वेधस्यापि वृद्धिः स्यादिति रहस्यम् ॥ ३२ ॥

कोटिं विध्यति सूतोऽप्यनुसारितः सरति बीजेन ।
प्रतिसारितेन तु सारितो दशकोटिं विध्यते सूतः ॥ ३३ ॥

तथोत्तरसत्त्वेन गुणाधिक्यमाह—कोटिमित्यादि । सूते सरति बीजेन ग्रासन्यायं विहाय समेन बीजेनानुसारितो यः स कोटिसंख्यां धातूनामिति शेषः, सूतो विध्यति । यथोक्तसारिते सूते दशगुणवृद्धिः सर्वत्रैवेति वेदितव्यम् ॥ ३३ ॥

प्रतिसारितस्तथाब्जं त्वनुसारितः खर्ववेधी च ।
एवं सारणयोगात्कुरुते वेधं यथेप्सितं विधिना ॥ ३४ ॥

विशेषमाह—प्रतीत्यादि । प्रतिसारितः सूतो द्विगुणबीजेन वारैकेन सारितो रसः, अब्जसंख्यां विध्यति । तु पुनरनुसारितः त्रिगुणेन बीजेन वारैकेन सारितः सूतः खर्ववेधी स्यात्, खर्वसंख्याके द्रव्यसंबन्धं करोतीत्यभिप्रायः ।

एवमुक्तप्रकारेण, विधिना शास्त्रज्ञवार्तिकसंप्रदायेन, सारणयोगात् यथेप्सितं वेधं कुरुते यथावाञ्छितमित्यर्थः ॥ ३४ ॥

अनुसारितेन सारितो विध्यति शुल्वं निखर्वसंख्याकम् ।
प्रतिसारितस्तु विध्यति पद्मं त्वनुसारितः शङ्खम् ॥ ३५ ॥

पुनर्विशेषमाह—अन्वित्यादि । अनुसारितेन त्रिगुणप्रथमग्रासन्यायेन बीजेन सारितः सूतो निखर्वसंख्याकं शुल्वं विध्यति, तु पुनः प्रतिसारितः षड्गुणप्रथमग्रासन्यायेन सारितः सूतो पद्मसंख्याकं विध्यति । पुनः अनुसारितो नवगुणग्रासन्यायेन बीजेन सारितः सूतः शङ्खसंख्यां विध्यतीति ॥ ३५ ॥

विद्धयेद्द्विगुणं द्रव्यं नागं दत्त्वाऽनुवाहयेच्छनकैः ।
तावद्यावत्कनकं दिव्यं प्रोन्मीलयेत्सकलम् ॥ ३६ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे सारणात्मकः षोडशोऽवबोधः ॥ १६ ॥

पुनर्विशेषमाह—विद्धयेदित्यादि । कनकं हेम दत्त्वा, शनकैर्नीचैस्तावदनुवाहयेत् यावद्दिव्यं प्रवरं कनकं, भवेदिति शेषः । पुनर्यावत्सकलं समस्तं नागं प्रोन्मीलयेन्निश्शेषं कुर्यादित्यभिप्रायः । पुनस्तत्कनकं द्विगुणं स्वतो द्रव्यं विध्येत्, वा सूतकेन सारितं सत् द्रव्यं कनकं शतसहस्रादिसंख्यातो द्विगुणसंख्याकं द्रव्यं शुल्वादिकं विद्धयेदिति रहस्यम् ॥ ३६ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां
मुग्धावबोधिन्यां रसहृदयटीकायां सारणात्मकः
षोडशोऽवबोधः ॥ १६ ॥

अथ सप्तदशोऽवबोधः ।

अथ क्रामणम् ।

इति कृतसारणविधिरपि बलवानपि सूतराड् क्रियायोगात् ।
संवेष्ट्य तिष्ठति लोहं नो विशति क्रामणारहितः ॥ १ ॥

अथ क्रामणमभिधास्यते ।

सुसंस्कृता मुखान्तःस्था विशदाश्च हितार्थकाः ।
तथा परोचिताः पूता भवन्त्यमरजा गिरः ॥ १ ॥

अथ क्रामणप्रशंसामाह—इतीत्यादि । इति उक्तविधानेन, कृतः सारणस्य

विधिर्यस्मिन् सूतराजे एवंविधः सूतराट्, बलवान् भवेदिति शेषः । कुतः ? क्रियायोगात्कृत्यकरणात् । यादृक् कृत्यं क्रियते तादृक् बलवान् स्यादित्यभिप्रायः । एवंविधोऽपि क्रामणारहितः क्रामणवर्जितो लोहं न विशति लोहान्तःप्रवेशं न करोति, ततो हेतोर्लोहं धातुं संवेष्ट्य परिवेष्टनं कृत्वा, तिष्ठति बाह्यरागदायी स्यादिति ॥ १ ॥

अन्नं वा द्रव्यं वा यथानुपानेन धातुषु क्रमते ।
एवं क्रामणयोगाद्रसराजो विशति लोहेषु ॥ २ ॥

देहलोहयोः सादृश्यमाह—अन्नमित्यादि । यथेति सादृश्ये । अन्नं गोधूमादिकं वा द्रव्यं औषधं, अनुपानेन सह जलादिना सार्धं, धातुषु मांसादिषु सप्तसु, क्रमते व्याप्नोति, तथा अमुना वक्ष्यमाणविधानेन, क्रामणयोगात् क्रामणाय योगः कुनटीमाक्षिकविषादिस्ततः, सूतराजो लोहरूप्यादिषु विशति बाह्याभ्यन्तरं विध्यतीत्यर्थः ॥ २ ॥

कान्तविषरसकदरदै रक्ततैलेन्द्रगोपकाद्यैश्च ।
क्रामणमेतच्छ्रेष्ठं लेपे क्षेपे सदा योज्यम् ॥ ३ ॥
कुनटीमाक्षिकविषं नररुधिरं वायसस्य विष्ठा च ।
महिषीणां कर्णमलं स्त्रीक्षीरं क्रामणे बलकृत् ॥ ४ ॥
टङ्कणकुनटीरामठभूमिलतासंयुतं महारुधिरम् ।
क्रामणमेतत्कथितं लेपे क्षेपे सदा योज्यम् ॥ ५ ॥

क्रामणयोगमाह—कान्तविषेत्यादि । कान्तं चुम्बकं, विषं कन्दजं विषं, कन्दविषाणि कालकूटादीनि त्रयोदश, दरदं हिङ्गुलं, तैः; च पुनः रक्ततैलेन्द्रगोपाद्यैः रक्तो रक्तकवर्गः, तैलं कङ्गुण्यादेः, इन्द्रगोपो जीवविशेषः, इत्याद्याः क्रामणोचितास्तैश्च । एतत् श्रेष्ठं सर्वोत्तमं क्रामणं; अनेन सूतः क्रामति विशति लोहेष्विति व्याप्तिः; तत्क्रामणं कथितम् । तल्लेपे क्षेपे च योज्यमित्यर्थः ॥ ३—५ ॥

शिलया निहतो नागो वङ्गं वा तालकेन शुद्धेन ।
क्रमशः पीते शुक्ले क्रामणमेतत्समुद्दिष्टम् ॥ ६ ॥

अन्यच्चाह—शिलयेत्यादि । नागः सीसकः, शिलया मनोह्वया, निहतो मारितः; पुनः वङ्गं शुद्धेन दोषवर्जितेन तालेन निहतं; क्रमशः क्रमेण, पीते हेमकर्मणि, शुक्ले रूप्यकर्मणि, एतत्क्रामणं समुद्दिष्टं सम्यक् प्रकाशितं; पीतकर्मणि नागः, शुक्लकर्मणि वङ्गं च नियोजितव्यमित्यर्थः ॥ ६ ॥

तीक्ष्णं दरदेन हतं शुल्बं वा ताप्यमारितं विधिना ।
क्रामणमेतत्कथितं कान्तमुखं माक्षिकैर्वापि ॥ ७ ॥

अन्यच्चाह—तीक्ष्णमित्यादि । दरदेन हिङ्गुलेन, हतं मारितं, तीक्ष्णं सारं; विधिना अरिवर्गविधानेन, ताप्येन स्वर्णमाक्षिकेन मारितं, शुल्बं ताम्रं; एतदपि क्रामणं कथितं; वा कान्तमुखं कान्तं लोहजाति उक्तं ग्रन्थादौ तत् मुखं प्रधानं यस्य तत् माक्षिकैर्वा 'मारितं नियोज्यं' इति शेषः ॥ ७ ॥

माक्षिकसत्त्वं नागं विहाय न क्रामणं किमप्यस्ति ।
दलसिद्धे रससिद्धे विधावसौ भवति खलु सफलः ॥ ८ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे क्रामणात्मकः सप्तदशोऽवबोधः ॥ १७ ॥

विशेषविधानमाह—माक्षिकसत्त्वमित्यादि । माक्षिकसत्वं ताप्यसारं, नागः सीसकः, तं विहाय नान्यत्किमप्यस्ति क्रामणं न क्रामणमिति भावः । खल्विति जिज्ञासायाम् । दलसिद्धे विधौ संस्कारैः पूर्णतां नीते सति असौ विधिः सफलः ८

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां
मुग्धावबोधिन्यां रसहृदयटीकायां क्रामणात्मकः
सप्तदशोऽवबोधः ॥ १७ ॥

अथ अष्टादशोऽवबोधः ।

अथ वेधविधानम् ।

अनया खलु सारणया क्रामणेन च विशति योजितो विधिवत् ।
असति वेधविधौ न रसः स्वगुणान्प्रकाशयति ॥ १ ॥

अथ वेधविधानमभिधास्यते ।

"व्यवायिभेषजोपेते द्रव्ये क्षिप्तो रसः खलु ।
वेध इत्युच्यते तज्ज्ञैः स च नैकविधः स्मृतः ॥" इति परिभाषा ।

क्रामणसंस्काराधिकारमाह—अनयेत्यादि । अनया उक्तया सारणया सह क्रामणसंस्कारे कृते सति, रसो विशति क्रामति, पुनर्वेधविधौ कृते सति रसः स्वगुणान् प्रकाशयतीति वेदितव्यम् ॥ १ ॥

रसदरदताप्यगन्धकमनःशिलाराजवर्तकं विमलम् ।
पुटमृतशुल्वं तारे निर्व्यूढं हेमकृष्टिरियम् ॥ २ ॥

वेधविधानमाह—रसेत्यादि । रसः सूतः, दरदं हिङ्गुलं, ताप्यं माक्षिकं, गन्धकः प्रतीतः, मनःशिला मनोह्वा, राजवर्तकं राजावर्तं, विमलं रौप्यमाक्षिकं, एकवद्भावद्वन्द्वः । पुटमृतशुल्वं रसादीनां पुटेन मृतमित्यर्थः । एवंविधं शुल्वं तारे निर्वाहितं, इयं हेमकृष्टिः स्वर्णकरणमित्यर्थः ॥ २ ॥

अष्टानवतिर्भागास्तारस्त्वेकोऽपि कनकभागः स्यात् ।
सूतस्यैको भागः शतांशविधिरेष विख्यातः ॥ ३ ॥

वेधविधानमाह—अष्टानवतिरित्यादि । एष रसदरदेत्यादिशतांशवेधविधिः कथं ? अत्र शतांशे अष्टानवतिर्भागास्तारस्य रूप्यस्य, पुनरिह कनकभागः स्यात् एक एवेति, पुनः सूतस्य दरदादिमिलितरसस्यैको भागः एकांशः; इति सर्वे शतांशाः, शतांशेन वेध इति ॥ ३ ॥

एकोनपञ्चाशद्भागास्तारस्येह तथैव शुल्वस्य ।
कनकस्यैको भागो वेधश्चैकेन सूतस्य ॥ ४ ॥

अन्यचाह—एकोनपञ्चाशदित्यादि । एकोनपञ्चाशद्भागाः तारस्य रूप्यस्य कार्याः, तथैव शुल्वस्य ताम्रस्य एकोनपञ्चाशद्भागाश्च कार्याः, पुनः कनकस्य हेम्नश्च एको भागः कार्यः, सूतस्य च एकेन भागेन वेध इति, एषोऽपि शतांशविधिः ॥ ४ ॥

एवं सहस्रवेधी नियुज्यते कोटिवेधी च ।
जारणबीजवशेन तु सूतस्य बलाबलं ज्ञात्वा ॥ ५ ॥

पूर्वोक्तविधेर्विशेषमाह—एवमित्यादि । एवं शतांशवेधन्यायेन दशवृद्धिविभागेन सहस्रवेधी स्यात् । एवं च जारणबीजवशेन जारणायां यद्बीजं कियद्गुणजारितमिति भावः, तद्वशेन कोटिवेधी च स्यात् । किं कृत्वा ? तेनैव जारणबीजवशेन यत्तस्य बलाबलं न्यूनाधिक्यं तत् ज्ञात्वेत्यभिप्रायः ॥ ५ ॥

दत्त्वादौ प्रतिवापं लाक्षामत्स्यादिपित्तभावनया ।
तारे वा शुल्वे वा तारारिष्टे तथा कृष्टौ ॥ ६ ॥

विशेषेण वेधविधानमाह—दत्त्वेत्यादि । आदौ प्रथमं, लाक्षामत्स्यादिपित्तभावनया लाक्षा प्रतीता, मत्स्यादिपित्तानि मत्स्यमाहिषमयूराजसूकरसंभवानि पित्तानि, तेषां भावनया कृत्वा, प्रतिवापं गलिते निक्षेपं; तत्तारे दत्त्वा अथवा शुल्वे प्रतिवापं कुर्यात्; अथवा कृष्टौ हेमकरणे वापं दत्त्वा नियुञ्ज्यादिति शेषः ॥ ६ ॥

तदनु क्रामणमृदिते तत्कल्केनापि पिण्डितरसेन ।
अतिविद्रुते च तस्मिन्वेधोऽसौ कुन्तवेधेन ॥ ७ ॥

विशेषाच्चाह—तदन्वित्यादि । तदनु लाक्षामत्स्यादिपित्तभावनाया अनन्तरं, तस्मिन् लाक्षादिकल्के, क्रामणमृदिते कान्तरसकदरदरक्ततैलेन्द्रगोपाद्यैर्मृदिते सति,पुनस्तत्कल्केन तच्चूर्णेनापि पिण्डितरसेन वेधः कर्तव्य इति शेषः । कस्मिन्? तारे वा शुल्बे वा; विद्रुते जलरूपे कार्य इत्यर्थः ॥ ७ ॥

तत्तैलार्द्रपटेन स्थगयेत्पललेन भस्मना वापि ।
विधिवद्वेध्यं द्रव्यं रसराजक्रामणार्थं हि ॥ ८ ॥

विशेषमाह—तदित्यादि । वेध्यं वेधोचितं द्रव्यं, रसराजक्रमणार्थं यथा रसो विशति तदर्थं, तं तैलार्द्रपटेन सारणतैलार्द्रवस्त्रेण, स्थगयेत् आच्छादयेत्, वा पललेन केनचिन्मांसेन, वा भस्मना आच्छादयेदित्यर्थः ॥ ८ ॥

इति सारितस्य कथितं रसस्य वेधादि क्रामणं कर्म ।
पादादिजीर्णबीजो युज्यते पत्रलेपेन ॥ ९ ॥

विशेषमाह—इतीत्यादि । सारितस्य उक्तविधानेन सारणाकृतस्य, वेधादिक्रामणं कर्म वेधविधानोदितक्रामणं कर्म कथितम् । पादादिजीर्णबीजः पादादिना पादार्धेन समतो न्यूनेन च जीर्णं बीजं यस्मिन् सः पत्रलेपेन युज्यते, अतः पत्ररञ्जनं स्यादित्यभिप्रायः ॥ ९ ॥

अम्लाद्युद्वर्तिततारारिष्टादिपत्रमतिशुद्धम् ।
आलिप्य रसेन ततः क्रामणलिप्ते पुटेषु विश्रान्तम् ॥१०॥

अतिशुद्धं निर्मलं, अम्लाद्युद्वर्तितं तारारिष्टशब्दात्सितं स्वर्णं ग्राह्यं, ततः रसेनालिप्य, ततः क्रामणालिप्ते क्रामणपिण्डेन लेपे कृते सति, पुटेषु उत्पलाग्नौ विश्रान्तं स्थापितं कुर्यात् । पत्ररञ्जनविधिरयम् ॥ १० ॥

अर्धेन मिश्रयित्वा हेम्ना ज्येष्ठेन तद्दलं पुटितम् ।
क्षितिखगपट्टरक्तमृदा वर्णे पुटोऽयं ततो देयः ॥ ११ ॥

अथ स्वर्णविधानमाह—अर्धेनेत्यादि । अर्धेन अर्धविभागेन, रञ्जितदलादित इति ज्ञेयम् । ज्येष्ठेन हेम्ना प्रवरकनकेन, तद्दलं रञ्जितपत्रं, मिश्रयित्वा पुटितं कुर्यात् यथा मिलति । पुनः क्षितिखगपट्टरक्तमृदा कृत्वा क्षितिः स्फटिकः, खगः पीतकासीसं, पट्टु सैन्धवं लवणं, रक्तमृत् गैरिकं, एकवद्भावद्वन्द्वः, तेन क्षित्यादिनोपरि लिप्तं दलं प्रति अयं पुटो देयः, वनोपलैरिति शेषः ॥ ११ ॥

भूपतिवर्तकचूर्णं शिरीषपुष्परसभावितं बहुशः ।
सद्यः करोति रक्तं सितकनकमसितभागेन ॥ १२ ॥

वर्णविधानमाह—भूपतीत्यादि । भूपतिवर्तकचूर्णं राजावर्तरजः, बहुशो बहुवारं, शिरीषपुष्परसभावितं 'कुर्यात्' इत्यध्याहार्यम् । भावितं घर्मपुटितमिति, 'विधानवित्' इति शेषः ॥ १२ ॥

रसदरदविमलताप्यं पट्टशिलामाक्षीकनृपाश्चैव ।
प्रवालकङ्कुष्टटङ्कणगैरिकप्रतिवापितं सितं कनकम् ॥ १३ ॥

अन्यच्चाह—रसेत्यादि । रस सूतः, दरदं हिङ्गुलः, विमलं ताप्यभेदः; पट्ट सैन्धवं, शिला मनोह्वा, माक्षिकं प्रतीतं वणिग्द्रव्यं, नृपो राजावर्तः; प्रवालं विद्रुमं, कङ्कुष्ठं विरङ्गं, टङ्कणं सौभाग्यं, गैरिकं प्रतीतं; एतैः प्रतिवापितं सितद्रव्यं कनकं 'भवेत्' इत्यध्याहार्यम् ॥ १३ ॥

तापीभवनृपावर्तबीजपूररसार्दितम् ।
करोति पुटपाकेन हेम सिन्दूरसन्निभम् ॥ १४ ॥

अन्यच्चाह—तापीभवेत्यादि । तापीभवं माक्षिकसत्त्वं, नृपावर्तं राजावर्तकं, एतद्वयं बीजपूररसार्दितं मातुलुङ्गरसमार्दितं कुर्यात्, एतदुभयोर्योगात् कनकं पुटपाकेन वह्निविधानेन कनकं पूर्वोक्तं यत्कनकं वा हीनवर्णकनकं सिन्दूरसन्निभं करोति । सिन्दूरवन्निभा यस्येति समासः ॥ १४ ॥

वङ्गाभ्रं सितमाक्षीकं शैलं वा वाहयेत्सिते ।
तत्तारं च दशांशेन तारोत्कर्षं करोति हि ॥ १५ ॥

अथ तारवर्णविधानमाह—वङ्गेत्यादि । वङ्गाभ्रमिति वङ्गं त्रपु, अभ्रं श्वेताभ्रं, पुनः सितमाक्षीकं विमलं, शैलं श्वेतशिलाजतु, वा सिते तारे वाहयेत् । पुनर्दशांशेन एतदौषधनिचयं तारतो दशमविभागेन कृत्वा, हि निश्चितं, तारोत्कर्षं करोति हीनवर्णत उत्तमं करोतीत्यभिप्रायः ॥ १५ ॥

नागः करोति मृदुतां निर्व्यूढस्तां च रक्ततां च रविः ।
तां पीततां च तीक्ष्णं काचस्तत्कालिकविनाशं च ॥ १६ ॥

तारे विशेषमाह—नाग इत्यादि । नागः सीसकस्तारे निर्व्यूढो मृदुतां कोमलत्वं करोति । पुनः रविस्ताम्रं निर्व्यूढं सत् तां मृदुतां, च पुनः रक्ततां लोहितनिभां करोति । च पुनस्तीक्ष्णं तारनिर्व्यूढं तां रक्ततां, पीततां च करोति । पुनः काचः प्रतीतो लोके, स कालिकविनाशं करोतीति तारे निर्व्यूढ इति संबन्धः॥१६॥

कनकारुणसममाक्षिककरञ्जतैलाप्लुतो ध्मातः ।
पाते पाते दश दश विन्दति यावद्धि कोटिमपि ॥ १७ ॥

हेम्नो विशेषमाह—कनकारुणेत्यादि । कनकं हेम, अरुणं ताम्रं, समं तुल्यभागं, माक्षिकं ताप्यं, अयं गणः करञ्जतैलप्लुतो ध्मातः कार्यः । पुनः पाते पाते वारंवारं निक्षेपे सति दश दश गुणोत्कर्षं विदन्ति 'ध्मात' इत्यध्याहारः । हि निश्चितम् । कियत्कालं ? यावत्कोटिसंख्यां विन्दति ॥ १७ ॥

स चायमतिविलीनः कङ्गुणीतैलसेचितो बहुशः ।
माक्षीकरविनिवापं विध्यति कनकं शतांशेन ॥ १८ ॥

विशेषमाह—स इत्याहि । सः करञ्जतैलप्लुतो योगो, बहुशो वारंवारं, कङ्गुणीतैलेन सेचितो यथा स्यात्तथायं अति विलीनः सन् माक्षिकरविनिवापं पुनः कार्य; एवंविधं च कनकं शतांशेन शतविभागेन विध्यति सितकनकमिति ॥१८॥

शुल्वहतं रसगन्धाहतखगपीतं दशांशेन ।
विध्यति कनकं कुरुते तन्निर्व्यूढं मर्दितं सुदृढम् ॥ १९ ॥

विशेषमाह—शुल्वेत्यादि । शुल्वहतं शुल्वेन सह हतं; रसगन्धं सूतगन्धं तेन आहतं पञ्चत्त्वमापन्नं यत्खगपीतं पीतकासीसं एतदौषधसमुच्चयं सुदृढं यथा स्यात्तथा मर्दितं कुर्यात्, पुनस्तत् निर्व्यूढं दशांशेन विध्यति सितकनकं कुरुते स्वर्णमिति विशेषः ॥ १९ ॥

रसकसमं सुध्मातं कनकं भुक्त्वा ततोऽर्कचन्द्रलेपेन ।
माक्षिकसत्त्वं हेम्ना करोति जीर्णो रसः शतांशेन ॥ २० ॥

अन्यच्चाह—रसकेत्यादि । ततोऽनन्तरं, अर्कचन्द्रलेपेन कनकं रसकसमं ध्मातं कुर्यात्, पुनरेतदौषधं भुक्त्वा कनकं स्यात्, पुनर्माक्षिकसत्वं हेम्ना सह जीर्णं रसं शतांशेन विध्यतीत्यर्थः ॥ २० ॥

अष्टगुणं मृतशुल्वं कलधौतेन मूकमूषया लिप्तम् ।
तत्षोडशांशजीर्णं विध्यति तारं शतार्धेन ॥ २१ ॥

अन्यच्चाह—अष्टगुणेत्यादि । अष्टगुणं मृतशुल्वं अरिवर्गेण सह हतं यत् शुल्वं ताम्रं, ततः कलधौतेन षोडशांशेन जीर्णं, शतार्धेन पञ्चाशद्विभागेन तारं विध्यति कनकं करोतीत्यर्थः ॥ २१ ॥

आवृत्य कनककरिणौ शिलया प्रतिवापितौ ततो भुक्त्वा ।
दोलायन्त्रे गन्धकजीर्णस्तारे दशांशवेधी स्यात् ॥ २२ ॥

अन्यच्चाह—आवृत्येत्यादि । कनककरिणौ समहेमनागौ, आवृत्य गालयित्वा, शिलया मनोह्वया, प्रतिवापितौ ततोऽनन्तरं दोलायन्त्रे कनककरिणौ भुक्त्वा गन्धकजीर्णो यो रसः स तारे दशांशवेधी स्यात् दशांशेन विध्यतीत्यर्थः ॥ २२ ॥

रिपुनिहतलोहपङ्कं जीर्णो धान्यस्थितश्चतुर्मासम् ।
सहितः पुरसुराभ्यां विध्यति घोषं शतांशेन ॥ २३ ॥

अन्यच्चाह—रिपुनिहतेत्यादि । रिपुनिहतलोहपङ्कं रिपुभिररिवर्गैर्निहतं मारितं यत् लोहपङ्कं स्वर्णतारताम्रनागवङ्गलोहाभिधानं, तत् चतुर्मासं यथा स्यात्तथा धान्यस्थितोऽन्नकोष्ठीधृतो रसो जीर्णः कार्यः । किंविशिष्टो धान्यस्थितः ? पुरसुराभ्यां गुग्गुलुमदिराभ्यां, सहितो मिलितः, शतांशेन घोषं कांस्यं विध्यति कनकं करोतीत्यर्थः ॥ २३ ॥

वक्ष्ये संप्रति सम्यग्यद्बीजं समरसे जीर्णम् ।
पिष्टिस्तम्भादिविधिं प्रकाश्यमानं बुधाः शृणुत ॥ २४ ॥

विशेषमाह—वक्ष्य इत्यादि । भो बुधाः मया प्रकाश्यमानं सत् शृणुत 'सावधाना' इत्यध्याहार्यम् । तत्किं ? संप्रति यद्बिजं समरसे तुल्यसूते सम्यक् जीर्णं जारणमापन्नं, तदहं गोविन्दनामा वक्ष्ये कथयामि । पुनः पिष्टिस्तम्भादिविधिं पिष्टिस्तम्भ आदिर्यस्य विधेस्तं विधिं पाटखोटजलौकाख्यं च वक्ष्ये ॥२४॥

राजावर्तकविमलपीताभ्रगन्धताप्यरसकैश्च ।
काङ्क्षीकासीसशिलादरदैश्च समन्वितं नागम् ॥ २५ ॥

अथ नागमाह—राजावर्तकेत्यादि । राजावर्तकं प्रसिद्धं, विमलं श्वेतमाक्षिकं, पीताभ्रं पीतवर्णं यदभ्रं, गन्धो गन्धकः, ताप्यं स्वर्णमाक्षिकं, रसकं खर्परिकं, एतैः; पुनरेतैः-काङ्क्षी काहीति लोके, कासीसं पीतकासीसं, शिला मनोह्वा, दरदं हिङ्गुलं, तैश्च; समन्वितं मिलितं नागं कुर्यादित्यर्थः ॥ २५ ॥

अहिमाररसैः पुटितं मारय नागं निरुत्थकं यावत् ।
तदनु च तस्य हि मध्ये शुल्वं गन्धं च लवणकङ्कुष्ठम् ॥ २६ ॥

तच्चाह—अहीत्यादि । पूर्वौषधसंयुतं नागं अहिमाररसैः करवीरद्रावैः, पुटितं कुर्यात् । नागं सीसकं, तावन्मारय यावन्निरुत्थकं यथा पुनरुत्थितं न स्यात् । तदनु तत्पश्चात्, तस्य नागस्य मध्ये शुल्वं ताम्रं, गन्धं प्रतीतं, लवणं सैन्धवं, कङ्कुष्ठं विरङ्गं, एतत्सर्वं 'मिश्रितं कुयात्' इत्यध्याहार्यम् ॥ २६ ॥

तत्सर्वं शतवारान् भावय पक्वार्कपत्रसलिलैश्च ।
घोषाकृष्टे शुल्वे चूर्णं निर्वाहयेच्छतशः ॥ २७ ॥

तच्चाह—तदित्यादि। तत्पूर्वोक्तभागयुतं कल्कं, पक्वार्कपत्रसलिलैः पक्वानि यानि अर्कस्य पत्राणि तेषां यानि सलिलानि तैः कृत्वा, भो रसज्ञ! शतवारान् भावय घर्मपुटनं कुरु, तद्भावितं चूर्णं घोषाकृष्टे कांस्यात्समुद्धृते, शुल्वे ताम्रे, शतशः शतवारं निर्वाहयेद्गलितोपरि निक्षिपेदिति ॥ २७ ॥

शुल्वेन तेन हि समं रसकपीताभ्रसत्त्वविमलं च ।
गैरिकमाक्षिकसत्त्वं टङ्कणनागं च तीक्ष्णयुतम् ॥ २८ ॥

तेन शुल्वेन शतशो निर्वाहितताम्रेण सह, समं तुल्यभागं; रसकपीताभ्रसत्त्वविमलं; च पुनः गैरिकमाक्षिकसत्त्वं गैरिकं प्रतीतं, माक्षिकसत्त्वं ताप्यसारं, एतच्च समं; टङ्कणं सौभाग्यं, नागं सीसकं, तीक्ष्णं सारं, सर्वं समसंयुतं 'युज्यत' इति शेषः ॥ २८ ॥

एतैर्द्वन्द्वं कृत्वा माक्षिकवापेन रञ्जयेच्छुल्वम् ।
वारांश्च विंशतिरपि गलितं सेचयेत्तदनु ॥ २९ ॥

एतैरौषधैरुक्तैः, शुल्वेन द्वन्द्वं कृत्वा ताम्रेण सह मेलनं विधाय, शुल्वं विंशतिर्वारान् माक्षिकवापेन रञ्जयेत्। शुल्वमपि गलितं जलरूपं, वक्ष्यमाणौषधेषु सेचयेत्तदनु ॥ २९ ॥

निर्गुण्डीकाकमाचीकन्यारसमेलनं कृत्वा ।
वारान् सप्त च विधिना तदपि च निर्वापयेद्धेम्नि ॥ ३० ॥

सेचनौषधान्याह—निर्गुण्डीत्यादि। निर्गुण्डी शेफालिका, काकमाची वायसी, कन्या गृहकन्या कुमारीति प्रसिद्धा, आसां रसेन मेलनं कृत्वा, सप्तवारान् विधिना, तदपि च हेम्नि शुल्वे निर्वाहयेत्। इति युग्मम् ॥ ३० ॥

यावच्चतुर्विंशतिगुणं बीजवरं रञ्जयेत्तच्च ।
पक्वं माक्षिकमेव हि तेन च विधिना तदपि चतुर्विंशतिगुणम्॥

तच्चाह—यावदित्यादि। यावदित्यविधौ, तत् शुल्वं, तावद्धेम्नि निर्वाहयेत् यावच्चतुर्विंशगुणं समाप्नोति, तद्बीजवरं स्यात्। च पुनस्तद्बीजवरसंज्ञकं रञ्जयेत् रञ्जकं भवेदित्यर्थः। च पुनस्तेन विधिना शुल्वविधानेन हि चतुर्विंशगुणं माक्षिकमेव हि पक्वं तदपि बीजवरं स्याद्रञ्जयेच्च ॥ ३१ ॥

तद्बीजं लघुमात्रं रसराजे संस्कृते पूर्वम् ।
मूषायां खलु दत्त्वा दशगुणं च गन्धकं दाह्यम् ॥ ३२ ॥

तद्बीजं लघुमात्रं रसराजे संस्कृते पूर्वमिति रसराजे संस्कृते षोडशसंस्कारविशुद्धे, पूर्वं प्रथमं, लघुमात्रं अल्पपरिमाणं बीजं मूषायां दत्त्वा, पुनर्दशगुणं गन्धकं दाह्यं रसेन्द्रे इत्यर्थः ॥ ३२ ॥

अथवा वालुकयन्त्रे सुदृढे चतुर्दशाङ्गुलमूषायाम् ।
मध्ये सूतं मुक्त्वा लघुतरपुटयोगतो पिहिता ॥ ३३ ॥

तच्चाह—अथवेत्यादि । अथवेत्यारम्भे, सुदृढे कठिने, वालुकायन्त्रे सिकताख्ययन्त्रे, चतुर्दशाङ्गुलमूषायां मध्ये, सूतं मुक्त्वा मूषा लघुतरपुटयोगतः अतिशयेन लघुर्लघुतरः लघुतरश्चासौ पुटश्चतस्य योगतः, पिहिता कार्या आच्छादितेति ॥ ३३ ॥

तेन समं बीजवरे पिष्टिः पादांशतः कार्या ।
अङ्गुलिनवपरिमाणे मूषामध्ये च पिष्टिकां दत्त्वा ॥ ३४ ॥

पिष्टीविधानमाह—तेनेत्यादि । तेन गन्धकजारितेन सूतेन, समं सार्धं, बीजवरे कनकबीजे, पादांशतः पिष्टिः कार्या; च पुनरङ्गुलिनवपरिमाणे मूषामध्ये अङ्गुलीर्नव परिमाणं यस्य तस्मिन् एवंविधे मूषामध्ये, पिष्टिं दत्त्वा पिहिता कार्येति शेषः ॥ ३४ ॥

निर्गुण्डीकाकमाचीगोजिह्वादुग्धिकारक्ता-
गृहकन्यामधुसैन्धवपिण्डैरपि समन्ततश्छाद्या ॥ ३५ ॥

पिष्टिवेष्टनाय पिण्डमाह—निर्गुण्डीत्यादि । निर्गुण्डी शेफालिका, काकमाची वायसी, गोजिह्वा प्रतीता, दुग्धिका या रक्ता रक्तवर्णा, गृहकन्या कुमारिका, मधु क्षौद्रं, सैन्धवं लवणं, एषां पिण्डैः कृत्वा; समन्ततोऽभितः, छाद्या कार्या आच्छाद्येति भावः ॥ ३५ ॥

तावत्कार्यः पुटयोगो यावद्दृढतां सामायाति ।
षड्गुणगन्धकतालककाङ्क्षीकासीसलवणकक्षारम् ॥ ३६ ॥

जारणाय कल्कमाह—तावदित्यादि । तावत् पुटयोगो वह्निपुटनं कार्यं यावत् दृढतां काठिन्यं समायाति इदं वक्ष्यमाणं; तत् किं ? षड्गुणगन्धकतालककाङ्क्षीकासीसलवणकक्षारं गन्धकः प्रतीतः, तालकं हरितालं, काङ्क्षी वणिग्द्रव्यं, कासीसं पीतकासीसं, लवणं सैन्धवं लवणपञ्चकं वा, क्षारं स्वर्जिकादि, 'ददेत्' इत्यध्याहारः । सर्वत्र षड्गुणसंबन्धः ॥ ३६ ॥

---

१ 'ताभ्यां पुटयोगेन' इति. पा. । २ 'ताभ्यां मूषापिण्डाभ्यां' इति पा. ।

ताप्यं तत्सर्वसमं देयं वाह्ये तदौषधिपिण्डम् ।
षड्गुणषड्गुणसहितं पिष्टीं यन्त्रेऽथ कच्छपे दत्त्वा ॥ ३७ ॥

तच्चाह—ताप्यमित्यादि । ताप्यं स्वर्णमाक्षिकं, तत्सर्वसमं तैः सर्वैः पूर्वोक्तैः षड्गुणैः समं तुल्यं देयं, पुनर्वाह्ये पिष्ट्युपरितः तदौषधिपिण्डं देयम् । किंविशिष्टं ताप्यं ? षड्गुणषड्गुणसहितं षड्गुणं षड्गुणं यत्पूर्वोक्तमौषधं तेन सहितं षड्गुणमपि ताप्यं ग्राह्यम् । एवंविधा पिष्टीं अथ सिकताख्ययन्त्रानन्तरं कच्छपे कूर्माकारे यन्त्रे दत्त्वा स्वेद्यमित्यागामिश्लोके संबन्धात् ॥ ३७ ॥

स्वेद्यं पुटयोगेन तु त्रिदिनं घटिकात्रयं यावत् ।
उद्धृत्य ततो यत्नात् पिष्ट्वा मूषां सुचूर्णितां कृत्वा ॥ ३८ ॥

तच्चाह—स्वेद्यमित्यादि । कच्छपयन्त्रस्थितः खोटो भवेदित्यर्थः ॥ ३८ ॥

समवीजेन सार्यो नागं त्रिगुणं ततः समुत्तार्य ।
प्रतिसारणा च कार्या जारितसूतेन बीजयुक्तेन ॥ ३९ ॥

विशेषमाह—समेत्यादि । पूर्वपिष्टीस्तम्भितः सूतः समवीजेन तुल्यभागकनक-वीजेन, त्रिगुणं नागं दत्त्वा सार्यः । ततः समुत्तार्य प्रतिसारणां जारणां जारणां प्रति या सारणा द्विगुणवीजसारणारूपा सा कार्येति शिष्टाचारः ॥ ३९ ॥

अनुसारणा च पश्चात्त्रिगुणं बीजं भवेद्यत्र ।
प्रागुक्तं तस्योपरि शतगुणं वाह्यम् ।
तेन च घोषाकृष्टे शुल्वे वेधोऽथ सप्तशतैः ॥ ४० ॥

विशेषाच्चाह—अनुसारणेत्यदि । पश्चात्प्रतिसारणानन्तरं, अनुसारणा च कार्या । अनुसारणलक्षणमाह—यत्र त्रिगुणवीजं भवेत्, जारितमिति शेषः; अनुसार-णेयम् । पुनस्तस्योपरि तस्य वीजस्योपरि, प्रागुक्तं मृतनागं शतगुणं वाह्यमिति । तेन सिद्धेन सूतेन घोषाकृष्टे कांस्योद्धृते शुल्वे ताम्रे सप्तशतैः रसवेधः 'कार्यः' इति शेषः ॥ ४० ॥

क्रामणमेतत्प्रागपि माक्षिकदरदगन्धकशिलाभिः ।
राजावर्तकविमलप्रवालकङ्कुष्ठतुत्थविषैः ॥ ४१ ॥

क्रामणमाह—क्रामणमित्यादि । प्रागपीति पूर्वाध्यायेऽपि 'प्रोक्तं' इति शेषः । पुनरेतद्वक्ष्यमाणं क्रामणगुणं कुर्यादित्यध्याहारः । स कथं तदाह—माक्षिकेत्यादि । माक्षिकं ताप्यं, दरदं हिङ्गुलं, गन्धकः प्रतीतः, शिला मनोह्वा, ताभिः । पुनः राजावर्तकेत्यादि । राजावर्तकं 'लाजवरद' इति भाषायां, विमलं सितमाक्षिकं,

प्रवालं विद्रुमं, कङ्कुष्ठं विरङ्गं, तुत्थकं शिखिग्रीवं, विषं सक्तुकादिकन्दजं, एतैश्च ॥ ४१ ॥

कान्तगैरिकटङ्कणभूमिलतारुधिरशक्रगोपरसैः ॥
महिषीणां कर्णमलैर्मृतलोहं वायसस्य विष्ठा च ॥ ४२ ॥

कान्तेत्यादि । कान्तं चुम्बकं, गैरिकं प्रतीतं, टङ्कणं सौभाग्यं, भूमिलता भूनागः, रुधिरं शक्रगोपः, रसो विषं, पुनरुक्ताद्विषमत्र द्विगुणं तैः । च पुनर्महिषीणां कर्णमलैर्हयारिपत्नीनां श्रवणयोर्मलानि तैः सह, मृतलोहं मृतं च तल्लोहं चेति, वायसस्य काकस्य विष्ठा शकृत् ॥ ४२ ॥

पारावतस्य विष्ठा स्त्रीपयः सर्वमेकतः कृत्वा ।
क्रामणकल्के चैतच्छतवारान् रक्तपीतगणैः ॥ ४३ ॥

पारावतस्य विष्ठा कपोतशकृत्, स्त्रीपयो नारीक्षीरं, एतत्सर्वं माक्षिकादिस्त्रीक्षीरान्तमेकतः कृत्वा मिश्रितं विधाय, च पुनरेतत्क्रामणकल्कं रक्तपीतगणैः किंशुकादिहरिद्राद्यैः शतवारान् भावयेदित्यागामिश्लोकसंबन्धात् ॥ ४३ ॥

भाव्यं कङ्गुणितैले कोश्चीपित्तभावना देयाः ।
सप्त, कल्केन पचेत्सारितपिष्टिं च हण्डिकायां हि ॥ ४४ ॥

सारणकल्कविधानमाह—भाव्यमित्यादि । पूर्वोक्तसारणकल्कं कङ्गुणीतैले ज्योतिष्मतीस्नेहे भाव्यं; ततो क्रोञ्चीपित्तभावनाः सप्त देयाः दातव्याः । पुनः सारितपिष्टिं सारिता या रसेन्द्रबीजपिष्टिस्तामनेन कल्केन हण्डिकायां पचेत् वह्निना पाकः कर्तव्यः ॥ ४४ ॥

यावद्रक्ता भवति हि गच्छति नागं समुत्तार्य ।
तावत्क्षेपं च क्षिपेत्सर्वस्मिन्सारणादौ च ॥ ४५ ॥

सारणकल्कपाचनमाह—यावदित्यादि । पूर्वकल्कसंयुतां पिष्टिं कियत्कालं पचेत्? यावद्रक्ता भवति, नागं च गच्छति नागनाशः स्यात्, नागे गच्छति सति समुत्तार्य, पुनस्तावत्सर्वस्मिन्सारणादौ च क्षेपक्रमेण क्षेपं क्षिपेत् ॥ ४५ ॥

एवं हि कोटिवेधी रसराजः क्रामितो भूत्वा ।
पुंस्त्वादेरुच्छ्रायप्रदो भूत्वा भोगान्दत्ते ॥ ४६ ॥

पुंस्त्वाद्यान् आकाशगमनपर्यन्तान् भोगान्ददातीत्यभिप्रायः ॥ ४६ ॥

अभ्रकमाक्षिककनकं नागयुतं मिलितं विधिना ।
सूते पिष्टिः कार्या दिव्यौषधियोगतः पुटिता ॥ ४७ ॥

पिष्टिविध्यन्तरमाह—अभ्रकमित्यादि । अभ्रकं प्रतीतं, माक्षिकं तार्प्यं, कनकं हेम; नागयुतं नागेन सीसकेन युतं सहितं, विधिना कर्तव्योपदेशेन, एतत्सर्वं सूते मिलितं सत् पिष्टिः कार्या दिव्यौषधियोगतः पुटिता पिष्टिः कार्या इति ॥ ४७ ॥

षड्गुणगन्धकदाहः शिलया नागं समुत्तार्य ।
तारे हेमाकृष्टिर्मिलिता स्यात्षोडशांशेन ॥ ४८ ॥

तारे हेमाकृष्टिमाह—षडित्यादि । पूर्वोक्तायां पिष्ट्यां षड्गुणगन्धकदाहः कार्यः, पुनः षड्गुणशिलया कृत्वा नागं समुत्तार्य सीसकमपहाय, सा निष्पन्ना पिष्टी षोडशांशेन तारे रूप्ये मिलिता सती हेमाकृष्टिः स्यात्कनकोद्धारणं भवेत्, ताम्रनागादिषु धातपु हेम स्थितमेव, तत आकृष्टिशब्दो युक्तः ॥ ४८ ॥

माक्षिकनिहतं शुल्वं शिलया निहतं च नागतुल्यांशम् ।
पुटितं जम्बीररसैः सैन्धवसहितं पचेत्स्थाल्याम् ॥ ४९ ॥
तच्चूर्णं घृतमधुकटङ्कणसहितं च गुप्तमूषायाम् ।
तारे त्रिगुणं व्यूढं हेमाकृष्टिर्भवेद्दिव्या ॥ ५० ॥

नागमारणविधानमाह—माक्षिकेत्यादि । माक्षिकेण निहतं मारितं यत् शुल्वं, शिलया मनःशिलया नागं च निहतं मारितं, उभयं तुल्यांशं समभागं कार्यं, पुनर्जम्बीररसैः जम्बीरद्रावैः सैन्धवसहितमुभयं पुटितं भावितं सत्पचेद्वह्निना पक्कं कुर्यात् । क्व ? स्थाल्यां मृद्भाजने इत्यर्थः ॥ ४९ ॥ ५० ॥

शुल्वं बलिना निहतं तीक्ष्णं दरदेन निहतसमभागम् ।
एकीकृत्वा पुटयेत्पचेन्मातारसेनैव ॥ ५१ ॥

नागे तारे हेमाकृष्टिमाह—शुल्वमित्यादि । बलिना गन्धकेन, निहतं सत् समभागं तुल्यांशं, 'कुर्यात्' इति शेषः । उभयमेकीकृत्य संमिश्र्य, मातारसेनैव नारीक्षीरेण पुटयेत् पचेदिति श्लोकार्थः ॥ ५१ ॥

तारे व्यूढं त्रिगुणं मार्जाराक्षनिभं भवेत्तच्च ।
लिप्तं रसेन पुटितं हेमार्धेन मात्रया तुल्यम् ॥ ५२ ॥

हेमाकृष्टेर्विधानमाह—तारे इत्यादि । पूर्वोक्तं चूर्णं शुल्वजं तीक्ष्णजं वा तारे त्रिगुणं व्यूढं वाहितं सत्, मार्जाराक्षसनिभं ओतुनेत्राभं तारं भवेत् । हेमार्धेन मात्रया ताराधंभागेन परिमाणेन हेम्ना तुल्यमन्यूनाधिकं; रसेन पयसा ॥ ५२ ॥

लिप्तं तदनु पुटितं नागं हि रसेन पादयुक्तेन ।
खर्परकस्थं कृत्वा कार्यं विधिना दृढं ताप्यम् ॥ ५३ ॥

पुनर्नागविधानमाह—लिप्तमित्यादि । त्रिगुणं यथा स्यात्तथा, पादयुक्तेन रसेन चतुर्थांशसहितसूतेन सह, नागं सीसकं, खर्परकस्थं मृद्भाजनखण्डस्थितं कृत्वा, विधिना रसज्ञोपदेशेन, दृढं ताप्यं वह्नियुतं सत् निहतं कुर्यादिति वाक्यार्थः ॥ ५३ ॥

निर्गुण्डीरसभावितपुटितं शिलया वर्तितं श्लक्ष्णम् ।
तावन्मृदितपुटितं निरुत्थभावं व्रजेद्यावत् ॥ ५४ ॥

तच्चाह—निर्गुण्डीत्यादि । पक्वं नागचूर्णं श्लक्ष्णं श्रेष्ठविधानं यथा स्यात्तथा शिलया वर्तितं सत् निर्गुण्डीरसभावितपुटितं पूर्वं भावितं घर्मपुटितं पश्चात्पुटितं वह्निपुटितं कुर्यात् । पुनर्यावन्निरुत्थभावं अशरीरत्वं व्रजेत् तावन्मृदितपुटितं मर्दितपाचितं कुर्यादित्यर्थः ॥ ५४ ॥

तारे तन्निर्व्यूढं यावत्पीतं भवेद्रुचिरम् ।
हेमसमेन च मिलितं मात्रातुल्यं भवेत्कनकम् ॥ ५५ ॥

तच्चाह—तारे इत्यादि । तन्निरुत्थनागचूर्णं यावत्पीतं पीतवर्णं तारं भवेत् तावद्वारं निर्व्यूढं कर्यात् । पुनर्हेमसमेन कनकतुल्यांशेन मात्रातुल्यं मिलितं सत् रुचिरं मनोरमं कनकं सर्वं भवेदित्यर्थः ॥ ५५ ॥

ताप्यं चाङ्गुलिसंज्ञं चूर्णं कृत्वा तदन्तरे दत्त्वा ।
शुल्बस्य गुप्तमूषा कार्या पुटिताप्यथ च ध्माता ॥ ५६ ॥

ताप्यविधानमाह—ताप्यमित्यादि । अङ्गुलिसंज्ञं ताप्यं स्वर्णमाक्षिकं चूर्णं कृत्वा, तदन्तरे तच्चूर्णमन्तरे मध्ये दत्त्वा, शुल्बस्य ताम्रस्य गुप्तमूषा अन्धमूषा कार्या, तत्र नले इत्यभिप्रायः । सा मूषा पुटिता ध्माता कार्येति विधानमुक्तम् ॥ ५६ ॥

हेम्ना मिलितं विधिना मात्रातुल्यं भवत्येव ।
पादादिजीर्णसूते लिह्यात्पत्राणि हेमकृष्टीनाम् ॥ ५७ ॥

तच्चाह—हेम्नेत्यादि । पक्वं यन्माक्षिकचूर्णं तद्धेम्ना कृत्वा पादादिजीर्णसूते पादादिना पादार्धसमानादिना जीर्णो योऽसौ सूतः तस्मिन्, हेमकृष्टीनां पत्राणि कलुषकनकानां पत्राणि लिह्यात् क्रामणयोगेन लेपयेदित्यागामिश्लो-कात् ॥ ५७ ॥

क्रामणयोगेन ततो विलिप्य विधिना निधाय तुल्याधः ।
पश्चाद्धेम्ना सहितं ध्मातं मूषोदरे समावर्त्य ॥ ५८ ॥

तच्चाह—क्रामणेत्यादि । ततो रसलेपानन्तरं, क्रामणयोगेन कुनटीमाक्षिकवि-

षमित्यादिनोक्तेन, विलिप्य तुल्याधः तुल्यं यथा स्यात्तथा अधोभागे निधाय, मूषोदरे ध्मातं कुर्यात्। पुनः पश्चाद्धेम्ना कनकेन सहितं आवर्त्य ध्मातं कुर्यात् ॥ ५८ ॥

यन्त्रं हण्ड्यां पक्वं पञ्चमृदावाप्य पुटपक्वम्।
वक्ष्यामि चालेपविधिं क्रमति च सूतो यथा हि पत्रेषु।
रञ्जति येन विधिना समासतः सूतराजस्तु ॥ ५९ ॥

तच्चाह—यन्त्रमित्यादि। वा यन्त्रं पञ्चमृदा वल्मीकमृत्, गैरिकं, खटिका, सैन्धवं, इष्टिका चेति पञ्चमृदः, तया कृत्वा; हण्ड्यां स्थाल्यां पक्वं कार्यम्। अथ पुटपक्वं गजपुटादिना पाच्यमित्यर्थः। लेपनविधिं वक्ष्यामि यथा पत्रेषु लेपः कार्यः, पुनर्यथा पत्रेषु क्रमति स्वगुणान् प्रकाशयति, पुनर्येन विधिना रञ्जनं रागं ददाति, समासतः संक्षेपतः, विधिना विधानतः, सूतराज एवंविधो भवेत् तमुपायं वक्ष्यामीति ॥ ५९ ॥

कृत्वाऽऽलक्तकवस्त्रं लिप्तमनुस्नेहमुपरि चूर्णेन।
अवचूर्णितं तु कृत्वा गन्धकशिलया विधानेन ॥ ६० ॥

अथ लेपक्रामणं रञ्जनविधानमाह—कृत्वालक्तकवस्त्रमित्यादि। प्रथमं आलक्तकं वस्त्रं अलक्तेन रञ्जितं यद्वस्त्रं तदालक्तकं, अनु पश्चात्, स्नेहं कङ्गुण्यादीनां तैलं, लिप्तं कार्यं, तत्तैललिप्तवस्त्रोपरि वक्ष्यमाणौषधानां चूर्णेन अवचूर्णनं कुर्यात्, तैललिप्तवस्त्रं गन्धकशिलया अवचूर्णितं कृत्वा तदुपरि दातव्यं दर्शयति ॥ ६० ॥

तदुपरि शृतं च दत्वा गन्धकशिलाचूर्णं च सूतवरे।
पश्चाद्वर्तिः कार्या पात्रे धृत्वाऽयसे च समे ॥ ६१ ॥

पुनस्तदुपरि गन्धकशिलाचूर्णोपरि, शृतं दत्त्वा, पुनर्गन्धकशिलाचूर्णं सूतवरे सूतराजोपरि दत्त्वा, पश्चात्तत्करणानन्तरं, वर्तिः कार्या, सा वर्तिरायसे लोहमये, समे समभूमौ पात्रे धृत्वा तत्रोपरि कार्या ॥ ६१ ॥

दीपं प्रतिबोध्य ततस्तैलं दत्त्वा ततः स्तोकम्।
पाकं यामस्यार्धं स्वाङ्गे शीतं ततः कार्यम् ॥ ६२ ॥

विध्यन्तरं दर्शयति—दीपमित्यादि। ततो वर्तेः पात्रोपरि करणानन्तरं, दीपं प्रतिबोध्य प्रज्वाल्य, ततो वारंवारं स्तोकमल्पं तैलं दत्त्वा, यावद्यामस्य प्रहरस्य अर्धं स्यात्तावत्पाकं 'कुर्यात्' इति शेषः। ततोऽनन्तरं तत्पतितं तैलं स्वाङ्गशीतं कार्यं, अङ्गे तैलद्रवरूपे शरीरे यथास्वं स्वयमेव शीतं यथा स्यात्तथा कार्यम् ॥ ६२ ॥

गृह्णीयादथ सूतकृष्टीं लिप्ता ततस्तेन ।
क्रामणयोगैर्लिप्त्वा पुटिता सा हेम्नि निर्ध्माता ॥ ६३ ॥

तच्चाह—गृह्णीयादित्यादि । अथ शीतकरणानन्तरम् । सूतकृष्टीं च गृह्णीयात् 'कर्मवित्' इति शेषः । ततोऽनन्तरं सा सूतकृष्टी तेन पत्रेण लिप्ता सती क्रामणयोगैर्लिप्त्वा, हेम्नि सुवर्णे निर्ध्माता कार्येति ॥ ६३ ॥

अथवा दरदशिलालैर्गन्धकमाक्षीकपक्कमृतनागैः ।
कङ्कुष्ठप्रवालसहितैः पिष्टैश्च कङ्कुणीतैले ॥ ६४ ॥

विध्यन्तरमाह—अथवेत्यादि । दरदो हिङ्गुलः, शिला मनोह्वा, आलं हरितालं, तैः; गन्धकः प्रतीतः, माक्षिकं यत्पक्कं सिन्दूरीकृतं, मृतनागश्च, तैः । पुनः कङ्कुष्ठप्रवालसहितैः कङ्कुष्ठं विरङ्गं, प्रवालं विद्रुमं, ताभ्यां सहितैः । पुनरेतैः कङ्कुणीतैले ज्योतिष्मतीतैले पिष्टैश्चूर्णीकृतैः, मध्ये सूतो युक्तः कार्य इत्यग्रिमश्लोकसंवन्धात् ॥ ६४ ॥

मध्ये सूतो युक्तो मृदितः खल्वे तथायसे विधिना ।
संस्वेद्य वंशनलिकां दोलायन्त्रेण स्वेदितं त्रिदिनम् ॥ ६५ ॥

तच्चाह—मध्ये इत्यादि । पूर्वोक्तैरौषधैः कृत्वा, मध्ये औषधान्तः, सूतो युक्तः कार्यः । पुनर्मर्दयित्वा वंशनलिकां रिक्तोदरां प्रति संस्वेद्य दिनत्रयं दोलायन्त्रेण स्वेदितं कुर्यादित्यर्थः ॥ ६५ ॥

एतैर्लिप्त्वा कृष्णैः पत्रं पूर्वोक्तविधानेन ।
नागं दत्त्वा प्रकटं स्तोकं स्तोकं क्रमेणैव ॥ ६६ ॥

तच्चाह—लिप्त्वेत्यादि । एतानि स्वेदितौषधानि संयुक्तानि तैः, कृष्णैः कृष्णलवणैः, पूर्वोक्तविधानेन सूतकृष्टीविधानेन पत्रं लिप्त्वा, पुनः प्रकटं यथा स्यात्तथा स्तोकं अल्पमल्पं क्रमेण नागं दत्त्वा, कनकं जायते इत्यग्रिमश्लोकसंवन्धः ॥ ६६ ॥

भवति हि कनकं दिव्यमक्षीणं देवयोग्यं च ।
एवं जारितसूते सकलाः खलु हण्डिकाः सर्वाः ॥ ६७ ॥

एवं कृते सति, अक्षीणं अक्षयं, दिव्यं प्रवरं, देवयोग्यं देवा इन्द्रादयस्तद्योग्यं कनकं भवति । युक्तोऽयमर्थः । एवं जारितसूते जारितकर्मकृते रसे, खलु निश्चितं, सर्वा हण्डिकाः सर्वे धात्वाद्याः, सकलाः सप्रसवाः स्युरित्यर्थः ॥ ६७ ॥

निर्बीजं समजीर्णे पादैकेनैव षोडशांशेन।
अर्धेन पादयोगं पादेनैकेन तुल्यकनकं च ॥ ६८ ॥

विशेषमाह—निर्बीजमित्यादि। निर्बीजं यथा स्यात्तथा, समजीर्णे पादेन तुर्यांशेन फलं ददाति; तथा अर्धेन जीर्णेन षोडशांशेन फलं ददाति; च पुनस्तदर्धेन जीर्णेन तत्पादयोगं, तत्पादेन एकेन तत्पादयोगं फलं ददातीति सर्वत्र वाच्यम्। तुल्यकनकं च जीर्णे पूर्णं फलं ददातीति ॥ ६८ ॥

ताराकृष्टिं वक्ष्ये मृतवङ्गं तालकेन तुल्यांशम्।
लम्बितमथ निर्ध्मातं ताम्रं तारच्छविं वहति ॥ ६९ ॥

हेमाकृष्ट्यनन्तरं ताराकृष्टिं वक्ष्ये अहं कविः कथयामि, मृतवङ्गं मारितं वङ्गं, तालकेन हरितालेनेति। अथ ताम्रं तुल्यांशं लम्बितं विस्तीर्णं यथा स्यात्तथा निर्ध्मातं सत् तारछविं वहति रूप्यद्युतिं प्राप्नोतीत्यर्थः ॥ ६९ ॥

पश्चान्नागं देयं प्रकाशमूषासु निर्मलं यावत्।
तावद्ध्मातं विधिना सुनिर्मलं निस्तरङ्गं तु ॥ ७० ॥

तच्चाह—पश्चादित्यादि। पश्चाद्वङ्गताम्रयोगानन्तरं, प्रकाशमूषासु यावत् निर्मलं मलवर्जितं स्यात्तावन्नागं देयं, पुनर्यावन्निर्मलमुज्ज्वलं, निस्तरङ्गं नागोर्मिवर्जितं स्यात् तावद्विधिना ध्मातं कुर्यादित्यर्थः ॥ ७० ॥

तालशिलासर्जिकाभिः सैन्धवलवणेन नयनहितसहितैः।
एकैकं सहितं वा वेधं दत्त्वा पुनः शुल्बे ॥ ७१ ॥

विशेषमाह—तालेत्यादि। तालं हरितालं, शिला मनोह्वा, सर्जिका प्रतीता, ताभिः; सैन्धवं च तत् लवणं च तेन, नियनहितसहितैः एतैः कृत्वा एकैकं पृथक्त्वेन वा सहितमेकत्वेन पुनः शुल्बे ताम्रे वेधं प्रतिदध्यादिति ॥ ७१ ॥

छगणं माहिषतक्रं स्नुहीक्षीरेण सर्पिषा क्रमशः।
सगुडदुग्धमधुविमिश्रैः क्रमशो वेधे निषेकश्च ॥ ७२ ॥

तारवेधनिषेकान्याह—छगणमित्यादि। छगणं वनोत्पन्नं, माहिषं तक्रं महिष्याः इदं माहिषं, स्नुहिक्षीरेण सेहुण्डदुग्धेन सह, पुनः सर्पिषा घृतेन सह, गुडदुग्धमधुभिर्मिश्रैः मिलितं कृत्वा क्रमशो वेधकर्मणि निषेकः कार्यः ॥ ७२ ॥

काञ्ची ब्राह्मी कुटिलं तालकं समभागयोजितं ध्मातम्।
शुल्बं विद्धमनेन तु ताराकृष्टिर्भवेद्दिव्या ॥ ७३ ॥

ताराकृष्टिमाह—काञ्चीत्यादि। काञ्ची स्वर्णमाक्षिकं, ब्राह्मी सोमाह्वा, कुटिलं

सीसं, तालकं प्रतीतं, एतत्समयोजितं समांशमेलितं सत् ध्मातं कुर्यात्, पुनरनेन काश्यादिगणेन विद्धं शुल्वं दिव्या मनोरमा ताराकृष्टिर्भवेत् ॥ ७३ ॥

एवं ताराकृष्टिर्लिप्त्वा विद्धा रसेन सारितेन ।
तारं करोति विमलं लेपं वा पादजीर्णादि ॥ ७४ ॥

ताराकृष्टिमाह—एवमित्यादि । एवं उक्तविधानेन, सारितेन सारणाकर्मकृतेन, [लिप्त्]वा विद्धा सती ताराकृष्टिर्भवेत् । पुनरियं ताराकृष्टिः तारं विमलं मलवर्जितं [...] वा पादजीर्णादि पादेन जीर्णं यस्मिन् आदिशब्दादर्धसमग्रहणं कार्यं, तत् अथ ॥ ७४ ॥

[...]मिश्रीकृतविद्धं क्रमितं त्वथ मातृकातुल्यम् ।
ता[...] भवति छेदनताडननिकषैश्च निर्दोषम् ॥ ७५ ॥

विशेषमाह—इतीत्यादि । इति पूर्वोक्तविधानेन, मिश्रीकृतं मिलितं, विद्धं क्रमितं मातृकातुल्यं समांशं सत् तारदलं रूप्यपत्रं भवति, तद्रूप्यदलं छेदनताडननिकषैः छेदनं खण्डनं, ताडनं घणघातः, निकषं शिलोपरि परीक्षणं, तैरिति; तापैश्च निर्दोषं तद्भवति ॥ ७५ ॥

एवं वेधविधानं शास्त्रविधिज्ञेन कर्मकुशलेन ।
ज्ञात्वा गुरूपदेशं कर्तव्यं कर्मनिपुणेन ॥ ७६ ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पाद-
विरचिते रसहृदयाख्ये तन्त्रे वेधविधाना-
त्मकोऽष्टादशोऽवबोधः ॥ १८ ॥

एवं अमुना प्रकारेण, शास्त्रविधिज्ञेन शास्त्रस्य विधिं जानातीति सः तेन, कर्मनिपुणेन संस्कारप्रवीणेन कुशलेन कर्त्रा, गुरूपदेशं गुरुरुक्तलक्षणो ग्रन्थादौ, तस्य उपदेशं ज्ञात्वा, वेधविधानं कर्तव्यमित्यर्थः ॥ ७६ ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजश्रीचतुर्भुज-
विरचितायां मुग्धावबोधिन्यां रसहृदयटीकायां वेधवि-
धानात्मकोऽष्टादशोऽवबोधः ॥ १८ ॥

अथैकोनविंशतितमोऽवबोधः ।

अथ भक्षणविधानमभिधास्यते ।

इति रसराजस्य विधौ वेधविधानं प्रसङ्गतः प्रोक्तम् ।
अधुना प्रोक्तानपि वक्ष्यामि रसायने योगान् ॥ १ ॥

अथ भक्षणविधानमाह—इतीत्यादि । रसराजस्य विधौ रसेन्द्रकर्मविधाने, वेधविधानं प्रसङ्गतः प्रस्तावतः प्रोक्तं, न तु स्वप्रज्ञासमम् । अधुना प्रोक्तानपि अपिशब्दादनुभूतानपि, रसायने जराव्याधिनाशनविधौ, योगान् द्रव्यसमुदायात्मकान्, वक्ष्यामि कथयामीत्यर्थः ॥ १ ॥

आदौ प्रातः प्रातः सैन्धवयुक्तं घृतं पिबेत्त्रिदिनम् ।
तदनु क्वाथं त्रिदिनं युञ्जीयात्केतकीतनुजम् ॥ २ ॥

कायशोधनमाह—आदावित्यादि । प्रथमं प्रातः प्रातः प्रत्यूषे, त्रि[illegible]न्धवमिलितं घृतमाज्यं पिबेत् । अन्यसंयोगमाह-तदनु घृतसैन्[illegible] ॥ केतकीतनुजं क्वाथं केतक्याः तनुः शरीरं तस्माज्जातं केतकीमूल[illegible] मा[illegible]ः, 'अङ्गेऽप्यनुक्ते विहितं तु मूलं' इति न्यायात्, त्रिदिनं प्रयुञ्जीयादि[illegible] ॥ २ ॥

विधिना स्वेद्यो देहः कर्तव्यो वार्तिकेन्द्रेण ।
क्वथितं कटुरोहिण्याः संशोधनमनुप्रयुञ्जीत ॥ ३ ॥

विध्यन्तरमाह—विधिनेत्यादि । ततो विधिना स्वेदविधानेन, देहः शरीरं वार्तिकेन्द्रेण रससंप्रदायविदा स्वेद्यः स्विन्नः कर्तव्यः । अन्यत्किं? कटुरोहिण्याः तिक्तायाः क्वथितं प्रसाधितं सम्यक् शुद्धिकरणं अनुप्रयुञ्जीत स्वेदानन्तरमित्यभिप्रायः ॥ ३ ॥

तदनु च शुद्धादूर्ध्वं श्लेष्मान्ते रेचिते सकलम् ।
यावकपथ्यं त्रिदिनं घृतसहितं तत्प्रयुञ्जीत ॥ ४ ॥

विध्यन्तरमाह—तदित्यादि । तदनु कटुकरोहिणीसेवनानन्तरं, शुद्धादूर्ध्वं यथा स्यात्तथा श्लेष्मान्तरेचिते सति यथा श्लेष्मणोऽन्तः स्यात्तथा रेचिते सति, त्रिदिनपरिमाणं यावकपथ्यं घृतसहितं प्रयुञ्जीतेति ॥ ४ ॥

पुनरपि च पानयोगं वक्ष्यामि च सकलभुवनहितकृतये ।
पीत्वा प्रथमे यामे चोष्णोदकसममिदं चूर्णम् ॥ ५ ॥

विध्यन्तरमाह—पुनरपीत्यादि । पुनरपीति यावकपथ्ययोगानन्तरं, च पुनः, पानयोगं वक्ष्यामि, किमर्थं? सकलभुवनहितकृतये समस्तसंसारहितकरणाय, इदं वक्ष्यमाणं, चूर्णं पथ्याद्यं, उष्णोदकसमं तप्तजलेन सह, प्रथमयामे प्रथमप्रहरान्तः, पीत्वा शुद्धशरीरो भवेदित्यागामिश्लोकसंबन्धात् ॥ ५ ॥

पथ्यासैन्धवधात्रीमरिचवचागुडविडङ्गरजनीनाम् ।
शुण्ठीपिपल्योरपि चूर्णं त्रिदिनं प्रयुञ्जीत ॥ ६ ॥

शोधनाय चूर्णमाह—पथ्येत्यादि । पथ्या हरीतकी, सैन्धवं प्रतीतं, धात्री आमलकं, मरीचमूषणं, वचा उग्रगन्धा, गुडः प्रतीतः, विडङ्गं कृमिघ्नं, रजनी हरिद्रा; शुण्ठीपिप्पल्योरपीति शुण्ठी नागरं, पिप्पली मागधी, आसां औषधीनां चूर्णं त्रिदिनं प्रयुञ्जीत । उष्णजलसममिति ज्ञेयम् ॥ ६ ॥

अमुना शुद्धशरीरः परिहृतसंसर्गदोषबली ।
पीत्वा पयसा सहितं यावकममुना भवेच्छुद्धः ॥ ७ ॥

[illegible]नेत्यादि । अमुना वक्ष्यमाणविरेचनेन यावकादिना शुद्धशरीरः सन्, अथ [illegible]र्गदोषबली भवति संसर्गेण ये दोषाः शरीराभ्यन्तरास्ते संसर्गदोषाः, [illegible]ातनेन शुद्धे[illegible]जिता येन सः परिहृतसंसर्गदोषः, तेन बली बलयुक्तः; दोषनिवृत्तौ [illegible]थापनरोधा[illegible] गुणप्र[illegible]ज्ञेयम् । किं कृत्वा परिहृतदोषः? अमुना पयसा उष्णोदकेन [illegible] यावकं अलक्त (?), पीत्वा शुद्धो भवेदित्यर्थः ॥ ७ ॥

अकृतक्षेत्रीकरणे रसायनं यो नरः प्रयुञ्जीत ।
तस्य क्रामति न रसः स रसः सर्वाङ्गदोषकृद्भवति ॥ ८ ॥

संशोधनस्याकरणे दोषमाह—अकृतेत्यादि । यो नरः पुमान्, अकृतक्षेत्रीकरणे 'देहे' इति शेषः, न कृतं अकृतं क्षेत्रीकरणं यस्मिन् तस्मिन्सति, रसायनं जराव्याधिविनाशनौषधं, प्रयुञ्जीत, तस्य पुंसो रसो न क्रामति स्वगुणान्न प्रकाशयति; तर्हि किं? सर्वाङ्गदोषकृद्भवति बाहुचरणादिषु षट्स्वङ्गेषु विकारकृत् स्यात् ॥ ८ ॥

इति शुद्धो जातबलः शाल्योदनयावकाख्यमुद्गरसैः ।
क्षेत्रीकृतनिजदेहः कुर्वीत रसायनं विधिवत् ॥ ९ ॥

रसायनाधिकारत्वमाह—इतीत्यादि । पूर्वोक्तविधानेन शुद्धः सन् यो जातबलो भवति, स क्षेत्रीकृतनिजदेहः अक्षेत्रं क्षेत्रं क्रियत इति क्षेत्रीकृतो निजदेहः शरीरं येन सः, मतिमान् रसायनं विधिवत्प्रकुर्वीत । कैः जातबलः? शाल्योदनं च यावकाख्यं च मुद्गाश्च तैः ॥ ९ ॥

सुरतरुतैलघृतमधुधात्रीरसपयांसि निर्मथ्य ।
पीत्वा विशुद्धकोष्ठो भवति पुमानन्तरितशुद्धः ॥ १० ॥

विध्यन्तरमाह—सुरतर्वित्यादि । अन्तरितशुद्धः अन्तरितं शुद्धं यस्य सः ग्रहणीरोगादिवर्जित इत्यर्थः, एतानि औषधानि निर्मथ्य पीत्वा, विशुद्धकोष्ठो भवति विशुद्धं मलवर्जितं कोष्ठं उदरं यस्येत्येवंविधो भवति । तानि कानि? सुरतरुतैलेत्यादीनि सुरतरुर्देववृक्षः, तत्तैलं पेषणतैलमित्यर्थः, घृतं आज्यं, मधु

क्षौद्रं, धात्रीरसः आमलकीसलिलं, पयो दुग्धं, एतानि सर्वाणि निर्मथ्य एकीकृत्येत्यर्थः ॥ १० ॥

मासेन कान्तिमेधे द्वाभ्यां प्रशमयति दोषनिकरं च ।
मासत्रितयेन पुनः स्यादमरवपुर्महातेजाः ॥ ११ ॥

एतदौषधभक्षणगुणं मासक्रमेणाह—मासेनेत्यादि । अस्य औषधस्य मासे[illegible] मासप्रमाणेन भक्षणात्कान्तिर्भवति मेधा चेति; द्वाभ्यां द्विमासाभ्यां [illegible] निकरं गदसमुदायं प्रशमयति शान्तिं नयति; पुनर्मासत्रितयेन [illegible] प्रमाणेन स्यात् स्वसामान्यशरीरात् अमरवपुर्देवशरीरो, महातेजा[illegible] ॥ स्यादित्यर्थः ॥ ११ ॥

सुरदारुतैलमाज्यं त्रिफलारससंयुतं च समभाग[illegible] ॥
पीतं तत्सप्ताहान्नयनविकारं शमं नयति ॥ १२ ॥

योगान्तरमाह—सुरदार्वित्यादि । सुरदारुतैलं देवदारुतैलं, आज्यं घृतं, त्रिफलारससंयुतं त्रिफलाया रसेन द्रवेण संयुतं सहितं, च पुनः समभागं तुल्यांशं, तत्पीतं सत् सप्ताहात्सप्तदिनप्रमाणतः, नयनविकारं नेत्रसंभवं रोगं, शमं नयति शान्तिं प्रापयति ॥ १२ ॥

सुरतरुतैलं सघृतं पीत्वा शाल्योदनं च सक्षीरम् ।
जीर्णाहारे भुक्त्वा हरति हि सकुष्ठान् पीनसादींश्च ॥१३॥

योगान्तरमाह—सुरतरुतैलमित्यादि । देवदारुतैलं सघृतं साज्यं, एतदुभयं पीत्वा, सक्षीरं शाल्योदनं भुक्त्वा षष्टिकोदनमित्यभिप्रायः, पुनर्जीर्णाहारे प्रतिदिनं दिनान्तर्वारद्वये वेदितव्यम् । च पुनः सकुष्ठान् कुष्ठैः सह वर्तन्ते एवंविधान् पीनसादीन् रोगान् हरति दूरीकरोति ॥ १३ ॥

घृतसहितः पित्तकृतान् तैलयुक्तो वातसंभवान् रोगान् ।
गुडसहितो मधुना वा कफजान् हन्त्यमरदारुरसः ॥ १४ ॥

योगान्तरमाह—घृतसहित इत्यादि । अमरदारुरसो देवदारुजलं, घृतसहित आज्यमिश्रितः, पित्तकृतान् रोगान् हरति नाशयति । पुनस्तैलयुतस्तैलेन मिश्रितो देवदारुरसः, वातसंभवान् रोगान् हन्ति । पुनर्गुडसहितः वा मधुना क्षौद्रेण सहितो देवदारुरसः, कफजान् रोगान् हन्तीति वाक्यार्थः ॥ १४ ॥

वर्जितकाञ्जिकशाकं पयसा शाल्योदनं च युञ्जीत ।
द्विचतुःषट्पलमानं मात्राऽधममध्यमज्येष्ठाः ॥ १५ ॥

रसायने भोज्याभोज्यमाह—वर्जितेत्यादि । वर्जितकाञ्जिकशाकं वर्जितं काञ्जिकं सौवीरं शाकं वास्तुकादि च यस्मिन् तत्तथा, पयसा क्षीरेण सह, शाल्योदनं भुञ्जीत । पुनः शाल्योदनं कियन्मानं? द्विचतुःषट्पलमानम् । अत्र मात्राऽधम-मध्यमज्येष्ठा द्विचतुःषट्पलप्रमाणा, अधममध्यमोत्तमबलेषु प्रयोज्येत्यर्थः ॥ १५ ॥

तदनु पातनशुद्धं सूतकमारोटमश्नीयात् ।
स्वेदनमूर्छोत्थापनपातनरोधाश्च नियमश्च ॥ १६ ॥

अथ रसयोगमाह—तदित्यादि । तदनु पथ्यमात्रोपयोगानन्तरं, पातनशुद्धं पातनेन शुद्धं सूतकं आरोटमेव सामान्यमेवाश्नीयात् भक्षयेत् । च पुनः स्वेदनमूर्छोत्थापनरोधाश्च स्वेदनं च मूर्छा च उत्थापनं च पातनानि च निरोधश्चेति द्वन्द्वः, एते यद्यपि सन्ति नियमश्च यद्यप्यस्ति तथाप्यारोटः पातनेन स्यादित्यर्थः ॥१६॥

अभ्रकसहितः पात्यो विधिना यावत्स्थिरो भवति ।
अथवा माक्षिकसहितः पात्यः सूतो विधानेन ॥ १७ ॥

प्रसङ्गतः पातनमाह—अभ्रकेत्यादि । सूतः अभ्रकसहितः गगनमिलितः सन् पात्यः । केन विधानेन? डमरुकयन्त्रादिना । पुनस्तावद्यावत्स्थिरो भवति । अथवा विध्यन्तरे, सूतो माक्षिकसहितः पात्यो विधानेन, अयमपि यावत्स्थिरो भवति ॥ १७ ॥

इत्यारोटः सूतो क्षेत्रीकरणे नियुज्यते प्रथमम् ।
अथवा भस्म च कृत्वा बद्धो वा कल्कयोगेन ॥ १८ ॥

रसायने सूतस्य आरोटादिविधानमाह—इतीत्यादि । आरोट इति पूर्वोक्तेन पातनकर्मणा ऊर्ध्वाधस्तिर्यग्भवेन साधित आरोटः, सः प्रथमं यथा स्यात्तथा रसायने जराव्याधिनाशने नियुज्यते इति । अथवा कल्कयोगेन रसादिसंभूतेन रसो भस्म कृत्वा द्विविधं भस्म ऊर्ध्वगं तलभस्म च; वर्णभेदेन षड्विधं श्वेतं भस्म, पीतं भस्म, हरितं भस्म, रक्तं भस्म, कृष्णं भस्म, कर्बुरं भस्म, इति षड्विधं; तत्कृत्वा क्षेत्रीकरणे नियुज्यते प्रथमम् ॥ १८ ॥

माक्षिकशिलाजतुलोहचूर्णपथ्याक्षविडङ्गघृतमधुभिः ।
संयुक्तं रसमादौ क्षेत्रीकरणाय युञ्जीत ॥ १९ ॥

रसयोगमाह—माक्षिकेत्यादि । माक्षिकं तार्प्यं, शिलाजतु प्रसिद्धं, लोहचूर्णं मारितमुण्डस्य रजः, पथ्या हरीतकी, अक्षो बिभीतकः, विडङ्गं कृमिघ्नं, घृतमाज्यं, मधु क्षौद्रं, एतैः संप्रयुक्तं रसं क्षेत्रीकरणाय प्रयुञ्जीतेति वाक्यार्थः ॥ १९ ॥

इत्थं श्लक्ष्णं कृत्वा विविधकान्तलोहचूर्णसमम्।
लोहघनं च तदेवं भृङ्गेण च साधयेद्बहुशः ॥ २९ ॥

इत्थमित्यादि। इत्थममुना प्रकारेण, श्लक्ष्णं अञ्जनसन्निभं यथा स्यात्तथा घनसत्वकान्तं कृत्वा; पुनर्लोहघनं लोहं मुण्डादि, घनं अभ्रसत्वं, एतदुभयं, विविधकान्तलोहचूर्णसमं विविधा नानाजातयः अयस्कान्तभेदाः तेषां कर्णं तत्समं कृत्वा, भृङ्गेण च बहुशोऽनेकवारं साधयेद्भावयेदित्यर्थः ॥ २९ ॥

त्रिफलाघृतमधुमिश्रितममृतमिदं मासस्थितं धान्ये बहुशः।
शस्त्रकटोरिकसंपुटमध्यगतं पूजितं मन्त्रैः ॥ ३० ॥ ॥२१॥

तच्चाह—त्रिफलेत्यादि। तद्भृङ्गराजेन बहुशो भावितं घनसत्वघनं वा, बन्मृतं सुधासमं न मृतममृतं, तत् त्रिफलामधुघृतमिश्रितं हरीतकीतकामलकघृतक्षौद्रमिलितं, धान्ये कस्यचिदन्नस्यान्तः, मासस्थितं कुर्यात् मासैकपरिमाणं तत्र विधातव्यमिति व्यक्तिः। किंविशिष्टं? मन्त्रैश्च संपूजितम्। तथा मन्त्रस्तु—"मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखराय। दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय" इत्यादिभिः ॥ ३० ॥

मासेन तु तदुद्धृत्य ज्ञात्वा बलं तत्प्रयुञ्जीत।
कान्तं विनाऽथ गगनं गगनं विना तथा च कान्तम् ॥३१॥

तच्चाह—मासेनेत्यादि। धान्यान्मासेन मासैकपरिमाणेनोद्धृत्य वहिर्नीत्वा, पुनरपि बलं ज्ञात्वा, प्रयुञ्जीत भोक्त्रे दद्यात्, अथ विशेषं दर्शयति—कान्तं विना अभ्रकसत्वमेव कृत्वा प्रयुञ्जीत, च पुनर्गगनं विना कान्तं केवलं पूर्वविधानेन साधयित्वा प्रयुञ्जीतेत्यर्थः ॥ ३१ ॥

स्थौल्यं पटलं काचं तिमिरार्बुदकर्णनादशूलानि।
हन्त्यर्शांसि भगन्दरमेहप्लीहादि पालित्यम् ॥ ३२ ॥

फलमाह—स्थौल्यमित्यादि। स्थौल्यमिति मेदोरोगः, पटलकाचतिमिराणि नेत्ररोगाः, अर्बुदं ग्रन्थिविशेषः, कर्णनादः प्रतीतः, शूलमष्टविधं, एतानि हन्ति, अर्शांसि गुदजानि, भगन्दरमेहप्लीहादि भगन्दरः गुदव्रणं, मेहः प्रमेहः बीजविकारः, प्लीहा प्लीहरोगः, एते रोगा आदिर्यस्य तत् हन्ति, पालित्यं जरां च नाशयतीत्यर्थः ॥ ३२ ॥

एतत्कुर्वन् मतिमान् गोरसमस्तुप्रधानमश्नीयात्।
जाङ्गलमुद्गाज्यपयः शाल्योदनं ब्रह्मचर्येण ॥ ३३ ॥

पथ्यमाह—एतदित्यादि । एतन्निष्पन्नौषधभक्षणं कुर्वन्, मतिमान् पुरुषः गोरसमस्तुप्रधानं गोरसो गोदुग्धं, मस्तु दधिमस्तु, एवंप्रधानमन्नमश्नीयात् भुञ्जीत । पुनर्जाङ्गलमुद्गाज्यपयोऽश्नीयात् जाङ्गलस्येदं जाङ्गलं, स्वल्पाम्बुशाखीदेशः जाङ्गलः, मुद्गः प्रतीतोऽन्नविशेषः, आज्यं घृतं, पयो दुग्धं वा सलिलं, यन्मुद्गाज्यपयः तच्चाश्नीयात् । च पुनः शाल्योदनमश्नीयात् । एतत्सर्वं ब्रह्मचर्येण कर्तव्यमित्यर्थः । इति सत्वाभ्रक्रिया ॥ ३३ ॥

घनसत्वपादजीर्णः कान्तजीर्णो यत्तीक्ष्णसमजीर्णः ।
क्षेत्रीकरणो परमः प्रयुज्यतेऽपि पुनराखोटः ॥ ३४ ॥

अथ जीर्णरसस्याधिक्यं दर्शयन्नाह—घनेत्यादि । घनसत्वं पादप्रमाणं जीर्णं यस्मिन् सः । कान्तजीर्ण इति पादप्रमाणकान्तजीर्ण इत्यर्थः । पुनस्तीक्ष्णं समं जीर्णं यस्मिन्नेवंविधो रसः । क्षेत्रीकरणं प्रधानं सर्वत्रेत्यर्थः "बद्धो यः खोटतां यातो ध्मातो ध्मातः क्षयं व्रजेत् । खोटो बन्धः स विज्ञेयः शीघ्रं सर्वगदापहः" इति ग्रन्थान्तरे ॥ ३४ ॥

घनसत्वकान्तसूतं मृतहेम शतावरीरसोपेतम् ।
घृतमधुलीढं वर्षान्निहन्ति मृत्युं जरां चैव ॥ ३५ ॥

घनसत्वमभ्रसारः, कान्तं चुम्बकोत्थं, सूतो रसः, एकवद्भावो द्वन्द्वसमासात्; तथा मृतं हेम पञ्चत्वमाप्तं कनकं च, एतच्चतुष्कं शतावरीरसोपेतं शतमूलीद्रवभावितं, पुनर्घृतमधुलीढं घृतमधुभ्यां लीढं आस्वादितं सत्, वर्षाद्वर्षपरिमाणात्, मृत्युं व्याधिं जरां च हन्ति नाशयतीत्यर्थः ॥ ३५ ॥

एषामेकं योगं क्षेत्रीकरणार्थमादितः कृत्वा ।
संवत्सरमयनं वा निःश्रेयससिद्धये योज्यम् ॥ ३६ ॥

विशेषमाह—एषामित्यादि । एषां पूर्वोक्तानां योगानां मध्ये, आदित आरम्भतः, एकं योगं कृत्वा, निःश्रेयसो मोक्षः तत्सिद्धये निष्पत्तये, संवत्सरं वर्षपरिमाणं, अयनं षण्मासपर्यन्तं, योज्यं 'भोक्तृषु' इति शेषः । 'मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्' इत्यमरः ॥ ३६ ॥

अभ्रकसस्यमाक्षिकरसकदरदविमलवज्रगिरिजतुभिः ।
वैक्रान्तकान्ततीक्ष्णैर्हाटकताराररताम्रैश्च ॥ ३७ ॥
संयुक्तैर्व्यस्तैर्वा द्वित्रिचतुर्भिर्यथालाभम् ।
जीर्णहतो रसेन्द्रो रसायने शस्यते सद्भिः ॥ ३८ ॥

बहून्निर्दिशन्विशेषमाह—अभ्रकेत्यादि । अभ्रकः प्रसिद्धः सस्यकश्चपलः

माक्षिकं तार्प्यं, रसकं खर्परं, दरदं हिङ्गुलं, विमलं सितमाक्षिकं, वज्रकं हीरकं, गिरिजतु शिलाजतु, एतैः। पुनर्वैक्रान्तेत्यादि वैक्रान्तं वज्रभूमिजं रजः, कान्तं लोहजाति, तीक्ष्णं सारः, एतैश्च। हाटकताराारताम्रैश्च हाटकं हेम, तारं रूप्यं, आरं राजरीतिः, ताम्रं शुल्बं, एतैश्च; एतैरुद्दिष्टैः अभ्रकादिताम्रान्तैः, समस्तैरेकत्रीकृतैः, व्यस्तैर्वा पृथक्कृतैर्वा, यथालाभं लाभमनतिक्रम्य भवतीति यथालाभं, द्वित्रिचतुर्भिर्वा अभ्राद्यैर्जीर्णहतो रसेन्द्रो जीर्णाभ्रादीनां हतिर्यस्मिन् स तथोक्तः, रसायने जराव्याधिविनाशने, रसशास्त्रमर्मज्ञैः, शस्यते अभ्रादयः प्रशस्ता उक्ता इत्यर्थः। युग्मम्। "वज्रादिभिर्हतः सूतो हतसूतसमोऽपरः। शृङ्खलाबद्धनामा स्याद्देहलोहविधायकः॥ अस्य प्रभावाद्वेगेन व्याप्तिर्भवति निश्चितम्" इति ग्रन्थान्तरे॥ ३७-३८॥

विषनागवङ्गबद्धो भुक्तो हि रसः करोति कुष्ठादीन्।
उपरसबद्धे तु रसे स्फुटन्ति भुक्ते तथाङ्गानि॥ ३९॥

कुत्सितविधानं दर्शयन्नाह—विषेत्यादि। विषनागवङ्गबद्धो रसः विषं सक्तुकादिकं, नागः सीसकः, वङ्गं त्रपु, एतैर्बद्धो बन्धनमाप्तः, स भुक्तः सन्, हि निश्चितं, कुष्ठादीन् कुष्ठज्वरक्षयादीन्। उपरसबद्धे रसे उपरसैर्गन्धादिभिः अष्टभिः बद्धो बन्धनमापन्नो योऽसौ रसः तस्मिन्, भुक्ते सति भोक्तुरङ्गानि हस्तपादादीनि स्फुटन्ति॥ ३९॥

घनसत्वकान्तकाञ्चीभास्करतीक्ष्णैश्च चीर्णजीर्णस्य।
सूतस्य गुञ्जमात्रा माषकमेकं परा मात्रा॥ ४०॥

जीर्णरसस्य मात्रामाह—घनेत्यादि। एतैश्चीर्णजीर्णं पूर्वं चीर्णं कवलितं पश्चाज्जीर्णं जारणमापन्नं तस्य सूतस्य गुञ्जा मात्रा भक्षणाय, गुञ्जा यथा,—"षट्सर्षपैर्यवस्त्वेको गुञ्जैका तु यवैस्त्रिभिः" इति। परा अन्या मात्रा अन्यजीर्णसूतस्य मात्रा माषमेकं; माषको यथा,—"गुञ्जाभिर्दशभिः प्रोक्तो माषको ब्रह्मणा पुरा—" इति। एतैः कैः? घनसत्त्वकान्तकाञ्चीभास्करतीक्ष्णैः अभ्रकसत्वचुम्बकताप्यताम्रसारैरिति॥ ४०॥

शतवेधिनो हि गुञ्जा तथा सहस्रैकवेधिनो गुञ्जा।
अर्धा च लक्षवेधिनः सिद्धार्थः कोटिवेधिनः सूतात्॥ ४१॥

अथ वेधविशेषेण परिमाणमाह—शतेत्यादि। शतवेधिनः सूतस्य गुञ्जाप्रमाणा मात्रा ज्ञेया; तथा तेन प्रकारेण सहस्रैकवेधिनः सूतस्यापि गुञ्जामानमेव, लक्षवेधिनः सूतात् अर्धा रक्तिका, पुनः कोटिवेधिनः सूतात् सिद्धार्थः सर्षप

माना । शतांशेन वेधो विद्यते यस्मिन् स शतवेधी, तस्य शतवेधिनः । एवं सर्वत्र ज्ञेयम् ॥ ४१ ॥

हेमनियोजितसूतं कान्तमणिं विविधगुटिकाश्च ।
जपहोमदेवतार्चननिरतः पुमानिति धारयेत् ॥ ४२ ॥

जपः अघोरादिजपः, होमस्तद्दशांशेन हवनं, देवतार्चनं देवतानां गणेशविष्णुरविशिवचण्डीनां अर्चनं, एतेषु निरतो सक्तः, एवंविधिः पुमान् । इति किं ? हेमनियोजितसूतं धारयेत् हेम्ना सह नियोजितो मिश्रितो यः सूतः तं; कान्तमणिः कान्तश्चासौ मणिश्च, वा कान्तमणिः कान्तसंज्ञको मणिः, च पुनः विविधगुटिकाः विविधाश्च ता गुटिकाश्चेति ॥ ४२ ॥

शालेस्तु पिष्टकोद्भवभोजनमाज्यं च मुद्गमांसरसैः ।
यवगोधूमान्नानि च गोक्षीरं मस्तु च विशेषात् ॥ ४३ ॥

अथ पथ्यानाह—शालेरित्यादि । शालेः षष्टिकादेः, पिष्टकोद्भवभोजनं पिष्टकोत्पन्नं च तद्भोजनं चेति । आज्यं घृतम् । कैः सह ? मुद्गमांसरसैः सह मुद्गाः प्रतीताः, अत्र विशेषात् मांसानि भोज्यानि, गोक्षीरं च भोज्यं, पुनर्मस्तु गोरससंभवं विशेषात् भोज्यम् ॥ ४३ ॥

पाने जलमक्षारं मधुराणि यानि कानि शस्तानि ।
पेयं चतुर्जातककर्पूरामोदमुदितमुखम् ॥ ४४ ॥

पाने अक्षारं जलं मिष्टजलं प्रयोज्यं; पुनः यानि कानि सिष्टानि द्रव्याणि अत्रानुक्ततमानि, प्रशस्तानि श्रेष्ठानि; पुनः चतुर्जातककर्पूरामोदमुदितमुखं यथास्यात्तथा द्रव्यं पेयं पातव्यं; चतुर्जातकं त्वक्पत्रैलानागकेसरं, कर्पूरं घनसारं, एषामामोदेन परिमलेन मुदितं यन्मुखं वासितमुखमित्यर्थः । "युवत्या जल्पनं कार्यं युवत्या चाङ्गमर्दनम् ॥ तस्याः स्पर्शनमात्रेण देहे क्रमति सूतकः"—इति विशेषो ग्रन्थान्तरात् ॥ ४४ ॥

मद्यारनालपानं तैलं दधि वा रसे नेष्टम् ।
कटुतैलेनाभ्यङ्गं वपुषि न कुर्याद्रसायने मतिमान् ॥ ४५ ॥

अपथ्यान्याह—मद्येत्यादि । मद्यारनालेत्यादि मद्यं सुरा, आरनालं काञ्जिकं, तयोः पानं; नेष्टं न प्रशस्तं; वा तैलं दधि च नेष्टं तैलं तिलोद्भवं, दधि दुग्धविकारः, एतयोरपि पानं न प्रशस्तं; कटुतैलेन सर्षपतैलेन वपुषि अभ्यङ्गं मर्दनं न कुर्यात् । मतिमान् रसायने अधिकरणे इत्यर्थः ॥ ४५ ॥

दग्धमपक्कममधुरमुष्णं क्षीरं न नष्टमासं तु ।
पर्युषितं फलमूलं भक्ष्यं नैवात्र निर्दिष्टम् ॥ ४६ ॥

दग्धं द्रव्यं रसायने नेष्टं, अपकं च नेष्टं, अमधुरं कटुतिक्तकषायाम्ललवणं च नेष्टं, उष्णं वह्नितप्तमिति; तु पुनः नष्टमांसं निन्दितमांसं नेष्टं, पुनः पर्युषितं संधानीकृतं एवंविधं फलमूलं फलं मूलं च, अत्र रसायने भक्ष्यं न निर्दिष्टं कथितं; "कूष्माण्डं कर्कटी चैव कलिङ्गं कारवेल्लकम् । कुसुम्भिका च कर्कोटी कदली काकमाचिका । ककाराष्टकमेतद्धि वर्जयेद्रसभक्षकः—" इति ग्रन्थान्तरे ॥ ४६ ॥

अथ लङ्घनं न कार्यं यामाधो भोजनं नैव ।
इत्यपनीय निषिद्धं रसराजे धीमता कार्यम् ॥ ४७ ॥

अस्मिन् रसायने लङ्घनं न कार्यं, पुनर्यामाधः प्रहरमध्ये भोजनं न कार्यमित्यर्थः ॥ ४७ ॥

वर्जितचिन्ताकोपः कुर्याच्च सुखाम्बुना स्नानम् ।
नोच्चाटयेद्ग्रहज्वरराक्षसभूतानि मातृदेवींश्च ॥ ४८ ॥

तच्चाह—वर्जितेत्यादि । वर्जितश्चिन्ताकोप इति चिन्ता च कोपश्चेति चिन्ताकोपौ तौ वर्जितौ येन सः, एवं विधः सन् सुखाम्बुना सुखोष्णाम्बुना, स्नानं कुर्यात् । ग्रहराक्षसभूतानि नोच्चाटयेत् ग्रहणाद्ग्रहाः पिशाचादयः, ज्वरो रोगराजः, राक्षसाः क्रव्यादाः, भूतानि देवयोनयः, एतानि नोच्चाटयेत् स्वस्थानात् न चालयेत् । पुनर्मातृदेवींश्च मातरः सप्तमातरः, देव्यो दक्षिण्यादयः, ता अपि नोच्चाटयेत् ॥ ४८ ॥

परमे ब्रह्मणि लीनः प्रशान्तचित्तः समत्वमापन्नः ।
आश्वासयन् त्रिवर्गं विजित्य रसानन्दपरितृप्तः ॥ ४९ ॥

चिन्ताकोपनिरोधे हेतुमाह—परमे इत्यादि । रसायनकर्ता परमे ब्रह्मणि चित्स्वरूपे, लीनः तन्मयतां प्राप्तो भवेत्; प्रशान्तचित्तश्च विषयेभ्यो निवृत्तमना भवेत्, समत्वमापन्नः स्वसुते शत्रौ च निर्वैरं यथा स्यात्तथा, त्रिवर्गं धर्मार्थकामरूपं विजित्य रसानन्दपरितृप्तो भवेत् हर्षपरिपूरित इत्यर्थः ॥ ५९ ॥

यस्त्यक्त्वा शास्त्रविधिं प्रवर्तते स्वेच्छया रसे मूढः ।
तस्य विरुद्धाचारादजीर्णमुत्पद्यते नितराम् ॥ ५० ॥

विधेर्नियतत्वं दर्शयन्नाह—य इत्यादि । यः पुमान् शास्त्रविधिं त्यक्त्वा, स्वेच्छया उच्छृंखलमनसा, रसे सूते, प्रवर्तते स मूढः ज्ञानशून्यः, तस्य पुंसः विरुद्धाचारात् नितरामतिशयेन अजीर्णमुत्पद्यते तद्रसाजीर्णमिति ॥ ५० ॥

संभवतीहाजीर्णे निद्राऽऽलस्यं ज्वरस्तमो दाहः ।
नाभितलशूलमल्पं जडताऽरुचिरङ्गभङ्गश्च ॥ ५१ ॥

रसाजीर्णलक्षणमाह—संभवतीत्यादि । इह रसायने अजीर्णे यदा संभवति उत्पद्यते तदा एतानि लक्षणानि स्युः । निद्रा अतिशयेन निद्रा, आलस्यं अङ्गशैथिल्यं, ज्वरः प्रसिद्धः, तमो मूर्छा, दाह ऊष्मा, पुनर्नाभितले वस्तौ अल्पमल्पं शूलं, जडताऽऽस्यस्य, अरुचिः निरभिलाषिता, भङ्गोऽङ्गस्य अङ्गमर्दनं, भोक्तुरेतानि लक्षणानि रसाजीर्णे स्युरित्यर्थः ॥ ५१ ॥

ज्ञात्वेत्येवमजीर्णमस्य प्रच्छादनाय योगोऽयम् ।
कार्यो दिवसत्रितयं संत्यज्य रसायनं सुधिया ॥ ५२ ॥

अजीर्णेऽप्युपायमाह—ज्ञात्वेत्यादि । इत्येवमुक्तप्रकारेण निद्रादिलक्षणेनाजीर्णं ज्ञात्वा धीमता पुंसा अस्याजीर्णस्य प्रच्छादनाय विनाशाय रसायनं संत्यज्य दिवसत्रितयं योगः कार्यः ॥ ५२ ॥

कर्कोटीमूलरसं कषायमथ सिन्धुना पिबेत्त्रिदिनम् ।
सौवर्चलसहितं वा गोजलसहितं रसाजीर्णे ॥ ५३ ॥

तच्चाह—कर्कोटीत्यादि । कर्कोटीमूलरसं कर्कोटी या वल्ली तस्याः मूलरसं त्रिदिनं पिबेत् वाऽथ कषायं; कथं ? सिन्धुना सैन्धवेन सहितं पिबेत्, वा तत्क्वाथं गोजलसहितं गोमूत्रमिलितं रसाजीर्णे पिबेत्; सौवर्चलसहितमिति सौवर्चलस्य प्रतिवापं कर्कोटीरसे निक्षिप्य पिबेत्; त्रिदिनं सर्वत्रेत्यर्थः ॥ ५३ ॥

पिष्ट्वाऽथ मातुलुङ्गीं पिबति रसं शुण्ठिसैन्धवं प्रातः ।
क्वथितं गोसलिलेन तु रक्षति सम्यक् रसाजीर्णम् ॥ ५४ ॥

अन्यच्चाह—पिष्ट्वेत्यादि । मातुलुङ्गस्येयं जटा मातुलुङ्गी तां पिष्ट्वा तस्या रसं शुण्ठी सैन्धवं च यः पुमान् प्रातः पिबति, तु पुनः क्वथितं तस्याः कषायं गोसलिलेन यः पिबति रसाजीर्णे, तं पुरुषं रक्षति न विनाशयतीत्यर्थः ॥ ५४ ॥

कथमपि यच्चाज्ञानात् नागादिकलङ्कितो रसो भुक्तः ।
तन्नोदनाय च पिबेत् गोजलकटुकारवल्लिशिफाः ॥ ५५ ॥

नागादियुक्तरसभुक्तोपायमाह—कथमपीत्यादि । च पुनः, यत् यस्मात्, नागादिकलङ्कितो रसः नागवङ्गसहितो रसोऽज्ञानात्कथमपि भुक्तः, तन्नोदनाय तस्य नागवङ्गाङ्कितरसस्य नोदनाय गोजलकटुकारवल्लिशिफाः गोजलं गोमूत्रं, कटु तिक्ता, कारवल्लीशिफा कारवल्लीलतायाः शिफा जटा, एतदौषधं पिबेत्, तेन नागवङ्गादिदोषो विनश्यति ॥ ५५ ॥

शरपुङ्खासुरदालीपटोलबिम्बीश्च काकमाची च ।
एकतमा चेदुदिता शृतामजीर्णे हि सेवेत ॥ ५६ ॥

तच्चाह—शरपुङ्खेत्यादि । आसां औषधीनां मध्ये एकतमा या उदिता कथिता, शृता क्वथिता तां, हि निश्चितं, अजीर्णे सेवेत, तेन अजीर्णं नश्यतीति भावः । ताः का औषध्यः ? शरपुङ्खा प्रसिद्धा, सुरदाली देवदाली, पटोलं प्रतीतं नाम, बिम्बी गोला, काकमाची प्रसिद्धा, एता इत्यर्थः ॥ ५६ ॥

अत्यम्ललवणकटुकै रससंस्रावो जरो भवति ।
अतिमधुरैश्च विनश्यति जठरवह्निः सततभुक्तैश्च ॥ ५७ ॥

तच्चाह—अत्यम्लेत्यादि । अत्यम्लं चुक्रादि, अतिलवणं क्षारादि, अतिकटुकं निम्बकटुकीत्यादि, एतैः रससंस्रावो जरो जीर्णकरो भवति, जरतीति जरः । पुनरपि मधुरैः इक्षुरसादिभिः सततभुक्तैः जठरवह्निः कोष्ठाग्निः विनश्यति अन्याश्रयो विनश्यतीत्यभिप्रायः ॥ ५७ ॥

यः पुनरेवं सततं करोति मूढः समाहारम् ।
तस्य विनश्यत्यग्निर्न खलु क्रामति रसो भवेद्व्याधिः ॥५८॥

तद्विशेषमाह—य इत्यादि । यः पुनर्मूढो मूर्खः, अजीर्णानन्तरं अत्यम्ललवणकटुकाहारं सततं निरन्तरं करोति, तस्याग्निः कोष्ठाग्निर्विनश्यति, रसश्च न क्रामति स्वगुणान्न प्रकाशयति । तर्हि किं भवेदित्याह-व्याधिर्भवेदित्यर्थः ॥ ५८ ॥

यस्तु महाग्निसहत्वाद्रसाच्छतसहस्रलक्षवेधीशः ।
अनया क्रियया सिद्ध्यति स यत्नाद्रसक्रियायोगात् ॥५९॥

रसाच्छतसहस्रलक्षवेधी भवेत् स यत्नात् अनया पूर्वोक्तक्रियया सिद्ध्यति॥५९॥

शतसहस्रलक्षवेधी कोटिरथार्बुदनिर्बुदं वापि ।
पिष्टं भुञ्जीत रसं बलिसहितं सिद्धिदो भवति ॥ ६० ॥

अथोत्तरविधानेन लक्षणमाह—शतेत्यादि । शतसहस्रलक्षवेधी रसः । बलिसहितं पिष्टं रसं भुञ्जीत, बलिना गन्धकेन सहितम् । शतादारभ्य सहस्रलक्षकोट्यर्बुदनिर्बुदानां क्रमेण दशगुणोत्तरं संख्या ज्ञातव्या । एवं कृतः सन् रसः सिद्धिदो यथोक्तगुणकृद्भवतीत्यर्थः ॥ ६० ॥

क्रामति ततो हि सूतो जनयति पुत्रांश्च देवगर्भाभान् ।
स्त्रीषु च निश्चलकामो भवति वलीपलितनिर्मुक्तः ॥ ६१ ॥

पूर्वविधानं प्रशंसयन्नाह—क्रामतीत्यादि । ततः पूर्वविधानतः सूतः क्राम

स्वगुणान् प्रकाशयति, सूते क्रामति सति देवगर्भाभान् पुत्रान् जनयति देवगर्भवत् आभा कान्तिर्येषां ते तान्, पुनः स्त्रीषु निश्चलः सदास्थायी कामो रत्यभिलाषो वा मदनो यस्य स तथोक्तः, पुनर्वलीपलितनिर्मुक्तः वल्यश्च पलितानि च तैर्निर्मुक्तो विवर्जितः, 'वलिश्चर्म जराकृतं' इत्यमरः, पलितं केशश्वेतत्वं, एवंविधो भवति 'पुमान्' इति शेषः ॥ ६१ ॥

बुद्धिर्बलं प्रभावः सह चायुषा वर्धते रसायनिनः ।
प्राप्तस्य दिव्यबुद्धिं दिव्याश्च गुणाः प्रवर्धन्ते ॥ ६२ ॥

पुनः किं स्यादित्याह—बुद्धिरित्यादि । रसायनिनः रसायनं प्राप्तस्य हि पुंसः, बुद्धिर्वर्धते, बलं च वर्धते, केन सह ? आयुषा जीवितकालेन सह, पुनर्दिव्यबुद्धिं प्राप्तस्य रसायनिनः दिव्याः प्रकरणाद्गुणा मेधादयः प्रवर्धन्ते प्रकाशन्त इत्यर्थः ॥ ६२ ॥

एवं रससंसिद्धो दुःखजरामरणवर्जितो गुणवान् ।
खेगमनेन च नित्यं संचरते सकलभुवनेषु ॥ ६३ ॥

तच्चाह—एवमित्यादि । एवममुना प्रकारेण, रससंसिद्धः पुरुषः रसः पारदः संसिद्धः सम्यक् सिद्धो यस्य वा रसेन संसिद्धः, जरामरणवर्जितो भवति वृद्धत्वव्याधिरहित इत्यर्थः । गुणवांश्च भवति गुणा मेधादयः । पुनः खेगमनेन आकाशगमनेन नित्यं सकलभुवनेषु समस्तलोकेषु संचरते इत्यर्थः ॥ ६३ ॥

दाता भुवनत्रितये स्रष्टा सोऽपीह पद्मयोनिरिव ।
भर्ता विष्णुरिव स्यात्संहर्त्ता रुद्रवद्भवति ॥ ६४ ॥

दाता भुवनत्रितये स्वर्गमृत्युपाताले भवति सर्वाधिक इत्यभिप्रायः । सोऽपि पुमान् इह भुवनत्रितये स्वर्गमृत्युपाताले स्रष्टा सर्जको भवति । क इव ? पद्मयोनिरिव ब्रह्मेव । पुनः भर्ता पालनार्थं त्रिकस्य विष्णुरिव च भवति । पुनः संहर्ता रुद्रवत् भवति, सृष्टिस्थितिविनाशेषु ब्रह्मादीनां त्रयीव स्यादित्यर्थः ॥ ६४ ॥

इदानीं गुटिका वक्ष्ये ।

कान्ताभ्रसत्त्वहेमतारं चार्कः समांशतः संख्या ।
बद्धं सूतसमांशं ध्मातं गोलं कृतं खोटम् ॥ ६५ ॥
बाह्ये रसेन लिप्तं वदनगतं शस्त्रवारकं रोगान् ।
हन्ति हि शरीरसंस्थान् नाम्नाऽमरसुन्दरीगुटिका ॥ ६६ ॥

युग्मम् ।

अमरसुन्दरीगुटिकाविधानं गुणांश्चाह—कान्तेत्यादि । कान्तं चुम्बकं, अभ्रं

अभ्रकसत्त्वं प्रतीतं, हेम कनकं तारं च तत्, एकत्वद्रावो द्वन्द्वत्वात्, पुनरर्कः ताम्रं, एषां कान्तादीनां संख्या गणना समांशतः समभागतो ज्ञेया । पुनः सूतसमांशं पारदेन तुल्यभागं ध्मातं कुर्यात्, 'अन्धमूषायां' इति शेषः। किंकृतं सत्? बाह्ये बद्धगोलोपरि रसेन मारणायामुक्तद्रवेण लिप्तं सत् ध्मातं कुर्यात् । इत्थं कृतं खोटं पिष्टिस्तम्भः गोलाकारं भवति । तत् वदनगतं मुखान्तःस्थितं, शस्त्रवारकं स्यात् अस्मिंश्च वदनं गते सति शरीरे खड्गादीनां प्रहारो न लगति। गुटिरियं नाम्ना अभिधानेन अमरसुन्दरीगुटिका ज्ञेया । इयं शरीरस्था मुखे अन्यस्थले वा स्थिता सती शरीरस्थान् रोगान् हन्ति विनाशयति । अनुक्तमपि मानं पञ्चनिष्कप्रमाणं ज्ञेयमित्यर्थः । इत्यमरसुन्दरी गुटिका । "हेम्ना वा रजतेन वापि सहितो ध्मातो व्रजत्येकतामक्षीणो निविडो गुडश्च गुटिकाः करोति दीर्घोज्ज्वलाः । चूर्णं तत्पटुवत्प्रयाति विहितं घृष्टो न मुञ्चेन्मलं निर्गन्धो द्रवति क्षणात्स हि मतो बद्धाभिधानो रसः–" इति ग्रन्थान्तरे ॥ ६५ ॥ ६६ ॥

यः पूर्वोक्तः सूतो लक्षादूर्ध्वं च वेधते लोहान् ।
बद्धे सारणयोगैर्मुखस्थे च जारयेद्रत्नम् ॥ ६७ ॥
युक्तः समांशनागैः सुरलोहायस्कान्तताप्यसत्त्वैश्च ।
अभ्रकसत्त्वसमेता गुटिका मृतसंजीवनी नाम ॥ ६८ ॥
हेमयुता गुलुच्छके मुकुटे वा कण्ठसूत्रकर्णे वा ।
मृत्युभयशोकरोगविषशस्त्रजरासततदुःखसंघातम् ॥ ६९ ॥
यस्याङ्के निहितेयं गुटिका मृतजीवनी नाम ।
सोऽसुरयक्षकिन्नरपूज्यतमः सिद्धयोगीन्द्रैः ॥ ७० ॥
प्रक्षाल्य तोयमध्ये गुटिका घटिकाद्वयं ततः क्षिप्त्वा ।
तच्चेयं वदनगता मृतकस्योत्थापनं कुरुते ॥ ७१ ॥
तोयं तदेव पिबति स्वस्थं पथ्यान्वितस्ततः पुरुषः ।
लभते दिव्यं स वपुर्मृत्युजरावर्जितः सुदृढम् ॥ ७२ ॥

मृतसंजीवनीगुटिकाविधानं गुणांश्चाह–य इत्यादि । यः पूर्वोक्तो सूतो लक्षादूर्ध्वं कोट्यर्बुदादि, लोहान् रूप्यादीन् वेधते तस्मिन्बद्धे सूते, मुखस्थे प्रकाशमुखयन्त्रे स्थापिते, सारणयोगैः सारणतैलादिभिः, रत्नं वज्रादिकं, जारयेत् । पुनः समांशनागैस्तुल्यांशसीसकैः सूतो युक्तः कार्यः, सुरलोहायस्कान्तताप्यसत्त्वैश्च युक्तः कार्यः सुरलोहं कनकं, अयस्कान्तः कान्तलोहं, ताप्यसत्त्वं माक्षिकसारं, एतैः अभ्रकसत्त्वसमेता सती मृतसंजीवनी नाम गुटिका भवति । पुनस्त-

मूषायामियं हेमयुता कार्या । पुनरियं गुटिका नित्यं यस्य गुलुच्छके निहिता भवति, वा मुकुटे किरीटे वा कण्ठसूत्रकर्णे कण्ठसूत्रं च कर्णश्च कण्ठसूत्रकर्णं तस्मिन्, वा अङ्गे हस्तपादादौ, तस्य मृत्युभयशोकरोगशस्त्रजरासततदुःखसंघातं 'नश्यति' इत्यध्याहारः । एतेषु स्थानेषु यस्येयं निहिता स्थापिता भवति स असुरयक्षकिन्नरपूज्यतमः असुरा दैत्याः, यक्षा देवयोनयः, किन्नराः तुरङ्गवक्त्राः, तेषां पूज्यतमो भवति अतिशयेन पूज्यः पूज्यतमः । सिद्धयोगीन्द्रैः पूज्यतमः सिद्धा देवविशेषाः, योगीन्द्राः नागार्जुनादयः । ततोनन्तरं मृतजीवनी जलमध्ये क्षिप्त्वा प्रक्षाल्य वटिकाद्वयं वदनगता सती मृतकस्य पुरुषस्योत्थापनं प्रबोधनं कुरुते, यः पुमान् पुरुषः तदेव तोयं गुटिकाक्षालनं, स्वच्छं निर्मलं, पिबति, किंविशिष्टः ? पथ्यान्वितो हितावहद्रव्यभक्षणयुक्तः, स पुरुषो दिव्यं वपुः देवशरीरं लभते, किं विशिष्टं दिव्यं पुनः ? मृत्युजरावर्जितं व्याधिपालित्यरहितं; पुनः सुदृढं वज्रवत् । गुटिकापरिमाणं पाकविधानं च पूर्ववदित्यर्थः ॥ ६७ ॥ ६८ ॥ ६९ ॥ ॥ ७० ॥ ७१ ॥ ७२ ॥　इति मृतजीवनीगुटिका ।

कान्तघनसत्त्वकमलं हेम च तारं यथा कृतद्वन्द्वम् ।
समजीर्णं बीजवरं वज्रयुतं वज्रिणी गुटिका ॥ ७३ ॥
एषा मुखकुहरगता कुरुते नवनागतुल्यबलम् ।
तद्वपुरपि दुर्भेद्यं मृत्युजरारोगनिर्मुक्तम् ॥ ७४ ॥

वज्रिणीगुटिकाविधानं गुणांश्चाह—कान्तेत्यादि । कान्तं च घनं च अनयोः सत्त्वं कान्तघनसत्त्वं; कान्तसत्त्वं चुम्बकसत्त्वं, घनसत्त्वं अभ्रकसारं, कमलं चेति कमलं ताम्रं, च पुनर्हेम स्वर्णं, तारं च रूप्यं, पूर्ववत् यथा येन विधानेन कृतद्वन्द्वं कृतं च तत् द्वन्द्वं चेति बीजवरं समजीर्णं कार्यं; किंविशिष्टं बीजवरं ? वज्रयुतं हीरकयुतम् । इयं गुटिका नामतो वज्रिणी; पुनरेषा वज्रिणीगुटिका मुखकुहरगता सती मुखान्तः प्राप्ता सती नवनागतुल्यबलं नवसंख्याका नागाः हस्तिनस्तैस्तुल्यं तत्समं यद्बलं तत्कुरुते; तद्वपुस्तस्य मुखे गुटिकाधारिणो वपुः शरीरं दुर्भेद्यं दुःखेन भेत्तुं शक्यं, पुनर्मृत्युजराव्याधिभिर्निर्मुक्तमित्यर्थः ॥ ७३ ॥ ७४ ॥ इति वज्रिणी गुटिका ।

धूमावलोकितरसे पञ्चमहारत्नजारिते सरिते ।
बीजेन गगनसत्त्वे माक्षिककान्तप्रयुक्तेन ॥ ७५ ॥
खेचरसंज्ञा गुटिका पतति मुखे क्षिप्तमात्रेण ।
देवासुरसिद्धगणैः पूज्यतमो भवति चेन्द्राद्यैः ॥ ७६ ॥

खेचरीगुटिकाविधानं गुणांश्चाह—धूमेत्यादि । धूमावलोकिते धूमवेधिनि, रसे सूते, पञ्चमहारत्नजारिते पञ्चसंख्याकैर्महारत्नैर्वज्रादिभिः तथाच 'वज्रं च मौक्तिकं चैव माणिक्यं नीलमेव च । मरकतं च विज्ञेयं महारत्नानि पञ्चधा' इति । पुनर्माक्षिककान्तप्रयुक्तेन ताप्यचुम्बकमिलितेन बीजेन रसे गगनसत्त्वे सारिते सति खेचरसंज्ञा गुटिका भवति । तस्मिन् गुटिकारूपे रसे क्षिप्तमात्रेण मुखे पतति सति इन्द्राद्यैः देवासुरसिद्धगणैश्च पूज्यतमो भवति इन्द्रो मघवा आद्यो येषां ते तैः । देवा अमराः, असुराः दैत्याः, सिद्धा देवविशेषाः; तेषां ये गणाः समूहाः तैः कृत्वा, अतिशयेन पूज्यो भवतीत्यर्थः ॥ ७५ ॥ ७६ ॥ इति खेचरसंज्ञागुटिका ।

रसवादोऽनन्तगुणो द्रवगोलककल्कभेदेन ।
कलितः प्रधानसिद्धैर्यैर्दृष्टस्ते जयन्ति नराः ॥ ७७ ॥

रसवादस्यानन्तत्वं सूचयन्नाह—रसेत्यादि । रसवादः अनन्तगुणः अनन्ता गुणा यस्य स तथोक्तः । अनन्ता अपरिमिताः । केन कृत्वा रसवादोऽनन्तः द्रवगोलककल्कानां प्रत्येकमनन्तत्वात् रसवादोऽप्यनन्तः । किंभूतः ? प्रधानसिद्धैः नित्यनाथादिभिः कलितः रचितः । यैर्महद्भिः सिद्धैः रसवादो दृष्टस्ते नरा जयन्ति सर्वोत्कर्षेण वर्तन्ते ॥ ७७ ॥

शीतांशुवंशसंभवहैहयकुलजन्मजनितगुणमहिमा ।
स जयति श्रीमदनश्च किरातनाथो रसाचार्यः ॥ ७८ ॥

अथ ग्रन्थकारयितुर्वंशवर्णनमाह—शीतांशुवंशेत्यादि । श्रीमदनो मदनाभिधो राजा जयति सर्वोत्कर्षेण वर्तते । किंविशिष्टः ? किरातनाथः किराताः भिल्लास्तेषां स्वामी । पुनः किंविशिष्टः ? शीतांशुवंशसंभवहैहयकुलजन्मजनितगुणमहिमा शीतांशुवंशे चन्द्रवंशे संभव उत्पत्तिर्यस्य तत्, एवंविधं यत् हैहयकुलं तत्र कुले जन्मना उद्भवेन जनितो गुणानां महिमा येन स तथोक्तः । पुनः किंविशिष्टो मदनः ? रसाचार्यः रसविद्याजनक इत्यर्थः ॥ ७८ ॥

यस्य स्वयमवतीर्णा रसविद्या सकलमङ्गलाधारा ।
परमश्रेयसहेतुः श्रेयः परमेष्ठिनः पूर्वम्[1] ॥ ७९ ॥

---

१ एतदनन्तरं डा. पी. सी. रायसंपादिते History of Hindu Chemistry नाम्नि पुस्तके आर्याद्वयमधिकमुपलभ्यते; यथा—

येन चतुर्वर्णम्लेच्छादिव्याधादिलब्धसत्त्वाभम् ।
दक्षिणरसा गृहीत्वा आदिवराहेणेव महाप्रलये ॥ १ ॥

अथ चास्य कारयितुर्गुणवर्णनमाह—यस्येत्यादि । यस्य कारयितुः श्रीमदन-संज्ञस्य, रसविद्या स्वयं स्वरूपत्वेनावतीर्णा प्रादुर्भूता । किंविशिष्टा रसविद्या ? सकलमङ्गलाधारा सकलानि च तानि मङ्गलानि उत्तमरूपाणि तेषामाधारः आश्रयो यस्यां सा । एषा रसविद्या शरीरं अजरामरणं अजरामरं कुरुते, शरीरं च धर्मार्थकाममोक्षाणां मूलं, अतः सकलमङ्गलाधारेति युक्तम् । पुनः रसविद्या श्रेयसे मुक्तौ परम उत्कृष्टो हेतुः कारणम् । अनयैव रसविद्यया परमेष्ठिनो ब्रह्मणः पूर्वं प्रथमं श्रेयोऽजरामरणरूपं संजातम् ॥ ७९ ॥

तस्मात्किरातनृपतेर्बहुमानमवाप्य रसकर्मनिरतः ।
रसहृदयाख्यं तन्त्रं विरचितवान् भिक्षुगोविन्दः ॥ ८० ॥

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपाद-
विरचिते रसहृदयतन्त्रे एकोनविंशतित-
मोऽवबोधः समाप्तः ।

कर्ता स्वनाममहत्वं सूचयन्नाह—तस्मादित्यादि । इदं रसतन्त्रं शास्त्रं विरचितवान् कृतवानिति भावः । किंविशिष्टं इदं तन्त्रं ? रसहृदयाख्यं; किं कृत्वा ? तस्मादित्यादि ॥ ८० ॥

इति श्रीमत्कुरलवंशपयोधिसुधाकरमिश्रमहेशात्मजचतुर्भुजविरचितायां
मुग्धावबोधिन्यां रसहृदयटीकायां रसप्रशंसात्मक
एकोनविंशतितमोऽवबोधः ॥ १९ ॥

समाप्तोऽयं ग्रन्थः ।

---

१ एतदनन्तरं History of Hindu Chemistry नाम्नि पुस्तके आर्याद्वयमधिकमुपलभ्यते, यथा—

नत्वा मङ्गलविष्णोः सुमनोविष्णोः सूतेन ग्रन्थोऽयम् ।
श्रीगोविन्देन कृतस्तथागतः श्रेयसे भूयात् ॥ १ ॥
अष्टादशसंस्कारं रसेन्द्रदेवस्य दिव्यतनु दृष्ट्वा ।
लिखितमिदं पुण्यतमं रसहृदयमवाप्यते सकलम् ॥ २ ॥
नष्टशरीरविवर्णा हीनाङ्गाः कुष्ठिनो गुणाढ्यस्य ।
अभिनवसोमेश्वरतामापुरपि पुनर्नवैरङ्गैः ॥ २ ॥

ॐ

आयुर्वेदीयग्रन्थमाला।

(दुष्प्रापप्राचीनायुर्वेदग्रन्थानां क्रमशः प्रकाशिका मासिकपत्रिका)

एषा खलु खिस्तीय १९१० वत्सरस्य नॉवेम्बरमासात् प्रतिमासं प्रसिद्ध्यति। अस्यां मासिकपत्रिकायामद्यावधि क्वाप्यमुद्रिता दुष्प्रापाश्च विविधा आयुर्वेदीयग्रन्था भूयसा यत्नेन संपाद्य, बहूनामादर्शपुस्तकानां साहाय्येन संशोध्य, पाठान्तरादिभिश्च संयोज्य प्रसिद्धिं नीयन्ते। येषां ग्रन्थानां टीकोपलभ्यते ते सटीका एव मुद्राप्यन्ते, अन्येषु च विषमपदोपरि टिप्पणं दीयते। प्रतिग्रन्थं ग्रन्थकर्तुर्जन्मदेशोत्पत्तिकालादिप्रदर्शिका भूमिका, विषयानुक्रमणिका, शुद्धिपत्रं च दीयते। मासिकेयं भारतवर्षे मुद्रणकार्यार्थे सुविख्यातिमापन्ने **निर्णयसागर**यन्त्रालये सुपुष्टचिक्कणपत्रोपरि (50 Pounds glaze paper) मुद्राप्यते। अस्यां प्रतिमासमेतस्या विज्ञापनपत्रिकाया अन्ते प्रदत्तादर्शपृष्ठद्वयरूपाण्यष्टचत्वारिंशत्पृष्ठानि (royal 12 P. 4 Forms.) दीयन्ते। पत्रिकेयं प्राचीनविविधायुर्वेदग्रन्थदिदृक्षूणां वैद्यजनानां कियदुपयोगार्हा संग्राह्या चेति अस्यां विज्ञापनपत्रिकायां तृतीयपृष्ठमारभ्य चतुर्दशपृष्ठपर्यन्तं दत्तेभ्यो भारतवर्षस्य नानास्थलनिवासिनां वैद्यमहोदयानां प्रशंसापत्रेभ्य एव विज्ञास्यन्ति विपश्चितः।

अस्या मासिकपत्रिकाया नियमाः।

१ अस्या वार्षिकमूल्यं भारतवर्षब्रह्मदेशसिंहलदेशनिवासिभिर्ग्राहकैः प्रापणभृतिसहितं रूप्यकत्रयं, अन्यदेशनिवासिभिश्च पादोनरूप्यकचतुष्टयं वर्षारम्भ एव देयं भवेत्; छात्रैस्तु यदि स्वगुरोः 'अनेनास्मत्समीपेऽधीयते' इत्येवं रूपं प्रमाणपत्रं प्रेष्येत चेत्तर्हि रूप्यकद्वयमात्रमेव देयं भवेत्।

२ आदर्शाङ्कः (नमूना–Sample copy.) कस्मैचिदपि विनामूल्यं न [illegible]यते, नच वी. पी. द्वारा। अस्या विज्ञापनपत्रिकाया अन्ते संप्रति मुद्यमाणेभ्यो

रससार-राजमार्तण्ड-गदनिग्रहेभ्यः कियदंशमुद्धृत्य आदर्शरूपं पृष्ठद्वयं दत्तं, तद्दर्शनेनैव कीदृशपत्रोपरि कथंभूतैरक्षरैरियं मुद्राप्यते इत्यादिकं सुविज्ञेयमेव। तथाऽपि येषामादर्शाङ्कदर्शनेच्छा भवेत्तैराणकचतुष्टयरूपं मूल्यं प्रथममेव पोष्टद्वारा प्रेषणीयम्। ततः प्रथमवर्षस्य प्रथममङ्कमादर्शत्वेन प्रेषयिष्यामः। अन्यः कोऽप्यङ्क आदर्शत्वेन न प्रेषयितुं शक्यते।

अस्यां पत्रिकायामद्यावधि प्रसिद्धीभूता ग्रन्थाः।

१ **रसहृदयतन्त्रम्**—श्रीमद्गोविन्दभगवत्पादाचार्यविरचितं, चतुर्भुजमिश्रविरचित**मुग्धावबोधिनी**व्याख्यासहितम्। अस्मिन् ग्रन्थे रसस्य स्वेदनमर्दनमूर्च्छनादीनामष्टादशसंस्काराणामतिविशदतया वर्णनं कृतमस्ति। रसग्रन्थेषु टीकया सह मुद्रितोऽयमाद्य एव ग्रन्थः। मूल्यमेको रूप्यकः।

२ **रसप्रकाशसुधाकरः**—श्रीयशोधरविरचितः। अस्मिन् ग्रन्थे रसस्याष्टादश संस्काराः, रसबन्धभस्मविधानं, स्वर्णादिधातुमहारसोपरसरत्नादीनां लक्षणगुणशोधनमारणादिकं, एकशतरसप्रयोगाः, यन्त्रमूषापुटादीनां लक्षणानि, वाजीकरणशुक्रस्तम्भयोगाश्चेत्यादयो रसशास्त्रप्रतिपाद्याः प्रायः सर्वेऽपि विषया अतिसरलतयोपवर्णिताः, अतोऽयं ग्रन्थोऽल्पेनायासेन रसशास्त्रतत्त्वज्ञाने भिषजामतीवोपयुक्तः। मूल्यमेको रूप्यकः।

३ **गदनिग्रहस्य प्रयोगखण्डः**। अस्मिन् खण्डे घृततैलचूर्णगुटीलेहासवाख्याः षडधिकारा विद्यन्ते। तेषु षट्स्वधिकारेषु पञ्चाशीत्यधिकपञ्चशतमिताः प्रत्यक्षफलदा नित्योपयोगिनश्च प्रयोगा उक्ताः। मूल्यं सार्धरूप्यकः।

पुस्तकत्रयमिदं सुवर्णनामाङ्कितपटबद्धं, प्रापणव्ययस्त्वेतेषां क्रेतुरेव देयो भवेत्।

पत्रिकाविषयः सर्वोऽपि व्यवहारः सुवाच्यैर्नागराक्षरैराङ्ग्लभाषया वा अधोलिखितस्थलोपरि करणीयः।

ता० १-४-१९१२

वैद्य जादवजी त्रिकमजी आचार्य
३७२, बोराबझार स्ट्रीट, फोर्ट, मुंबई.

अथ

ग्रन्थमालाया विषये विद्वद्वर्याणामभिप्रायाः।

आयुर्वेदीयचिकित्सकानां, जयपुरराजकीयसंस्कृतमहाविद्यालयस्य आयुर्वेद-परीक्षकाणां, चरकसंहितायाः स्वतन्त्रव्याख्याप्रणेतॄणां, वङ्गीयरॉयलएशियाटिक-समाजसदस्यानां, 'एम्. ए. विद्याभूषण' इत्याद्युपाधिविभूषितानां कविराजश्री-**योगीन्द्रनाथसेन**महोदयानामभिप्रायः—

दुरासदपुराणायुर्वेदग्रन्थप्रकाशने ।
महाधनानां जीर्णानां मणीनां संस्कृताविव ॥ १ ॥
आचार्योपाह्वयश्रीमद्भिषग्यादवशर्मणः ।
अतिशस्ततया भाति साधुरेष समुद्यमः ॥ २ ॥
श्रेयसा कर्मणाऽनेन केवलं भिषजां नहि ।
आर्याणामेव सर्वेषां सुकृतज्ञत्वमर्हति ॥ ३ ॥
द्वारकानाथकारुण्यादायुर्वेदविशारदः ।
सुसंस्कारेषु जीर्णानामाप्तकामो भवत्वयम् ॥ ४ ॥
प्रोत्साहनीयो विद्वद्भिः सर्वैरेष भिषग्वरः ।
इति योगीन्द्रनाथस्य भिषजः प्रार्थना सदा ॥ ५ ॥

कलिकातानगरवास्तव्यानां 'एम्. ए; एल्. एम्. एन्ड एस्; विद्यानिधि, कविभूषण' इत्युपाधिविभूषितानां कविराजश्रीयुत**गणनाथसेन**महोदया-नामभिप्रायः—

हन्त खल्वेष महानेव भाग्योदयो भिषजां यदद्य हीयमानवैद्यकज्योतिःसमु-द्दीपनाय समुदिता नवीना मासिकपत्रिका वैद्यजनकण्ठललाममालेयमायुर्वेदीय-ग्रन्थमाला नाम । सेयं वैद्यवरश्रीमदाचार्ययादव–त्र्यम्बकशर्मभिः सम्पाद्यमाना नवनवग्रन्थरत्नसमुज्वला परां श्रियं पुष्णाति । विशेषतश्चात्र रसहृदयादिकान-तिदुर्लभान् ग्रन्थान् प्रकाश्यमानानालोक्य परां कोटिमानन्दस्याध्यगमम् । यथा चास्याः संपादकप्रवरैर्बद्धपरिकरं प्रयत्यते ग्रन्थसंग्रहाय तथा चिरायुष्मत्याऽनया पत्रिकया महानेवोपकारः संपत्स्यतेऽचिरेणेति साग्रहमाशास्ते—

Calcutta,
Dt. 1-12-1910.

कलिकातावास्तव्यः
श्रीगणनाथसेनः

सुश्रुतसंहितायाः सुश्रुतार्थसंदीपनभाष्याख्यव्याख्याप्रणेतॄणां राजशाहीवास्तव्यानां कविराज**श्रीहाराणचन्द्रशर्मचक्रवर्तिना**मभिप्रायः—

श्रीश्रीशः शरणम् ।

वैद्य श्रीयादवजी त्रिविक्रमजी महोदयं प्रति यथाविहितसम्मानपुरःसरं विनिवेदयति—

तत्र भवद्भिः प्रेषितामायुर्वेदीयग्रन्थमालानाम्नीं पत्रिकामवाप्य नितरां परितुष्टोऽस्मि । भारतीयानां दौर्भाग्यवशाच्चिरन्तनैर्भिषग्भिरुपनिबद्धा बहवो ग्रन्था विलुप्तिमापुः । ये च केचन लुप्तप्राया राजपुरुषाणां प्रयत्नात् यथाकथमपि मुद्रिताः समुपलभ्यन्ते त एवेदानीं पाश्चात्यविज्ञानदृप्तेऽपि देशे भारतीयार्याणां वैद्यकविद्यायामतितरां नैपुण्यविशेषमाख्यापयन्ति । अधुनापि बहवो ग्रन्था अमुद्रिता आकरगता मणय इव न जातु जनानामुपकारायायुर्वेदस्य गौरववर्धनाय वा प्रभवन्ति । धन्योऽसि त्वं यज्जनहितेच्छया रक्षार्थं चायुर्वेदतन्त्राणाममुद्रितांस्तांस्तान् प्राचीनान् ग्रन्थान् बह्वायासेनोपसंगृह्य प्रतिमासमायुर्वेदीयग्रन्थमालायां प्रकाशयसीति । सांवत्सरिकमूल्यमप्यस्या नातिदुर्वहम् । नह्युपायान्तरेण रूप्यकत्रयव्ययात् कथमपि रसहृदयादिकास्ते ते दुर्लभा ग्रन्थाः शक्यन्ते नाम दृष्टिपथमप्यारोहयितुम् । प्रतिग्रन्थं सुयुक्तिपूर्णा भूमिका दुरुहार्थबोधिका टिप्पन्यपि वर्तत इति सानन्दमभिनन्दयामि । पत्रिकेयं सर्वथायुर्वेदानुशीलयितॄणामुपयोगिनी भविष्यतीति परमाशासे इति ।

राजशाही
६ डिसें० १९१० सः } — **श्रीहाराणचन्द्रचक्रवर्ती ।**

जयपुरराजकीयसंस्कृतमहाविद्यालये आयुर्वेदप्रधानाध्यापकानां, आयुर्वेदाचार्योपाधिभृतां राजवैद्य **पं० श्रीलक्ष्मीराम स्वामी** महोदयानामभिप्रायः—

अद्य प्रादुर्भूतमान्तरिकमानन्दं बहिः प्रकाशयन् सत्यं सन्तोषमावहामि । यतो हि बहोः कालादुपेक्षापथमारोपिते विषये साम्प्रतं समाजे लोकानां दृष्टिपातः । नैतदवधि परमोपयोगिनः खल्वायुर्वेदशास्त्रस्य पुरातनग्रन्थानां प्रकाशने समभूत्समवधानम् । परमद्य नवीनमाविष्कृतामायुर्वेदीयग्रन्थमालां पश्यन् सन्तुष्यामि हृदये । एषा हि मोहमयीनगरात् प्रचरिष्यन्ती मासिकपत्रिका । एतस्याः खलु सम्पादका मोहमयीनगरमधिवसन्त आचार्योपाह्वा यादवशर्माणः । एषा हि परमोपयोगिनः प्राचीनानायुर्वेदग्रन्थान् प्रकाशयितुमाविर्भूता । एवंविधान् ग्रन्थान् प्रकाशयन्ती सैषा कियदुपकरिष्यति लोकानामिति सर्वेऽप्यनुमिनुयुः । अस्यां हि प्रकाशयितुमभिलषितानां विरलपठनपाठनप्रचा-

राणां ग्रन्थानां परिशोधनकर्मणि बहून्यादर्शपुस्तकान्यपेक्ष्यन्त इति सम्पादकमहाशयैरवश्यमस्मिन्विषये समवधातव्यम्। सुयोग्यसम्पादकमधिगतवतीमिमामायुर्वेदविषयरसिका अवश्यमेव समाद्रियेरन्निति विश्वसिमि । चराचरगुरुः परमेश्वरः कुर्यादेनां यशस्विनीमिति निर्मायं समाशासे—

जयपुर, ता. ६।१।१९११ **श्रीलक्ष्मीरामस्वामी**

जयपुरराजकीयसंस्कृतमहाविद्यालये आयुर्वेदाध्यापकानां, तर्कोपाध्यायसाहित्यशास्त्रिणां, अखिलभारतवर्षीयसयाजीआयुर्वेदविद्यापीठस्य द्वितीयवैद्यकसंमेलनसभाधिपतीनामायुर्वेदविद्यानिधीनां व्यासोपाख्य**राजवैद्यभट्टगंगाधरशर्मणा**मभिप्रायः—

अयि सुहृद्गणा उद्घाट्यतां चक्षुर्दृश्यतामनुपमं वस्तु गृह्यतामायुर्यततां त्रिवर्गप्राप्तौ बहुकालात् प्राप्तोऽयमवसरः निष्पन्नोऽद्यैवात्मनामवितर्कितो विचारः माभवन्तु तूर्यशब्द इवार्थशून्याः । यतः शास्त्रमूलं हि ज्ञानं तन्मूला च सिद्धिः सिद्धेः फलमनामयः, तथाहि जीवानन्दनीयः श्लोकः,—

"प्राग्जन्मीयतपःफलं तनुभृतां प्राप्येत मानुष्यकं, तच्च प्राप्तवतः किमन्यदुचितं प्राप्तुं त्रिवर्गं विना । तत्प्राप्तेरपि साधनं प्रथमतो देहो रुजावर्जितस्तेनारोग्यमभीप्सितं दिशतु वो देवः पशूनां पतिः ॥" इति ।

प्रार्थनीयतमस्य नैरुज्यस्योपजीवनभूता नानाविधाः सद्यःफलप्रदा अदृष्टचरा अश्रुतचरा रसहृदयगदनिग्रहादयः प्राचीना आयुर्वेदग्रन्था यत्र मुद्राप्यन्ते। कृते प्रयत्न उपलभ्यमाना आयुर्वेदप्रकाशराजमार्तण्डपाकार्णवशालिहोत्रसमुच्चयरसकल्पलतारसावलि–रसपारिजात–रसेन्द्रचूडामणयो यन्त्रोद्धारश्च शिवकल्याणारण्यसंहिता–हितोपदेश–हिकमतप्रदीप–रोगब्बादकामरत्नानि वृक्षचिकित्सा द्रव्याभिधानं शब्दरत्नप्रदीपो निघण्टुर्माधवनिदानस्य पद्यमयी टीका टीकान्तराणीतरेषां राघवपाण्डवीयकाव्यमिव क्रोडीकृतार्थद्वयीकः श्रृङ्गारातङ्कविलास इत्यादयस्ते ते च वैद्यग्रन्था मुद्रापयितुमाशास्याः । सेयमायुर्वेदीयग्रन्थमाला केषां न प्रमोदमुद्वहेत् । शास्त्ररसिकानां भिषजामवश्यमादरणीया नेतरमासिकपत्रिकेव मूल्यभारं बिभर्तीति सहर्षमुपादेया । इमामायुर्वेदीयमासिकपत्रिकामवलोकयन्नानो बहुलमावहामि संतोषम् ।

अस्या मासिकपत्रिकाया असंभावितप्रादुर्भावायाः संपादका आचार्योपाह्वात्रिविक्रमतनुजा वैद्यप्रकाण्डा यादवशर्माणः पुरुषोत्तमाः श्लाघ्यतमाः ।

किन्त्वेतस्यां तैस्तैराचार्यप्रवरैः समूहितान्यनेकमुनिजनस्वान्तखनिजानि विविधसूत्रस्यूतानि भारतीयानां हृदयङ्गमानि प्रत्नानि योगरत्नानि स्थले स्थले तत्त्वार्थावगमकैस्तत्तदौषधीनां शक्यार्थविशेषाभिधायकैर्नैकार्थानां भेषजनाम्नां तन्त्रान्तरसंवादात् प्रकरणादिवशाच्चैकार्थे नियन्तृभिर्गूढवाक्यप्रसाधकैर्वाक्यैरनुक्ताव्यक्तलेशोक्तसंदिग्धार्थप्रकाशकैः परिभाषावाक्यैः सांप्रतिकोपयुज्यमानमानादिभिः साधनविधया च पूर्णगर्भया टिप्पण्या तथा संस्कारमर्हन्ति यथाधीयानाश्चिकित्सकानां वटवोपि पटवो भवेयुः । नहि यथायथज्ञानमन्तरा भवन्ति प्राणाभिसरा वैद्याः; अतः संपादकमहोदयैः सहायकमहाशयैरथान्यैर्वा विद्वद्वैद्यवरैः सान्द्रस्नेहैः संभ्रियमाणनानातन्त्रैः साहाय्ये समवधेयम् । यतः सतां विभूतयः परानुपकुर्वन्ति । प्राप्तश्चायुर्वेदोद्धारसमयः । चिरस्थायिनीं क्रियादेनामायुर्वेदीयग्रन्थमालामवाङ्मनसगोचरप्रभावोऽस्पष्टरूपोऽनादिमध्यनिधनः कालो· नाम भगवानित्याशीः

जयपुरम्.
ता. २–३–११. } **गङ्गाधरभट्टस्य.**

सर्वतन्त्रापरतन्त्राणां सुप्रसिद्धनामधेयानां मिथिलाभूषणानां नवानीवास्तव्यानां धर्मदत्तापरनामधेयानां **पण्डितश्रीबच्चाझा**महोदयानामभिप्रायः—

"जीवनसुखलुण्ठनैकनिरतामयदस्युप्रचयदमननिपुणभिषङ्महारथसूतस्य जराभुजगीकवलितोत्साहजनदुष्पारविविधव्याधिमकरप्रचारभीषणसंसारजलधिपारदस्य चिकित्सावधूहृदयहृद्यरसस्य रसस्य विविधप्रक्रियाप्रकाशकानि तन्त्राणि गदनिदानप्राप्त्युपशयोपशमप्रकाशभास्वदपूर्वायुर्वेदग्रन्थाश्च संशोध्य दुर्बोधस्थानव्याख्यानमपि विधाय सन्निवेश्य च मासिकपत्रे मार्मिकजनलोचनगोचरतां नयता भिषग्वरेण श्रीमता यादवशर्मणा यथायमुपकृतो भैषज्यतत्त्वविविदिषुर्जननिवहस्तथा वर्णयितुमपेक्ष्यमाणया शेषतया रहिता वयमेतावदीश्वरादभ्यर्थयामो भुवमलङ्कुर्वाणास्सुचिरं भूयासुरेतादृशा विद्वन्मणय इति"

'तृचिनाप्पल्लि' वास्तव्यानां 'अभिनवभट्टबाण' इत्युपाधिविभूषितानां व्याकरणग्रन्थरत्नावलिसंपादकानां पं० रा. च. वि. **कृष्णमाचार्याणाम**भिप्रायः—

'आर्याः, अधिगता संचिका अतीवानन्दयति माम् । श्रीमतामायुर्वेदग्रन्थप्रकटनव्यवसायश्च नितरामखिलैरप्यभिनन्दनीयः । श्रीमद्भिश्च तन्मुद्रणे शोधनादिषु च सुबहु आधीयते श्रद्धेति मे मतिः'

भवतां—**कृष्णमाचार्यः**

ता. ३–१–१९११.

बलिआमण्डलान्तःपातिपनिचाग्रामवास्तव्यानां व्याकरणसाहित्याद्यनेकशास्त्रावगाहनगम्भीरमतीनां 'उत्तरमोहनचरित्रा'द्यनेक काव्यविरचयितॄणां पं. **श्रीरमापतिमिश्राणा**मभिप्रायः—

अदृष्टालभ्यानां विविधविधरोगौघनिधनं विधातॄणामद्यावधि नहि गतानामनुगुणाम् प्रसिद्धिं, ग्रन्थानां प्रकटनपरैर्यादववुधैर्हतैतद्देशीयैदशविषयबाहुल्यविमतिः ॥ १ ॥

विधायागम्यानां विषमविषयाणां क्वचिदपि
विशालं व्याख्यानं बुधजनविलोक्याख्यविषयम् ।
उपोद्घातं चादौ हृतमपि महाशोकजनन-
मधीतो नो वैद्येष्विति जनजनव्यापि कुमतम् ॥ २ ॥

मूल्याल्पत्वाद्गुणाधिक्यान्मुद्रणासुविधानतः। उपादेयत्वमप्यस्य पत्रस्य सुलभं कृतम्

श्रीरमापतिमिश्रः ।

जयपुरराजकीयमहाविद्यालयस्याऽऽयुर्वेदाचार्यपरीक्षोत्तीर्णानां, पञ्चनदविश्वविद्यालयाल्लब्धशास्त्रीपदवीकानां, इन्द्रप्रस्थीय बी. एल्. आयुर्वेदविद्यालयस्य परीक्षकाणां, जींदराज्याधीशस्थापितराजकीयधर्मव्यवस्थापककमीटीसीनियरसभासदानां श्रीयुत पं. **श्यामलाल**शर्ममहोदयानामभिप्रायः—

वैद्य यादवजी त्रिकमजी आचार्यमहाशयं प्रति यथोचितमानपुरःसरं निवेदयति–'आचार्य'इत्युपाधिभूषितैस्तत्र भवद्भिः श्रीयादवशर्मभिः संपाद्यमानामिमां 'आयुर्वेदीयग्रन्थमालाख्यां' मासिकपत्रिकामवलोकनेन प्रफुल्लितहृदयोऽहं विज्ञापयामि किञ्चिद्विद्वज्जनेषु । यदत्र मुद्रिता आयुर्वेदग्रन्था दुष्प्राप्या एव, नैवाद्यावधि कुत्रापि मुद्रिताः । स्वल्पव्ययेनैव प्राप्या एषा पत्रिका आयुर्वेदरसिकजनैरवश्यमेव संग्रहणीयेति । श्रीमन्तश्च पुरातनायुर्वेदप्रकाशनद्वारा वैद्यजनोपकारकरणाय समर्था भवन्त्विति याचते जगदीश्वरम्

संगरूर
ता. २–१९११ } भवदीयः
श्रीश्यामलालशर्मा शास्त्री आयुर्वेदाचार्यः ।

जयपुरराजकीयसंस्कृतमहाविद्यालयस्य आयुर्वेदाचार्यपरीक्षोत्तीर्णानां, मुंबईस्थायुर्वेदविद्यालयस्य वाग्भटाध्यापकानां, पञ्चनदविश्वविद्यालयस्य शास्त्रीपरीक्षोत्तीर्णानां, **वैद्यकिशोरीवल्लभ**शर्मणामभिप्रायः—

प्रियसहृदयाः !

भावत्कायुर्वेदीयग्रन्थमालानामकं मासिकपत्रमासाद्यातीव चेतस्तुष्यति । यत्र खलु दुष्प्रलभा योग्याश्चायुर्वेदीया रसाहृदयादिग्रन्थाः प्रकाश्यन्ते । अपि नाम विदितमेवैतद्विदुषां यथा संप्रति प्रारब्धवशात्परम्पराप्राप्तप्रचुरपुस्तकचयानां स्वयं तान्यनुपयुञ्जानानां परेभ्यश्च प्रेक्षणमात्रार्थमप्यददानानां पुस्तककीनाशानां

हस्तपतितानि पुस्तकानि शीर्णतामवाप्य घुणानां कीटकान्तराणां चोपभोग-भाजनानि भवन्ति । अथ च बहवो मुद्रणाधिकारिणः स्वार्थशेमुष्या अवैद्येभ्यः संशोधय्याशुद्धप्रायाणि पुस्तकानि मुद्रयन्तीत्यादिकारणवशादायुर्वेदीयग्रन्थानां प्रलयत्वमेवापाद्यते । परमीशानुकम्पया सोऽयं महानभावः साम्प्रतमभ्युन्नति-चिकीर्षुणा वैद्यवरश्रीयादवशर्मणा महतायासेन प्राक्तनान् ग्रन्थरत्नानन्वेष्य संशोध्य मुद्रयित्वा च निरस्तः । प्रियवयस्येनायुर्वेदसमुद्धरणे ह्यतीव श्रमः समनुष्ठितः प्राचीनायुर्वेदग्रन्थरत्नलोकलोचनगोचरीभावायेति श्लाघ्यः प्रयत्नः । अखिलभारतवर्षीयैर्वैद्यैर्विद्वद्भिश्चावश्यं ग्राहकसंख्याः संवर्ध्य संवर्धनीयः समुत्साहप्रवाहः किल प्रकाशकमहोदयस्य । येनाभ्युन्नतिमाप्नुयादहरह आयुर्वेदीयग्रन्थमालेति शम् ।

पौषकृष्णनवमी सं० १९६७. **किशोरीवल्लभः ।**

देहलीनगरस्थबनवारीलाल–आयुर्वेदविद्यालयाध्यापकानां वैद्यराजपण्डित **श्री मनोहरलाल**शर्मणामभिप्रायः—

श्रीमन्महोदयः !

सानन्दं निवेदयामः—याऽधुनाऽयुर्वेदीयग्रन्थमालाविर्भूता संदृश्यते, साचेयं पुरातनायुर्वेदीयतन्त्रोद्धृतरत्नैर्ग्रथिता श्रीयादवत्रिविक्रमाचार्यभिषग्भिः सद्भिषजामुपकाराय मालेव प्रतिभाति । किञ्चात्रायुर्वेदीयसद्योगा विविधगदप्रशनक्षमा दरीदृश्यन्ते, यैश्चाशु दाक्ष्यं स्याद्विदुषां भिषजामेवेति ॥

इन्द्रप्रस्थ
ता० २०–१–१९११. } **पं० मनोहरलाल शर्म्मा वैद्यराजः**
बनवारीलाल–आयुर्वेदविद्यालयाध्यापकः

भोलादग्रामवास्तव्यानां वैद्यवर्याणां 'नागरदास मोहनलाल पाठक' इत्येषामभिप्रायः—

प्रिय विद्वन्मण्डन महाशय !

प्राचीनायुर्वेदीयपुस्तकोद्धरणप्रयासं आयुर्वेदीयग्रन्थमालाभिधानमासिकपत्रिकामुखेन कृतं श्रीमद्भिर्भवद्भिर्वीक्ष्याऽऽनन्दार्णवनिमग्नोऽहं लिखाम्यभिनन्दनम्–

यत्नं समस्तविदुषां मुदमावहन्तं श्रीमद्भवत्कृतमुदीक्ष्य मुदं दधेऽहम् ॥
श्रीशैलराजतनयाश्रितवामभागस्त्वां तत्फलेन निजधर्मजुषं युनक्तु ॥ १ ॥

योऽङ्गीकृतोऽत्र भवता सुमहान् प्रयासः
प्राचीनपुस्तकगणोद्धरणक्रियायाम् ॥
सेवा पृथग्मनुजवर्गसुदुष्करा सा
सम्पादिता हि विदुषां भवता पृथिव्याम् ॥ २ ॥

भिषग्वर्याः सर्वे श्रृणुत वचनं सादरतया
यदा चायुर्वेदोदधितलगतिं लिप्सथ तदा ॥
विहायान्यं यत्नं झटिति कुरुत ग्राहकतया
सहायं खल्वस्या इदमभिमतं कर्म विदुषाम् ॥ ३ ॥

सर्वे भिषजो ग्राहकाः सन्तो भवतां यत्नं पुष्णन्तु । पत्रिकेयं सर्वथायुर्वेद-विद्यालिप्सुभिः सज्जनैः संग्रहणीयेति मन्यते

भूह्लाद–मार्गशीर्षे कृष्ण-दलनवम्याम् ॥ संवत् १९६८ } मोहनलालतनुजन्मा पाठकोपाह्वो नाग-रदासशर्मा ।

मुंबईनगरस्थायुर्वेदविद्यालयपरीक्षोत्तीर्णानां 'भिषग्वर, ए. ए. एम्. एस्'इत्युपाधिधारिणां कच्छअंजारग्रामस्थानां 'शिवशङ्कर जयानन्द भट्ट' इत्येषामभिप्रायः—

प्रियमहाशय !

प्राचीनायुर्वेदग्रन्थप्रकाशने श्रीमतां प्रयासोऽतीवाभिनन्दनीयः । रसहृदयादि-ग्रन्थानां प्रकाशनारम्भो मे निकामं जनयति हृदयानन्दम् । सर्वेऽपि भारतीया भिषजो ग्राहकाः सन्तः श्रीमतां यत्नमभिपुष्णन्तु । श्रीमन्तश्चानेकोप्रयुक्तग्रन्थ-प्रकाशने तद्द्वारा भारतीयवैद्यगणोपरि चानुपमोपकारकरणे च क्षमा भवन्त्विति याचते परमात्मानं—

कच्छ अंजार,
ता. ११–११–१९१० } भिषग्वरः श्रीशिवशंकरशर्मा.

पुण्यपत्तनस्थानां अष्टाङ्गहृदयमाधवनिदानयोर्महाराष्ट्रभाषानुवादकानां 'एल्. एम्. एन्ड एस्.' इत्युपाधिधारिणां 'डॉ. गणेश कृष्ण गर्दे' इत्येषामभिप्रायः—

वैद्यवर्य जादवजी त्रिकमजी यांस,

आपण पाठविलेलीं आयुर्वेदीयग्रंथमालेच्या पहिल्या अंकाचीं ४८ पानें पोंचलीं. आपला उद्योग फार स्तुत्य आहे. उपयुक्त व अप्रसिद्ध असे आयुर्वेदीयग्रंथ जितके प्रसिद्ध होतील तितकी आपल्या जुन्या चिकित्साशास्त्रांतील उपयुक्त भाग कायम राखण्यास मदत होईल. जुनी परंपरा लुप्त होत चालली आहे व रसक्रियेची नुस्ती थट्टा चालली आहे. शास्त्रोक्त रीतीनें पारदादिकांची सिद्धि न करितां अनेक वैद्यकीच्या कारखान्यांतून वाटेल तशीं रसायनें तयार करून भाविक लोकांच्या गळ्यांत बांधलीं जात आहेत व अशा औषधांच्या उपयोगापासून रोग्यांचें नुकसान होतें एवढेंच

नव्हे, तर कच्या रसायनी औषधामुळें झालेलें नुकसान दृष्टोत्पत्तीस आल्यामुळें लोकांकडून वैद्यशास्त्रालाही दूषण मिळतें, ही स्थिति नाहींशी होण्याला सशास्त्र औषधें तयार झालीं पाहिजेत व ह्या गोष्टीच्या सिद्धतेची पहिली पायरी ह्मटली ह्मणजे रसहृदय, रसार्णव इत्यादि प्राचीन परंपरेचे प्रकाशक असे ग्रंथ प्रसिद्ध झाले पाहिजेत. तें काम आपण हातीं घेतलेलें पाहून व त्यांत आमचे मित्र रा. रा. त्र्यंबक गुरुनाथ काळे यांनीं मदत करण्याचें कबूल केलें आहे असें ऐकून मला फार समाधान वाटलें. आपल्या ह्या सत्कार्यास चांगला आश्रय मिळून तें सिद्धीस जावें अशी आशा करून हें पत्र संपवितों.

पुणें, ता. २६।१०।१०. **गणेश कृष्ण गर्दे.**

पौर्वपाश्चात्योभयचिकित्साशास्त्रनिपुणानां 'ऑनरेबल, सर डॉ० भालचन्द्र कृष्ण भाटवडेकर' इति विख्यातानामभिप्राय:—

Bombuy, December, 6th 1910.

"VAIDYA JÂDAVAJI TRICAMJI ÂCHARYA gave me a copy of the 1st volume of the Monthly Magazine called Âyurvediya Granthamâlâ, a monthly Medical Sanskrit Magazine edited and published by him. It contains 3 different reprints of MSS which he has secured, one of them Rasahṛidayam Tantram is written by Govindâchârya, the Guru of the celebrated Shankarâchârya, who is supposed to have lived about a 1000 years ago. The Magazine is well conceived and if kept up to the standard of the 1st Vol. is calculated to do immense good to the Ayurvedic Literature of the present time. I wish Vaidya Jâdavaji every success in the work he has undertaken."

BHÂLCHANDRA KRISHNA.

Opinion from Âyurveda Mârtanḍa, Bhishangmuni, Pandit D. GOPALÂCHARLU, A. V. S. Principal, S. K. P. D. Âyurvedic College; Âyurvedic Doctor, E. Senior Physician S. K. P. D. Hospital Madras; examiner, Mysore Ayurveda Vidwat Examinations and Commentator of Sushruta, Madhavanidana, etc:—

"Dear sir, *Madras, E. 4-12-1910.*

It affords me much pleasure to have gone through the pages of your valuable journal " Ayurvediya Grantha Mâlâ" and I accord my hearty and cordial welcome to it as just the thing that is needed for the resuscitation of Âyurvedas' lore at present. The valued works, with which you have commenced the journal promise a bright career to your journal, while the beautiful get-up of the periodical leaves nothing to be desired. I have no doubt that the journal conducted by one of your deep and profound erudition can be otherwise than an acquisition and help to the labours of the modern workers in the field of whom I have the privilege of being included as one."

मुंबईनगरस्थायुर्वेदविद्यालयव्यवस्थापकानां 'एल्. एम्. एन्ड एस्.' इत्युपाधिधारिणां **'डॉ० पोपट प्रभुराम'** इति विख्यतानामभिप्राय:—

MY DEAR VAIDYA JÂDAVAJI TRICAMJI ÂCHÂRYA, I am very much obliged to you for your kindly sending to me the issues of your Ayurvediya Granthamala. The Sanskrit Medical science is very vast and there are many works which are still not published. It is a great service done to the profession especially the Aryan Medical practitioners to publish these unknown works. Nobody could do it better than you as your sound knowledge of the science and the earnest wish of yours to publish these works bespeak your fitness to take up the work. Medical practitioners and students of the science will both find many things new in these works which will add a good deal to their knowledge. I have recommended these issues to the students of the Aryan Medical School before whom you have lectured for a period of about two years and who have always been thinking of your interesting lectures on Vagbhatta. I wish you all success in this your undertaking.

I remain,
Yours truly,
POPAT PRABHURAM,
Supt. A. M. S.

2/3 Anant Wadi,
Bombay 17th Jan. 1911.

From PANDIT M. DURAISWAMI AIYANGAR, Ayurveda Bhushan, Certificated Ayurvedic Doctor, Lecturer, Madras, S. K. P. A., Medical College, Assistant Physician S. K. P. D. Ayurvedic Hospital.

DEAR SIR,

In regard to the Medical monthly "Ayurvediya Granthamala" edited and published by you, I am glad to perceive that your journal stands unique in the field of Medicine and marks the beginning of sincere attempts to resuscitate the Ancient Lore which has been thrown into oblivion by the unthinking millions. Your journal takes the place of a beacon to lead your benighted brethren along the forgotten paths and to help them considerably to unravel and appreciate fully the profound truths of the Hindu science of Medicine. While wishing you hearty success in your honest efforts, I hope no consideration shall deter you from carrying out fully your desired object, as you would thus be doing a service to the public which would be its own reward.

AYURVEDA VILAS,
176 Mint Street,
Madras, E. 2-3-1911.

Yours Faithfully,
M. D. SWAMI.

FROM, B. MANNARU SASTRIAL,

Pillayar palayam, Madura Post, South India

To,

VAIDYA JADAVAJI TRIKUMJI ACHARYA,

BOMBAY.

DEAR SIR,

I am one of the profound mourners for the long-lost mother of Ayurvedic Lore. I had long lost all hopes of her revival. I went on mourning every day. It was at such a juncture, when I interested in such researches, was about to relinquish every idea of success, that your 'Ayurvedic Grantha Mala conducted by your profound erudition happened to pass before my watery eyes. Immediately I

found that she was already revived in the learned North and was coming towards me with redoubled brilliance and beauty like the gold subjected to many refinements in fire. It afforded me so much pleasure and satisfaction as would be felt by a small orphan at finding his long dead mother revived to life and standing before it. As a representative of the rest of the mourners who also enjoyed the opportunity of persuing your journal and thus satisfying themselves, I render my heart-felt thanks for the interest that you have taken in its resusciation I perused the 9 issues of your worthy journal and was curious enough to go through the August Issue. I was very much feeling the unexpected and unlucky delay of great length. wheras I found the August journal came to my hands on the 19th instant. I deeplyfelt apology for your delay. Deep was my sorrow to see the merciless God afflicting such a divine moon like you, in your divine errand. Deep is my wish that God no more might thus interrupt you in the discharge of your benevolent and national duty. Deep is my anxiety and wish for your longlife, for your interrupted health and for the prosperity of your journal. It would not be too much to add that the worthy journal of yours would stimulate the sluggish spirit of all our Southern Sanskrit Scholars whose combined efforts should contribute their quota to the resusciation of Ayurvedic lore and to the national advancement. With my best wishes for the same.

I remain,
Sir,
Yours Sincerely.

PILLAYAR PALAYam,
28th Septembr 1911.

B. MANNARU SASTRIAL.

'वैद्यकुलभूषण' इति तथा वैद्यरत्न इति च प्राप्तोपाधिद्वयानां कानपुरीय-वैद्यपरिषन्मन्त्रिणां श्रीयुत **पं० रामेश्वरमिश्रवैद्यशास्त्रिणा**मभिप्रायः—

ओ३म् श्रीधन्वन्तरये नमस्कृतिः ।

श्रीयुक्त यादवजी त्रिकमजी महोदयेषु बहुमानपुरस्सरेयं विज्ञप्तिः—

यच्च शल्यशालाक्याद्यष्टाङ्गभूतं वेदसमकालं किलायुर्वेदशास्त्रं, तद्द्वारैवायुर्निरामयत्वलाभाद्धर्मादिचतुर्वर्गसाधनत्वं तस्येति धर्मादिचतुर्वर्गलिप्सूनां प्राणिनां रागाद्याध्यात्मिकैरुन्मादाद्याधिदैविकैः कुष्ठाद्याधिभौतिकैश्चानेकविधरोगभुजगैः संदष्टानां समूलरोगनिवृत्तये परमकारुणिकैरात्रेयकश्यपशाण्डिल्यभरद्वाजादिमहर्षिभिस्त्रिकालज्ञानशालिभिर्मुनिभिः स्वास्थ्यानुवृत्तिपुरःसरं दीर्घायुर्लाभायानेकविधा आरोग्योपजीवनभूता विरचिताः संहिताः। ताः कदाचिदत्युत्तमोन्नतिपदारूढाश्चासन्। याः संहिताः सम्यगधीत्य पुरातनैरतिदुरूहायुर्वेदमर्मज्ञैर्विशुद्धबुद्धिभिश्चिकित्सकवरैरेव रसायनैरन्यैश्च दिव्यौषधितल्लजैश्च्यवनादीनां जराराजयक्ष्मादिरोगार्तानामारोग्यं विधायातिजराभिभूतानां नूनं नूतनं वयःस्थापितमिति। तासु समुपलभ्यमानास्वप्यनेकासु संहितासु हन्त बह्व्यः संहिताः कुत्रचिद्विद्यमाना अपि इदानीं द्रष्टुमपि नोपलभ्यन्ते। परं संतुष्यति चेतः खलु आयुर्वेदीयग्रन्थमालायां संग्रथिता रसहृदयादिग्रन्थाः, ये हि पुरा लुप्तप्राया अत एव सुदुर्लभाश्च प्रकाश्यन्ते। अन्येषां च ग्रन्थानां तादृशानां संप्रकाशने ह्यस्मत्सुहृद्वरैरायुर्वेदोद्धारकैराचार्ययादवजीमहोदयैर्महानायासः समनुष्ठितः। स खलु प्रभूतमभिनन्दनीयो धन्यवादार्हश्चार्यमहाशयः। अधुना परिम्लायमानाप्यायुर्विद्यावल्ली कादम्बिन्या इवास्याः प्रादुर्भावेन भूयः पल्लविता पुष्पशालिनी फलसंकुला च स्यादिति वरीवृत्यतेऽस्माकमवितथो मनोरथः। तथाहि—आप्लावत्यस्मिन्नवसरे पण्डितराजवचोवीचिरस्मद्धृदयप्रदेशम्।—

"आरामाधिपतिर्विवेकविकलो नूनं रसा नीरसा
वात्याभिः परुषीकृता दशदिशश्चण्डातपो दुःसहः।
एवं धन्वनि चम्पकस्य सकले संहारहेतावपि
त्वं सिञ्चन्नमृतेन तोयद कुतोऽप्याविष्कृतो वेधसा॥"

सर्वेषामेव भारतवर्षीयायुर्वेदारविन्दमलिन्दानामतीव सांप्रतं संप्रति स्वकीयाधिहोमजन्योत्साहधूमस्तोमैरस्याः कादम्बिन्याः संवर्धनमिति साग्रहमभ्यर्थ्यते, अपि चायुर्वेदीयग्रन्थमाला चिरायुष्मती तत्प्रकाशकश्च चिरायुर्भूयादित्याशास्ते च

पौषशुक्लद्वादश्यां
चन्द्रे, सं० १९६८ विक्रमाब्दे
नयागंज, कानपुर.

श्रीरामेश्वरमिश्रो वैद्यशास्त्री।

(राजमार्तण्डादुद्धृतोंशः)

वातज्वरे गुडूच्यादिकषायः ।

वातज्वरोपशमनाय पिबेद्गुडूची-
दुस्पर्शनागरघनक्कथितं कषायम् ।

पित्तज्वरे नलदादिकषायः ।

पित्तोद्भवे नलदपर्पटकाब्दशुण्ठी-
श्रीखण्डनिःक्कथितमेतदुशन्ति वैद्याः ॥ १९९ ॥

कफज्वरे शुण्ठ्यादिकषायः ।

शुण्ठीयवासकवृषाब्दकृतः कषायः
श्लेष्मोद्भवं शमयति ज्वरमाशु पीतः ।

सर्वज्वरे शुण्ठ्यादिकषायः ।

सर्वज्वरप्रशमनार्थमुदाहरन्ति
विश्वौषधेन सह पर्पटकं मुनीन्द्राः ॥ २०० ॥

(ज्वराधिकारः २०)

(रससारादुद्धृतोंशः)

पुरा शुद्धो रसेन्द्रश्च संस्कारैर्यश्च संस्कृतः ।
चारयेज्जारयेत्तं[1] च महासिद्धिप्रदो भवेत् ॥ १ ॥
लोहखल्वे चतुष्पादे रसं तत्र विनिक्षिपेत् ।
क्षाराम्लवेतसं काञ्ची विडं द्वात्रिंशदंशकम् ॥ २ ॥
चतुःषष्ठ्यंशकं व्योम ग्रासं दत्त्वा रसस्य तु ।
टङ्कणं हयलाला च लशुनार्द्रकचित्रकम् ॥ ३ ॥
मधुनिम्बरसं दत्त्वा यामयुग्मं विमर्दयेत् ।
सोष्णखल्वे चरेद्ग्रासं गर्भद्रुतिमवाप्नुयात् ॥ ४ ॥
नष्टपिष्टं परिज्ञाय यत्नेन क्षालयेद्रसम् ।
सोमानलस्य यन्त्रस्य नाभिमध्ये[2] रसं क्षिपेत् ॥ ५ ॥
दत्त्वाऽष्टांशं विडं नाभिं किञ्चिदम्लेन पूरयेत् ।
क्षाराम्लं त्र्यूषणं मूत्रं राजिकाशिग्रुचित्रकम् ॥ ६ ॥

(पटलः १२)

---

१ 'चारयेज्जारयेद्यत्रे' ग. । २ 'नालिमध्ये' ग. ।

(गदनिग्रहादुद्धृतोंशः)

विषमज्वरे जीरकगुडप्रयोगः ।

अजाजी गुडसंयुक्ता विषमज्वरनाशनी ॥ ५६३ ॥
अग्निसादं जयेत्सम्यग्वातरोगांश्च नाशयेत् ।

विषमज्वरे गुडत्रिफलाप्रयोगः ।

गुडप्रगाढां त्रिफलां पिबेद्वा विषमार्दितः ॥ ५६४ ॥

विषमज्वरे मुस्तादिकषायः ।

मुस्तामलकगुडूचीविश्वौषधकण्टकारिकाक्काथः ।
पीतः सकणाचूर्णः समधुर्विषमज्वरं हन्ति ॥ ५६५ ॥

विषमज्वरे रसोनयोगः ।

प्रातः प्रातः ससर्पिष्कं रसोनमुपयोजयत् ।

विषमज्वरे पिप्पलीवर्धमानप्रयोगः ।

पिप्पलीवर्धमानं वा पिबेत्क्षीररसाशनः ॥ ५६६ ॥
त्रिभिरथ परिवृद्धं पञ्चभिः सप्तभिर्वा
दशभिरथ विवृद्धं पिप्पलीवर्धमानम् ।
इति पिबति पयसा तस्य न श्वासकास-
ज्वरजठरगुदार्शोवातरक्तक्षयाः स्युः ॥ ५६७ ॥

विषमज्वरे पटोलादिक्काथः ।

पटोलकटुकामुस्तापथ्यानां मधुकस्य च ।
त्रिचतुःपञ्चशः क्काथो विषमज्वरनाशनः ॥ ५६८ ॥

विषमज्वरे कतिपययोगाः ।

पिबेत्पर्पटकक्काथं गुडूच्या वासकस्य वा ।
त्रिफलाया रसं वापि श्लैष्मिके विषमज्वरे ॥ ५६९ ॥
निम्बदारुकषायं वा हितं सौमनसं तथा ।
यवान्नविकृतिः सर्पिर्मद्यं च विषमे हितम् ॥ ५७० ॥
दशमूलीकषायेण पिप्पलीर्वा प्रयोजयेत् ।
ताम्रचूडस्य मांसेन पिबेद्वा मद्यमुत्तमम् ॥ ५७१ ॥

(कायचिकित्साखण्डे ज्वराधिकारः १)